बृहज्जातक वराहमिहिर

१ उपनयनाध्यायः

१.०१ जयति जगतः प्रसूतिर् विश्वात्मा सहज-भूषणं नभसः।

१.०१ द्युत-कनक-सदृश-दश-शत-मयूख-माला-अर्चितः सविता॥

१.०२ प्रथम-मुनि-कथितम् अवितथम् अवलोक्य ग्रन्थ-विस्तरस्य अर्थम्।

१.०२ न-अतिलघु-विपुल-रचनाभिर् उद्यतः स्पष्टम् अभिधातुम्॥

१.०३ मुनि-विरचितम् इदम् इति यच् चिरन्तनं साधु न मनुज-ग्रथितम्।

१.०३ तुल्ये -अर्थे -अक्षर-भेदाद् अमन्त्रके का विशेष-उक्तिः॥

१.०४ क्षितितनय-दिवस-वारो न शुभकृद् इति यदि पितामह-प्रोक्ते।

१.०४ कुज-दिनम् अनिष्टम् इति वा को -अत्र विशेषो नृ-दिव्य-*कृतेः[K.कृते]॥

१.०५ आब्रह्म-आदि-विनिःसृतम् आलोक्य ग्रन्थ-विस्तरं क्रमशः।

१.०५ क्रियमाणकम् एव -एतत् समासतो -अतो मम-उत्साहः॥

१.०६ आसीत् तमः किल-इदं तत्र-अपां तैजसे -अभवद् धैमे।

१.०६ स्वर्-भू-शकले ब्रह्मा विश्वकृद् अण्डे -अर्क-शशि-नयनः॥

१.०७ कपिलः प्रधानम् आह द्रव्य-आदीन् कणकभुग् अस्य विश्वस्य।

१.०७ कालं कारणम् एके स्वभावम् अपरे जगुः कर्म॥

१.०८ तद् अलम् अतिविस्तरेण प्रसङ्ग-वाद-अर्थ-निर्णयो -अतिमहान्।

१.०८ ज्योतिःशास्त्र-अङ्गानां वक्तव्यो निर्णयो -अत्र मया॥

१.०९अ ज्योतिःशास्त्रम् अनेक-भेद-विषयं स्कन्ध-त्रय-अधिष्ठितं

१.०९ब् तत्-कात्स्न्र्य-उपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।

१.०९च् स्कन्धे -अस्मिन् गणितेन या ग्रहगतिस् तन्त्र-अभिधानस् त्व् असौ

१.०९द् होरा-अन्यो -अङ्ग-विनिश्चयश् च कथितः स्कन्धस् तृतीयो -अपरः॥

१.१० वक्र-अनुवक्र-अस्तमय-उदय-आद्यास् तारा-ग्रहाणां करणे मया-उक्ताः।

१.१० होरागतं विस्तरशश् च जन्म-यात्रा-विवाहैः सह पूर्वम् उक्तम्॥

१.११ प्रश्न-प्रतिप्रश्न-कथा-प्रसङ्गान् स्व्-अल्प-उपयोगान् ग्रह-सम्भवाम्श् च।

१.११ सन्त्यज्य फल्गूनि च सार-भूतं भूत-अर्थम् अर्थैः सकलैः प्रवक्ष्ये॥

२ सांवत्सरसूत्राध्यायः

अथ-अतः सांवत्सर-सूत्रं व्याख्यास्यामः

२.(१) तत्र सांवत्सरो -अभिजातः प्रिय-दर्शनो विनीतवेषः सत्यवाग् अनसूयकः समः सुसंहिता-उपचित-गात्र-सन्धिर् अविकलश् चारु-कर-चरण-नख-नयन-चिबुक-दशन-श्रवण-ललाट-भ्रू-उत्तम-अङ्गो वपुष्मान् गम्भीर-उदात्त-घोषः। प्रायः शरीर-आकार-*अनुवर्त्तिनो[K.अनुवर्तिनो] हि गुणा दोषाश् च भवन्ति।

२.(२) तत्र गुणाः---शुचिर् दक्षः प्रगल्भो *वाग्म्मी[K.वाग्मी] प्रतिभानवान् देश-काल-वित् सात्त्विको न पर्षद्-भीरुः सहाध्यायिभिर् अनभिभवनीयः कुशलो -अव्यसनी शान्तिक-पौष्टिक-अभिचार-स्नान-विद्या-अभिज्ञो विबुध-अर्चन-व्रत-उपवास-निरतः स्वतन्त्र-आश्चर्य-उत्पादित-प्रभावः पृष्टाभिधाय्य् अन्यत्र दैवात् ययाद् ग्रहगणित-संहिता-होरा-ग्रन्थ-अर्थ-वेत्ता-इति।

२.(३) तत्र ग्रहगणिते पौलिश-रोमक-वासिष्ठ-सौर-पैतामहेषु पञ्चस्व् एतेषु सिद्धान्तेषु युग-वर्ष-अयन-ऋतु-मास-पक्ष-अहोरात्र-याम-मुहूर्त-*नाडी[U - नाडी-विनाडी]प्राण-त्रुटि-त्रुट्य्-आद्य्-अवयव-*आदिकस्य[K.आद्यस्य] कालस्य क्षेत्रस्य च वेत्ता।

२.(४) चतुर्णां च मानानां सौर-सावन-नाक्षत्र-चान्द्राणाम् अधिमासक-अवम-सम्भवस्य च कारण-अभिज्ञः।

२.(५) षष्ट्य्-अब्द-युग-वर्ष-मास-दिन-होरा-अधिपतीनां *प्रतिपत्ति[K.प्रतिपत्तिवि]-च्छेदवित्।

२.(६) सौर-आदीनां च मानानाम् *असदृश-सदृश[K.सदृश-असदृश]योग्य-अयोग्यत्व-प्रतिपादन-पटुः।

२.(७) सिद्धान्त-भेदे -अप्य् अयन-निवृत्तौ प्रत्यक्षं सम-मण्डल-लेखा-सम्प्रयोग-अभ्युदित-अंशकानां [K.च] छाया-जल-यन्त्र-दृग्-गणित-साम्येन प्रतिपादन-कुशलः।

२.(८) सूर्य-आदीनां च ग्रहाणाम् शीघ्र-मन्द-याम्य-उत्तर-नीच-उच्चगति-कारण-अभिज्ञः।

२.(९) सूर्य-चन्द्रमसोश् च ग्रहणे ग्रहण-आदि-मोक्ष-काल-दिक्-प्रमाण-स्थिति-विमर्द-वर्ण-*आदेशानाम्[K.देशानाम्] अनागत-ग्रह-समागम-युद्धानाम् आदेष्टा।

२.(१०) प्रत्येक-ग्रह-भ्रमण-योजन-कक्ष्या-प्रमाण-प्रतिविषय-योजन-परिच्छेद-कुशलः[K.कुशलो]।

२.(११) भू-भगण-भ्रमण-संस्थान-आद्य्-अक्ष-अवलम्बक-अहर्व्यास-चर-दल-काल-राश्य्-उदय-च्छाया-नाडी-करण-प्रभृतिषु क्षेत्र-काल-करणेष्व् अभिज्ञः।

२.(१२) नाना-चोद्य-प्रश्न-भेद-उपलब्धि-जनित-वाक्-सारो निकष-सन्ताप-अभिनिवेशैः [K.विशुद्धस्य] कनकस्य-इव-अधिकतरम् अमलीकृतस्य [K.शास्त्रस्य]वक्ता तन्त्रज्ञो भवति[K.उक्तञ् च]।

२.०१ न प्रतिबद्धं गमयति वक्ति न च प्रश्नम् एकम् अपि पृष्टः।

२.०१ निगदति न च शिष्येभ्यः स कथं शास्त्र-अर्थविज् ज्ञेयः॥

२.०२ ग्रन्थो -अन्यथा-अन्यथा-*अर्थं[K.अर्थः] करणं यश् च-अन्यथा करोत्य् अबुधः।

२.०२ स पितामहम् उपगम्य स्तौति नरो वैशिकेन-आर्याम्॥

२.०३ तन्त्रे सुपरिज्ञाते लग्ने छाया-अम्बुयन्त्र-संविदिते।

२.०३ होरा-अर्थे च सुरूढे न-आदेष्टुर् भारती वन्ध्या॥

<उक्तन् चार्य-विष्णु-गुप्तेन>

२.०४अ अप्य् अर्णवस्य पुरुषः प्रतरन् कदा चिद्

२.०४ब् आसादयेद् अनिल-वेग-वशेन पारम्।

२.०४च् न त्व् अस्य कालपुरुष-आख्य-महा-अर्णवस्य

२.०४द् गच्छेत् कदा चिद् अनृषिर् मनसा-अपि पारम्॥

२.(१३) होराशास्त्रे -अपि [K.च] राशि-होरा-द्रेष्काण-नवांशक-द्वादशभाग-त्रिंशद्भाग-बल-अबल-परिग्रहो ग्रहाणां दिक्-स्थान-काल-चेष्टाभिर् अनेक-प्रकार-बल-निर्धारणं प्रकृति-धातु-द्रव्य-जाति-चेष्टा-आदि-परिग्रहो निषेक-जन्म-काल-विस्मापन-प्रत्यय-आदेश-सद्योमरण-आयुर्दाय-दशा-अन्तर्दशा-अष्टक-वर्ग-राजयोग-चन्द्रयोग-द्विग्रह-आदियोगानां नाभस-आदीनाम्
च योगानाम् फलान्य् आश्रय-भाव-अवलोकन-निर्याण-गत्य्-अनूकानि *तत्काल[K.तात्कालिक]प्रश्न-शुभ-अशुभ-निमित्तानि विवाह-आदीनाम् च कर्मनां करणम्।

२.(१४) यात्रायां तु [K.च] तिथि-दिवस-करण-नक्षत्र-मुहूर्त-विलग्न-योग-देह-स्पन्दन-स्वप्न-विजय-स्नान-ग्रहयज्ञ-गण-याग-अग्निलिङ्ग-हस्त्य्-अश्व-इङ्गित-सेना-प्रवाद-चेष्टा-आदि-ग्रह-षाङ्गुण्य-उपाय-मङ्गल-अमङ्गल-शकुन-सैन्य-निवेश-भूमयो -अग्निवर्णा मन्त्रि-चर-दूत-आटविकानां यथाकालं प्रयोगाः परदुर्ग-उपलम्भ-उपायश् च-इत्य् उक्तं च-आचार्यैः।

२.०५ जगति प्रसारितम् इव-आलिखितम् इव मतौ निषिक्तम् इव हृदये।

२.०५ शास्त्रं यस्य सभगणं न-आदेशा *निष्फलास्[K.निःफलास्] तस्य॥

२.(१५) संहिता-पारगश् च दैव-चिन्तको भवति।

२.(१६) यत्र -एते संहिता-पदार्थाः।

२.(१७.१) दिन-कर-आदीनाम् ग्रहाणां चारास् तेषु च तेषां प्रकृति-विकृति-प्रमाण-वर्ण-किरण-द्युति-संस्थान-अस्तमन-उदय-मार्ग-मार्गान्तर-वक्र-अनुवक्र-ऋक्ष-ग्रह-समागम-चार-आदिभिः फलानि नक्षत्र-कूर्म-विभागेन देशेष्व् *अगस्त्य-चारः[K.अगस्तिचारः]। सप्तर्षि-चारः ।ग्रह-भक्तयो
नक्षत्र-व्यूह-ग्रह-शृङ्गाटक-ग्रह-युद्ध-ग्रह-समागम-ग्रह-वर्ष-फल-गर्भ-लक्षण-रोहिणी-स्वात्य्-आषाढीयोगाः
सद्योवर्ष-कुसुमलता-परिधि-परिवेष-परिघ-पवन-उल्का-दिग्दाह-क्षितिचलन-सन्ध्या-राग-गन्धर्वनगर-रजो-निर्घात-अर्घ-काण्ड-सस्यजन्म-इन्द्रध्वज-इन्द्रचाप-वास्तुविद्या-अङ्गविद्या-वायसविद्या-अन्तरचक्र-मृगचक्र-श्वचक्र-वातचक्र-प्रासादलक्षण-प्रतिमालक्षण-प्रतिष्ठापन-वृक्षायुर्वेद-उदगार्गल-नीराजन-*खञ्जनक[K.खञ्जन]-उत्पातशान्ति-
मयूरचित्रक-घृत-कम्बल-खड्ग-पट्ट-कृकवाकु-कूर्म-गो-अज-अश्व-इभ-पुरूष[K.ऊ.पुरुष]-स्त्री-लक्षणान्य्

२.(१७.२) अन्तःपुर-चिन्ता-पिटकलक्षण-उपानच्छेद-वस्त्रच्छेद-चामर-दण्ड-*शयन[K.शय्या]-आसनलक्षण-रत्नपरीक्षा दीपलक्षणं दन्तकाष्ठ-आद्य्-आश्रितानि शुभ-अशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणम् अनन्यकर्म-अभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न च-एकाकिना शक्यन्ते -अहर्निशम् अवधारयितुं निमित्तानि। तस्मात्
सुभृतेन-एव दैवज्ञेन अन्ये *-अपि[K.ओमित्तेद्] तद्विदश् चत्वारः *कर्तव्याः[K.भर्तव्याः] ।तत्र-एकेन-ऐन्द्री च-आग्नेयी च दिग् अवलोकयितव्या। याम्या नैरृती च-अन्येन-एवं वारुणी वायव्या च-उत्तरा च-ऐशानि च-इति। यस्माद् *उल्का-पात-आदीनि[K.निमित्तानि] शीघ्रम् *अपगच्छति[K.उपगच्छति]-इति। *तस्याश्[K.तेषां]
च-आकार-वर्ण-स्नेह-प्रमान-आदि-ग्रह-ऋक्ष-उपघात-आदिभिः फलानि भवन्ति।

<उक्तं च गर्गेण महर्षिणा>

२.०६ कृत्स्न-अङ्ग-उपाङ्ग-कुशलं होरा-गणित-नैष्ठिकम्।

२.०६ यो न पूजयते राजा स नाशम् उपागच्छति॥

२.०७ वनं समाश्रिता ये -अपि निर्ममा निष्परिग्रहाः।

२.०७ अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्॥

२.०८ अप्रदीपा यथा रात्रिर् अनादित्यं यथा नभः।

२.०८ तथा-असांवत्सरो राजा भ्रम्यत्य् अन्ध इव-अध्वनि॥

२.०९ *मुहूर्त[K.मुहूर्तं]-तिथि-नक्षत्रम् ऋतवश् च-अयने तथा।

२.०९ सर्वाण्य् एव-अकुलानि स्युर् न स्यात् सांवत्सरो यदि॥

२.१० तस्माद् राज्ञा-अधिगन्तव्यो विद्वान् सांवत्सरो -अग्रणीः।

२.१० जयं यशः श्रियं भोगान् श्रेयश् च समभीप्सता॥

२.११ न-असांवत्सरिके देशे वस्तव्यं भूतिम् इच्छता।

२.११ चक्षुर्-भूतो हि यत्र-एष पापं तत्र न विद्यते॥

२.१२ न सांवत्सर-पाठी च नरकेषु-उपपद्यते।

२.१२ ब्रह्मलोक-प्रतिष्ठां च लभते दैवचिन्तकः॥

२.१३ ग्रन्थतश् च-अर्थतश् च-एतत् कृत्स्नं जानति यो द्विजः।

२.१३ अग्रभुक् स भवेत्-श्राद्धे पूजितः पङ्क्ति-पावनः।

२.१४ म्लेच्छा हि यवनास् तेषु सम्यक् शास्त्रम् इदं स्थितम्।

२.१४ ऋषिवत् ते -अपि पूज्यन्ते किं पुनर् दैवविद् द्विजः॥

२.१५ कुहक-आवेश-पिहितैः कर्ण-उपशुति-हेतुभिः।

२.१५ कृत-आदेशो न सर्वत्र प्रष्टव्यो न स दैववित्॥

२.१६ अविदित्वा-एव *यत्[K.यः]-शास्त्रं दैवज्ञत्वं प्रपद्यते।

२.१६ स पङ्क्ति-दूषकः पापो ज्ञेयो नक्षत्र-सूचकः॥

[K.२.१८ नक्षत्र-सूचक-उद्दिष्टम् उपहासं करोति यः।

K.२.१८च्। स व्रजत्य् अन्धता-मिस्रं सार्धम् ऋक्षविडम्बिना॥]

२.१७ नगर-द्वार-लोष्टस्य यद्वत् स्याद् उपयाचितम्।

२.१७ आदेशस् तद्वद् अज्ञानां यः सत्यः स विभाव्यते॥

२.१८ सम्पत्त्या योजित-आदेशस् तद्-विच्छिन्न-कथा-प्रियः।

२.१८ मत्तः शास्त्र-एकदेशेन त्याज्यस् तादृग्-महीक्षिता॥

२.१९ यस् तु सम्यग् विजानाति होरा-गणित-संहिताः।

२.१९ अभ्यर्च्यः स नरेन्द्रेण स्वीकर्तव्यो जय-एषिणा॥

२.२० न तत् सहस्रं करिणां वाजिनां च चतुर्गुणम्।

२.२० करोति देश-कालज्ञो *यथा-एको[K.यद् एको]-दैवचिन्तकः॥

२.२१ दुःस्वप्र-दुर्विचिन्तित-दुष्प्रेक्षित-दुष्कृतानि कर्माणि।

२.२१ क्षिप्रं प्रयान्ति नाशम् शशिनः शुत्वा भसंवादम्॥

२.२२ न तथा-इच्छति भूपतेः पिता जननी वा स्वजनो -अथ वा सुहृत्।

२.२२ स्वयशो-अभिविवृद्धये यथा हितम् आप्तः सबलस्य दैववित्॥

३ आदित्यचाराध्यायः

३.०१ आश्लेषा-अर्धाद् दक्षिणम् उत्तरम् अयनं *रवेरा[K.ओमित्तेद्] धनिष्ठा-अद्यम्।

३.०१ नूनं कदा चिद् आसीद् येन-उक्तम् पूर्व-शास्त्रेषु॥

३.०२ साम्प्रतम् अयनं सवितुः कर्कटक-आद्यम् मृग-आदितश् च-अन्यत्।

३.०२ उक्त-अभावो विकृतिः प्रत्यक्ष-परीक्षणैर् व्यक्तिः॥

३.०३ दूरस्थ-चिह्न-वेधाद् उदये -अस्तमये -अपि वा सहस्रांशोः।

३.०३ छाया-प्रवेश-निर्गम-चिह्नैर् वा मण्डले महति॥

३.०४ अप्राप्य मकरम् अर्को विनिवृत्तो हन्ति स-अपराम् याम्याम्।

३.०४ कर्कटकम् असम्प्राप्तो विनिवृत्तश् च-उत्तरां स -ऐन्द्रीम्॥

३.०५ उत्तरम् अयनम् अतीत्य व्यावृत्तः क्षेम-सस्य-वृद्धि-करः।

३.०५ प्रकृतिस्थश् च-अप्य् एवं विकृत-गतिर् भयकृद् उष्णांशुः॥

३.०६ स-तमस्कं पर्व विना त्वष्टा नाम-अर्क-मण्डलं कुरुते।

३.०६ स निहन्ति सप्त भूपान् जनांश् च शस्त्र-अग्नि-दुर्भिक्षैः॥

३.०७ तामसकीलक-संज्ञा राहुसुताः केतवस् त्रयस् त्रिंशत्।

३.०७ वर्ण-स्थान-आकारैस् तान् दृष्ट्वा -अर्के फलं ब्रूयात्॥

३.०८ ते च-अर्क-मण्डल-गताः पापफलाश् चन्द्र-मण्डले सौम्याः।

३.०८ ध्वाङ्क्ष-कबन्ध-प्रहरण-रूपाः पापाः शशाङ्के -अपि॥

३.०९ तेषाम् उदये रूपाण्य् अम्भः कलुषं रजो-वृतं व्योम।

३.०९ नग-तरु-शिखर-*आमर्दी[K.विमर्दी] सशर्करो मारुतश् चण्डः॥

३.१० ऋतु-विपरीतास् तरवो दीप्ता मृग-पक्षिणो दिशां दाहाः।

३.१० निर्घात-महीकम्प-आदयो भवन्त्य् अत्र च-उत्पाताः॥

३.११ न पृथक् फलानि तेषां शिखि-कीलक-राहु-दर्शनानि यदि।

३.११ तद्-उदय-कारणम् एषां केतु-आदीनाम् फलं ब्रूयात्॥

३.१२ यस्मिन् यस्मिन् देशे दर्शनम् आयान्ति सूर्य-बिम्बस्था।

३.१२ तस्मिंस् तस्मिन् व्यसनम् महीपतीनाम् परिज्ञेयम्॥

३.१३ क्षुत्-प्रम्लान-शरीरा मुनयो -अप्य् उत्सृष्ट-धर्म-सच्-चरिताः।

३.१३ निर्मांस-बाल-हस्ताः कृच्छ्रेण -आयान्ति *पर-देशम्[K.परदेशान्]॥

३.१४ तस्कर-विलुप्त-वित्ताः प्रदीर्घ-निःश्वास-मुकुलित-अक्षि-पुटाः।

३.१४ सन्तः सन्न-शरीराः शोक-उद्भव-*वाष्प[Kऽस् त्र्. बाष्प]रुद्ध-दृशः॥

३.१५ क्षामा जुगुप्समानाः स्वनृपति-परचक्र-पीडिता मनुजाः।

३.१५ स्वनृपति-चरितं कर्म *न[K.च] *पुरा कृतं[K.पराकृतं, Kऽस् त्र्. पुराकृतं] प्रबुवन्त्य् अन्ये॥

३.१६ गर्भेष्व् अपि निष्पन्ना वारिमुचो न प्रभूत-वारिमुचः।

३.१६ सरितो यान्ति तनुत्वं क्व चित् क्वचिज् जायते सस्यम्॥

३.१७ दण्डे नरेन्द्र-मृत्युर् व्याधि-भयं स्यात् *कबन्ध-संस्थाने[K.कवन्धसंस्थाने]।

३.१७ ध्वाङ्क्षे च तस्कर-भयं दुर्भिक्षं कीलके -अर्कस्थे॥

३.१८ राज-उपकरण-रूपैश् छत्र-ध्वज-चामर-आदिभिर् विद्धः।

३.१८ राजान्यत्व-कृद् अर्कः स्फुलिङ्ग-धूम-आदिभिर् जनहा॥

३.१९ एको दुर्भिक्ष-करो द्व्याद्याः स्युर् नरपतेर् विनाशाय।

३.१९ सित-रक्त-पीत-कृष्णैस् तैर् विद्धो -अर्को -अनुवर्णघ्नः॥

३.२० *द्वश्यन्ते[K.& ऊ.दृश्यन्ते] च यतस् ते रवि-बिम्बस्य-उत्थिता महा-उत्पाताः।

३.२० आगच्छति लोकानां तेन-एव भयं प्रदेशेन॥

३.२१ ऊर्ध्वकरो दिवस-करस् ताम्रः सेनापतिं विनाशयति।

३.२१ पीतो नरेन्द्र-पुत्रं श्वेतस् तु पुरोहितं हन्ति॥

३.२२ चित्रो -अथ वा-अपि धूम्रो रविरश्मिर् *व्याकुलाम्[K.व्याकुलां] करोत्य् *ऊर्धम्[K.महीम्]।

३.२२ तस्कर-शस्त्र-निपातैर् यदि सलिलं न-आशु पातयति॥

३.२३ ताम्रः कपिलो वा-अर्कः शिशिरे हरि-कुङ्कुम-च्छविश् च मधौ।

३.२३ आपाण्डु-कनक-वर्णो ग्रीष्मे वर्षासु शुक्लश् च॥

३.२४ शरदि कमल-उदर-आभो हेमन्ते रुधिर-सन्निभः शस्तः।

३.२४ प्रावृट्काले स्निग्धः सर्व-ऋतुनिभो -अपि शुभदायी॥

३.२५ रूक्षः श्वेतो विप्रान् रक्त-आभः क्षत्रियान् विनाशयति।

३.२५ पीतो वैश्यान् कृष्णस् ततो अपरान् शुभ-करः स्निग्धः॥

३.२६ ग्रीष्मे रक्तो भयकृद् वर्षास्व् असितः करोत्य् अनावृष्टिम्।

३.२६ हेमन्ते पीतो -अर्कः करोति *न चिरेण[K.अचिरेण] रोग-भयम्॥

३.२७ सुरचाप-पाटित-तनुर् नृपति-विरोध-प्रदः सहस्रांशुः।

३.२७ प्रावृट्काले सद्यः करोति विमल-द्युतिर् वृष्टिम्॥

३.२८ वर्षाकाले वृष्टिं करोति सद्यः शिरीष-पुष्प-आभः।

३.२८ शिखि-पत्र-निभः सलिलं न करोति द्वादश-अब्दानि॥

३.२९ श्यामे -अर्के कीट-भयं भस्म-निभे भयम् उशन्ति परचक्रात्।

३.२९ यस्य-ऋक्षे सच्छिद्रस् तस्य विनाशः क्षितीशस्य॥

३.३० शश-रुधिर-निभे भानौ नभस्-तल-स्थे भवन्ति सङ्ग्रामाः।

३.३० शशि-सदृशे *नृपति-बधः[K.नृपति-वद्धः] क्षिप्रं च-अन्यो नृपो भवति॥

३.३१ क्षुत्-मारकृत् घट-निभः खण्डो *जनहा[K.नृपहा] विदीधितिर् भयदः।

३.३१ तोरण-रूपः पुरहा छत्र-निभो देश-नाशाय॥

३.३२ ध्वज-चाप-निभे युद्धानि भास्करे वेपने च रूक्षे च।

३.३२ कृष्णा रेखा सवितरि यदि हन्ति ततो *नृपं[K.नृपं ततः] सचिवः॥

३.३३ *दिन-करम्[K.दिवसकरम्] *उदय-अस्त-संस्थितम्[K.उदयसंस्थितम्] उल्का-अशनि-विद्युतो यदा हन्युः।

३.३३ नरपति-मरणं विन्द्यात् तदा-अन्यराज-*प्रतिष्ठा[K.प्रतिष्ठां] च॥

३.३४ प्रतिदिवसम् अहिम-किरणः परिवेषी सन्ध्ययोर् द्वयोर् अथ वा।

३.३४ रक्तो -अस्तम् एति रक्त-उदितश् च भूपं करोत्य् अन्यम्॥

३.३५ प्रहरण-सदृशैर् जलदैः स्थगितः सन्ध्या-द्वये -अपि रणकारी।

३.३५ मृग-महिष-विहग-खर-करभ-सदृश-रूपैश् च भयदायी॥

३.३६ दिन-कर-कर-अभितापाद् ऋक्षम् अवाप्नोति सुमहतीम् पीडाम्।

३.३६ भवति तु पश्चात्-शुद्धं कनकम् इव हुताश-परितापात्॥

३.३७ दिवसकृतः प्रतिसूर्यो जलकृद् उदग् दक्षिणे स्थितो -अनिलकृत्।

३.३७ उभयस्थः सलिल-भयं नृपम् उपरि निहन्त्य् अधो जनहा॥

३.३८अ रुधिर-निभो वियत्य् अवनिप-अन्तकरो न चिरात्

३.३८ब् परुष-रजो-अरुणी-कृत-तनुर् यदि वा दिनकृत्।

३.३८च् [K.३.३९अब्] असित-विचित्र-नील-परुषो जन-घात-करः

३.३८द् [K.३.३९च्द्] खग-मृग-भैरव-स्वर-रुतैश् च निशा-द्युमुखे॥

३.३९ [K.३.४०अब्] अमल-वपुर् अवक्र-मण्डलः स्फुट-विपुल-अमल-दीर्घ-दीधितिः।

३.३९ [K.३.४०च्द्] अविकृत-तनु-वर्ण-चिह्न-भृज् जगति करोति शिवं दिवा-करः॥

४ चन्द्रचाराध्यायः।

४.०१ नित्यम् अधःस्थस्य-इन्दोर् भाभिर् भानोः सितं भवत्य् अर्धम्।

४.०१ स्वच्छायया-अन्यद् असितं कुम्भस्य-इव-आतपस्थस्य॥

४.०२ सलिल-मये शशिनि रवेर् दीधितयो मूर्छितास् तमो नैशम्।

४.०२ क्षपयन्ति दर्पण-उदर*निहिता[K.निहता] इव मन्दिरस्य-अन्तः॥

४.०३ त्यजतो -अर्क-तलं शशिनः पश्चाद् अवलम्बते यथा शौक्ल्यम्।

४.०३ दिनकर-वशात् तथा-इन्दोः प्रकाशते -अधः प्रभृत्य् उदयः॥

४.०४ प्रतिदिवसम् एवम् अर्कात् स्थान-विशेषेण शौक्ल्य-परिवृद्धिः।

४.०४ भवति शशिनो -अपराह्णे पश्चाद् भागे घटस्य-इव

४.०५ ऐन्द्रस्य शीत-किरणो मूल-आषाढा-द्वयस्य *च-आयातः[K.वा यातः]।

४.०५ याम्येन *वीज[K.ऊ.बीज]-जलचर-काननहा वह्नि-भयदश् च॥

४.०६ दक्षिण-पार्श्वेन गतः शशी विशाखा-अनुराधयोः पापः।

४.०६ मध्येन तु प्रशस्तः *पितृदेव[K.पित्र्यस्य]-विशाखयोश् च-अपि॥

४.०७ षड् अनागतानि पौष्णाद् द्वादश रौद्राच् च मध्य-योगीनि।

४.०७ ज्येष्ठ-आद्यानि नव-ऋक्षाण्य् उडुपतिना-अतीत्य युज्यन्ते॥

४.०८ उन्नतम् ईषच्-छृङ्गं नौ-संस्थाने विशालता च-उक्ता।

४.०८ नाविक-पीडा तस्मिन् भवति शिवं सर्व-लोकस्य॥

४.०९ अर्द्ध-उन्नते च लाङ्गलम् इति पीडा तद्-उपजीविनां तस्मिन्।

४.०९ प्रीतिश् च निर्निमित्तं मनुजपतीनां सुभिक्षं च॥

४.१० दक्षिण-विषाणम् अर्ध-उन्नतं यदा दुष्ट-लाङ्गल-आख्यं तत्।

४.१० पाण्ड्य-नरेश्वर-निधन-कृद् उद्योग-करं बलानाम् च॥

४.११ सम-शशिनि सुभिक्ष-क्षेम-वृष्टयः प्रथम-दिवस-सदृशाः स्युः।

४.११ दण्डवद् उदिते पीडा गवां नृपश् च-उग्र-दण्डो -अत्र॥

४.१२ कार्मुक-रूपे युद्धानि यत्र तु ज्या ततो जयस् तेषाम्।

४.१२ स्थानं युगम् इति याम्य-उत्तर-आयतं भूमि-कम्पाय॥

४.१३ युगम् एव याम्य-कोट्यां किं चित् तुङ्गं स पार्श्व-शायी-इति

४.१३ विनिहन्ति सार्थवाहान् वृष्टेश् च विनिग्रहं कुर्यात्॥

४.१४ अभ्युच्छ्रायाद् एकं यदि शशिनो -अवाङ्मुखं भवेत्-छृङ्गम्।

४.१४ आवर्जितम् इत्य् असुभिक्ष-कारि तद् गो-धनस्य-अपि॥

४.१५ अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्ड-आख्यम्।

४.१५ अस्मिन् माण्डलिकानां स्थान-त्यागो नरपतीनाम्॥

४.१६ प्रोक्त-स्थान-अभावाद् उदग्-उच्चः क्षेम-वृद्धि-वृष्टि-करः।

४.१६ दक्षिण-तुङ्गश् चन्द्रो दुर्भिक्ष-भयाय निर्दिष्टः॥

४.१७ शृङ्गेण-एकेन-*इन्दुर्[K.इन्दुं] विलीनम् अथ वा-अप्य् अवाङ्मुखं *शृङ्गम्[K.अशृङ्गम्]।

४.१७ सम्पूर्णं च-अभिनवं दृष्ट्वा-एको जीविताद् भ्रश्येत्॥

४.१८ संस्थान-विधिः कथितो रूपाण्य् अस्माद् भवन्ति चन्द्रमसः।

४.१८ स्वल्पो दुर्भिक्ष-करो महान् सुभिक्ष-आवहः प्रोक्तः॥

४.१९ मध्य-तनुर् वज्र-आख्यः क्षुद्-भयदः सम्भ्रमाय राज्ञां च।

४.१९ चन्द्रो मृदङ्ग-रूपः क्षेम-सुभिक्ष-आवहो भवति॥

४.२० ज्ञेयो विशाल-मूर्तिर् नरपति-लक्ष्मी-विवृद्धये चन्द्रः।

४.२० स्थूलः सुभिक्ष-कारी प्रिय-धान्य-करस् तु तनु-मूर्तिः॥

४.२१अ प्रत्यन्तान् कु-नृपांश् च हन्त्य् उडुपतिः शृङ्गे कुजेन-आहते

४.२१ब् शस्त्र-क्षुद्-भयकृद् यमेन शशिजेन-अवृष्टि-दुर्भिक्ष-कृत्।

४.२१च् श्रेष्ठान् हन्ति नृपान् महेन्द्र-गुरुणा शुक्रेण च-अल्पान् नृपान्

४.२१द् शुक्ले याप्यम् इदं फलम् ग्रह-कृतं कृष्णे यथोक्त-आगमम्॥

४.२२अ भिन्नः सितेन मगधान् यवनान् पुलिन्दान्

४.२२ब् नेपाल-भृङ्गि-*मरुकच्छ[Kऽस् त्र्. मरुकुच्च]-सुराष्ट्र-मद्रान्।

४.२२च् पाञ्चाल-कैकय-कुलूतक-पुरुषादान्

४.२२द् हन्याद् उशीनर-जनान् अपि सप्त मासान्॥

४.२३ गान्धार-सौवीरक-सिन्धु-कीरान् धान्यानि शैलान् द्रविड-अधिपांश् च।

४.२३ द्विजांश् च मासान् दश शीतरश्मिः सन्तापयेद् वाक्पतिना विभिन्नः॥

४.२४अ उद्युक्तान् सह वाहनैर् नरपतींस् त्रैगर्तकान् मालवान्

४.२४ब् कौलिन्दान् गण-पुङ्गवान् अथ शिबीन् आयोध्यकान् पार्थिवान्।

४.२४च् हन्यात् कौरव-मत्स्य-शुक्त्य्-अधिपतीन् राजन्य-मुख्यान् अपि

४.२४द् प्रालेयांशुर् असृग्ग्रहे तनुगते षण्मासम् अर्यादया॥

४.२५ यौधेयान् सचिवान् सकौरवान् प्रागीशान् अथ च-अर्जुनायनान्।

४.२५ हन्याद् अर्कज-भिन्न-मण्डलः शीतांशुर् दश-मास-पीडया॥

४.२६ मगधान् मथुरां च पीडयेद् वेणायाश् च तटं शशाङ्कजः।

४.२६ अपरत्र कृतं युगं वदेद् यदि भित्त्वा शशिनं विनिर्गतः॥

४.२७ क्षेम-आरोग्य-सुभिक्ष-विनाशी शीतांशुः शिखिना यदि भिन्नः।

४.२७ कुर्याद् आयुध-जीवि-विनाशं चौराणाम् अधिकेन च पीडाम्॥

४.२८ उल्कया यदा शशी ग्रस्त एव हन्यते।

४.२८ हन्यते तदा नृपो यस्य जन्मनि स्थितः॥

४.२९ भस्म-निभः परुषो -अरुण-मूर्तिः शीत-करः किरणैः परिहीणः।

४.२९ श्याव-तनुः स्फुटितः स्फुरणो वा *क्षुड्-डमर[K.क्षुत्समरा]-आमय-चौर-भयाय॥

४.३० प्रालेय-कुन्द-कुमुद-स्फटिक-अवदातो यन्नाद् इव-अद्रिसुतया परिमृज्य चन्द्रः।

४.३० उच्चैः कृतो निशि भविष्यति मे शिवाय यो दृश्यते स भविता जगतः शिवाय॥

४.३१अब्[K.४.३२अब्]। शुक्ले पक्षे सम्प्रवृद्धे प्रवृद्धिं ब्रह्म-क्षत्रं याति वृद्धिं प्रजाश् च।

४.३१च्द्[K.४.३२च्द्]। हीने हानिस् तुल्यता तुल्यतायां कृष्णे सर्वे तत्फलं व्यत्ययेन॥

४.३२अब्[K.४.३१अब्]। यदि कुमुद-मृणाल-हार-गौरस् तिथि-नियमात् क्षयम् एति वर्द्धते वा।

४.३२च्द्[K.४.३१च्द्]। अविकृत-गति-मण्डल-अंशु-योगी भवति नृणां विजयाय शीतरश्मिः॥

५ राहुचाराध्यायः

५.०१ अमृत-आस्वाद-विशेषाच् च्छिन्नम् अपि शिरः किल-असुरस्य-इदम्।

५.०१ प्राणैर् अपरित्यक्तं ग्रहतां यातं वदन्त्य् एके॥

५.०२ इन्दु-अर्क-मण्डल-आकृतिर् असितत्वात् किल न दृश्यते गगने।

५.०२ अन्यत्र पर्व-कालाद् वर-प्रदानात् कमलयोनेः॥

५.०३ मुख-पुच्छ-विभक्त-अङ्गं भुजङ्गम् आकारम् उपदिशन्त्य् अन्ये।

५.०३ कथयन्त्य् अमूर्तम् अपरे तमो-मयं सैंहिकेय-आख्याख्यम्॥

५.०४ यदि मूर्तो भविचारी शिरो -अथ वा भवति मण्डली राहुः।

५.०४ भगण-अर्धेन-*अन्तरितौ[K.अन्तरितो] गृह्णाति कथं नियत-चारः॥

५.०५ अनियत-चारः खलु चेद् उपलब्धिः संख्यया कथं तस्य।

५.०५ पुच्छ-आनन-अभिधानो -अन्तरेण कस्मान् न गृह्णाति॥

५.०६ अथ तु भुजगेन्द्र-रूपः पुच्छेन मुखेन वा स गृह्णाति।

५.०६ मुख-पुच्छ-अन्तर-संस्थं स्थगयति कस्मान् न भगण-अर्धम्॥

५.०७ राहु-द्वयं यदि स्याद् ग्रस्ते -अस्तमिते -अथ वा-उदिते चन्द्रे।

५.०७ तत्समगतिना-अन्येन ग्रस्तः सूर्यो -अपि दृश्यते॥

५.०८ भू-च्छायां स्व-ग्रहणे भास्करम् अर्क-ग्रहे प्रविशति-इन्दुः।

५.०८ प्रग्रहणम् अतः पश्चान् न-इन्दोर् भानोश् च पूर्व-अर्धात्॥

५.०९ वृक्षस्य स्वच्छाया यथा-*एकपार्श्वे[K.एकपार्श्वेन] भवति *दीर्घचया[K.दीर्घा च]।

५.०९ निशि निशि तद्वद् भूमेर् आवरण-वशाद् दिनेशस्य॥

५.१० सूर्यात् सप्तम-राशौ यदि च-उदग्-दक्षिणेन न-अतिगतः।

५.१० चन्द्रः पूर्व-अभिमुखश् छायाम् और्वीम् तदा विशति॥

५.११ चन्द्रो -अधःस्थः स्थगयति रविम् अम्बुदवत् समागतः पश्चात्।

५.११ प्रतिदेशम् अतश् चित्रं दृष्टि-वशाद् भास्कर-ग्रहणम्॥

५.१२ आवरणं महद् इन्दोः कुण्ठ-विषाणस् ततो -अर्ध-संच्छन्नः।

५.१२ स्वल्पम् रवेर् यतो -अतस् तीक्ष्ण-विषाणो रविर् भवति॥

५.१३ एवम् उपराग-कारणम् उक्तम् इदं दिव्य-दृग्भिर् आचार्यैः।

५.१३ राहुर् अकारणम् अस्मिन्न् इत्य् उक्तः शास्त्र-सद्भावः॥

५.१४ यो -असौ-असुरो राहुस् तस्य वरो ब्रह्मणा -अयम् आज्ञप्तः।

५.१४ आप्यायनम् उपरागे दत्त-हुतांशेन ते भविता॥

५.१५ तस्मिन् काले सान्निध्यम् अस्य तेन-उपचर्यते राहुः।

५.१५ याम्योत्तरा शशिगतिर् गणिते -अप्य् उपचर्यते तेन॥

५.१६ न कथं चिद् अपि निमित्तैर् ग्रहणं विज्ञायते निमित्तानि।

५.१६ अन्यस्मिन्न् अपि काले भवन्त्य् अथ-उत्पात-रूपाणि॥

५.१७ पञ्चग्रह-संयोगान् न किल ग्रहणस्य सम्भवो भवति।

५.१७ तैलं च जले -अष्टम्यां न विचिन्त्यम् इदं विपश्चिद्भिः॥

५.१८ अवनत्या -अर्के ग्रासो दिग्-ज्ञेया वलनया-अवनत्या च।

५.१८ तिथ्य्-अवसानाद् वेला करणे कथितानि तानि मया॥

५.१९ षण्मास-उत्तर-वृद्ध्या पर्वेशाः सप्त देवताः क्रमशः।

५.१९ ब्रह्म-शशि-इन्द्र-कुबेरा वरुण-अग्नि-यमाश् च विज्ञेयाः॥

५.२० ब्राह्मे द्विज-पशु-*वृद्धिः क्षेम-आरोग्याणि[K.वृद्धिक्षेमारोग्याणि] सस्य-सम्पत्-च।

५.२० तद्वत् सौम्ये तस्मिन् पीडा विदुषाम् अवृष्टिश् च॥

५.२१ ऐन्द्रे भूप-विरोधः शारद-सस्य-क्षयो न च क्षेमम्।

५.२१ कौबेरे -अर्थ-पतीनाम् अर्थ-विनाशः सुभिक्षं च॥

५.२२ वारुणम् अवनीश-अशुभम् अन्येषां क्षेम-सस्य-वृद्धि-करम्।

५.२२ आग्नेयं मित्र-आख्यं सस्य-आरोग्य-अभय-अम्बु-करम्॥

५.२३ याम्यं करोत्य् अवृष्टिं दुर्भिक्षं संक्षयं च सस्यानाम्।

५.२३ यद् अतः परं तद् अशुभं क्षुत्-मार-अवृष्टिदं पर्व॥

५.२४ वेलाहीने पर्वणि गर्भ-विपत्तिश् च शस्त्र-कोपश् च।

५.२४ अतिवेले कुसुम-फल-क्षयो भयं सस्य-नाशश् च॥

५.२५ हीन-अतिरिक्त-काले फलम् उक्तं पूर्व-शास्त्र-दृष्टत्वात्।

५.२५ स्फुट-गणित-विदः कालः कथञ् चिद् अपि न-अन्यथा भवति॥

५.२६ यद्य् एकस्मिन् मासे ग्रहणं रवि-सोमयोस् तदा क्षितिपाः।

५.२६ स्वबल-क्षोभैः संक्षयम् आयान्त्य् अतिशस्त्र-कोपश् च॥

५.२७ ग्रस्ताव् उदित-अस्तमितौ शारद-धान्य-अवनीश्वर-क्षयदौ।

५.२७ सर्व-ग्रस्तौ दुर्भिक्ष-मरकदौ पाप-सन्दृष्टौ॥

५.२८ अर्ध-उदित-उपरक्तो नैकृतिकान् हन्ति सर्वयज्ञांश् च।

५.२८ अग्र्य्-उपजीवि-गुण-अधिक-विप्र-आश्रमिणो *युगे -अभ्युदितः[K.अयुगाभ्युदितः]॥

५.२९ कर्षक-*पाखण्डि[K.पाषण्डि]-वणिक्-क्षत्रिय-बल-नायकान् *द्वितीयांशे[K.द्वितीये -अंशे]।

५.२९ कारुक-शूद्र-म्लेच्छान् ख-तृतीयाम्शे समन्त्रिजनान्॥

५.३० मध्य-अह्ने नरपति-मध्यदेशहा शोभनश् च धान्य-अर्घः।

५.३० तृणभुग्-अमात्य-अन्तःपुर-वैश्यघ्नः पञ्चमे खांशे।

५.३१ स्त्री-शूद्रान् षष्ठे -अंशे दस्यु-प्रत्यन्तहा-अस्तमय-काले।

५.३१ यस्मिन् खांशे मोक्षस् तत्-प्रोक्तानां शिवं भवति॥

५.३२ द्विज-नृपतीन् उदगयने विट्-शूद्रान् दक्षिणायने हन्ति।

५.३२ राहुर् उदग्-आदिदृष्टः प्रदक्षिणं हन्ति विप्र-आदीन्॥

५.३३ म्लेच्छान् विदिक्स्थितो यायिनश् च हन्याद् धुताश-सक्तांश् च।

५.३३ सलिल-चर-दन्ति-घाती याम्येन-उदग् गवाम् अशुभः॥

५.३४ पूर्वेण सलिल-पूर्णां करोति वसुधां समागतो दैत्यः।

५.३४ पश्चात् कर्षक-सेवक-बीज-विनाशाय निर्दिष्टः॥

५.३५ पाञ्चाल-कलिङ्ग-शूरसेनाः काम्बोज-उड्र-किरात-शस्त्र-वार्त्ताः।

५.३५ जीवन्ति च ये हुताश-वृत्त्या ते पीडाम् उपयान्ति मेष-संस्थे॥

५.३६ गोपाः पशवो -अथ गोमिनो मनुजा ये च महत्त्वम् आगताः।

५.३६ पीडाम् उपयान्ति भास्करे ग्रस्ते शीत-करे -अथ वा वृषे॥

५.३७ मिथुने प्रवर-अङ्गना नृपा नृप-मात्रा बलिनः कला-विदः।

५.३७ यमुना-तटजाः सबाह्लिका मत्स्याः सुह्म-जनैः समन्विताः॥
५.३८ आभीरान्-शबरान् सपह्लवान् मल्लान् मत्स्य-कुरून्ञ् छकान् अपि।

५.३८ पाञ्चालान् विकलांश् च पीडयत्य् अन्नं च-अपि निहन्ति कर्कटे॥

५.३९ सिंहे पुलिन्द-गण-मेकल-सत्त्व-युक्तान् राज-उपमान् नरपतीन् वन-गोचरांश् च।

५.३९ षष्ठे तु सस्य-कवि-लेखक-गेय-सक्तान् हन्त्य् अश्मक-त्रिपुर-शालि-युतांश् च देशान्॥

५.४० तुलाधरे -अवन्त्य्-अपरान्त्य-साधून् वणिग्-दशार्णान् *मरुकच्छपांश्[K.भरुकच्छपांश्] च।

५.४० अलिन्य् अथ-उदुम्बर-मद्र-चोलान् द्रुमान् सयौधेय-विष-आयुधीयान्॥

५.४१ धन्विन्य् अमात्य-वर-वाजि-विदेह-मल्लान् पाञ्चाल-वैद्य-वणिजो विषम-आयुधज्ञान्।

५.४१ हन्यान् मृगे तु झष-मन्त्रि-कुलानि नीचान् मन्त्र-औषधीषु कुशलान् स्थविर-आयुधीयान्॥

५.४२ कुम्भे -अन्तर्गिरिजान् सपश्चिम-जनान् भार-उद्वहांस् तस्करान् आभीरान् दरद-आर्य-सिंह-पुरकान् हन्यात् तथा बर्बरान्।(छेच्केद्)

५.४२ मीने सागरकूल-सागर-जल-द्रव्याणि *वन्यान्[K.मान्यान्] जनान् प्राज्ञान् वार्युपजीविनश् च भफलं कूर्म-उपदेशाद् वदेत्॥

५.४३ सव्य-अपसव्य-लेह-ग्रसन-निरोध-अवमर्दन-आरोहाः।

५.४३ आघ्रातं मध्यतमस् तमो -अन्त्य इति ते दश ग्रासाः॥

५.४४ सव्यगते तमसि जगज्-जलप्लुतं भवति मुदितम् अभयं च।

५.४४ अपसव्ये नरपति-तस्कर-अवमर्दैः प्रजानाशः॥

५.४५ *जिह्व-उपलेढि[K.जिह्वेवलेढि] परितस् तिमिर-नुदो मण्डलं यदि स लेहः।

५.४५ प्रमुदित-समस्त-भूता प्रभूत-तोया च तत्र मही॥

५.४६ ग्रसनम् इति यदा त्र्यंशः पादो वा गृह्यते -अथ वा-अप्य् अर्धम्।

५.४६ स्फीत-नृप-वित्त-हानिः पीडा च स्फीत-देशानाम्॥

५.४७ पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस् तिष्ठेत्।

५.४७ स निरोधो विज्ञेयः प्रमोद-कृत् सर्वभूतानाम्॥

५.४८ अवमर्दनम् इति निःशेषम् एव सञ्छाद्य यदि चिरं तिष्ठेत्।

५.४८ हन्यात् प्रधान-भूपान् *प्रधान-देशांश्[K.प्रधानदेशान् प्रधानभूपांश्] च तिमिर-मयः॥

५.४९ वृत्ते ग्रहे यदि तमस् तत्क्षणम् आवृत्य दृश्यते भूयः।

५.४९ आरोहणम् इत्य् अन्योन्य-मर्दनैर् भय-करं राज्ञाम्॥

५.५० दर्पण इव-एकदेशे *सबाष्प[K.सवाष्प]-निःश्वास-मारुत-उपहतः।

५.५० दृश्येत-आघ्रातं तत् सुवृष्टि-वृद्ध्य्-आवहं जगतः॥

५.५१ मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः

५.५१ तन्-मध्यदेश-नाशं करोति कुक्ष्य्-आमय-भयं च॥

५.५२ पर्यन्तेषु-अतिबहुलं स्वल्पं मध्ये तमस् तमोन्त्य-आख्ये।

५.५२ सस्यानाम् ईति-भयं भयम् अस्मिंस् तस्कराणां च॥

५.५३ श्वेते क्षेम-सुभिक्षं ब्राह्मण-पीडां च निर्दिशेद् राहौ।

५.५३ अग्नि-भयम् अनल-वर्णे पीडा च हुताशवृत्तीनाम्॥

५.५४ हरिते रोग-*उल्बणता[K.उल्वणता] सस्यानाम् ईतिभिश् च विध्वंसः।

५.५४ कपिले शीघ्रग-सत्त्व-म्लेच्छ-ध्वंसो -अथ दुर्भिक्षम्॥

५.५५ अरुण-किरण-अनुरूपे दुर्भिक्ष-अवृष्टयो विहग-पीडा।

५.५५ आधूम्रे क्षेम-सुभिक्षम् आदिशेत् मन्दवृष्टिं च॥

५.५६ कापोत-अरुण-कपिल-श्यावाभे क्षुद्-भयं विनिर्देश्यम्।

५.५६ कापोतः शूद्राणां व्याधि-करः कृष्ण-वर्णश् च॥

५.५७ विमलक-मणि-पीत-आभो वैश्य-ध्वंसी भवेत् सुभिक्षाय।

५.५७ स-अर्चिष्मत्य् अग्नि-भयं गैरिक-रूपे तु युद्धानि॥

५.५८ दूर्वाकाण्ड-श्यामे हारिद्रे वा-अपि निर्दिशेत् मरकम्।

५.५८ अशनि-भय-सम्प्रदायी *पाटल[K.पाटलि]-कुसुम-उपमो राहुः॥

५.५९ पांशु-विलोहित-रूपः क्षत्र-ध्वंसाय भवति वृष्टेश् च।

५.५९ बाल-रवि-कमल-सुरचाप-रूप-भृत् शस्त्र-कोपाय॥

५.६० पश्यन् ग्रस्तं सौम्यो घृत-मधु-तैल-क्षयाय राज्ञां च।

५.६० भौमः समर-विमर्दं शिखि-कोपं तस्कर-भयं च॥

५.६१ शुक्रः सस्य-विमर्दं नाना-क्लेशांश् च जनयति धरित्र्याम्।

५.६१ रविजः करोत्य् अवृष्टिं दुर्भिक्षं तस्कर-भयं च॥

५.६२ यद् अशुभम् अवलोकनाभिर् उक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा।

५.६२ सुरपतिगुरुणा-अवलोकिते तत्-शमम् उपयाति जलैर् इव-अग्निर् इद्धः॥

५.६३ ग्रस्ते क्रमान् निमित्तैः पुनर् ग्रहो मास-षट्क-परिवृद्ध्या।

५.६३ पवन-उल्कापात-रजः क्षितिकम्प-तमो-अशनि-निपातैः॥

५.६४ आवन्तिका जनपदाः कावेरी-नर्मदा-तट-आश्रयिणः।

५.६४ दृप्ताश् च मनुजपतयः पीड्यन्ते क्षितिसुते ग्रस्ते॥

५.६५ अन्तर्वेदीं सरयूं नेपालं पूर्वसागरं शोणम्।

५.६५ स्त्री-नृप-योध-कुमारान् सह विद्वद्भिर् बुधो हन्ति॥

५.६६ ग्रहण-उपगते जीवे विद्वन्-नृप-मन्त्रि-गज-हय-ध्वंसः।

५.६६ सिन्धु-तट-वासिनाम् अप्य् उदग्-दिशं संश्रितानां च॥

५.६७ भृगुतनये राहुगते *दाशेरक[K.दसेरकाः]कैकयाः सयौधेयाः।

५.६७ आर्यावर्त्ताः शिबयः स्त्री-सचिव-गणाश् च पीड्यन्ते॥

५.६८ सौरे मरु-भव-पुष्कर*सौराष्ट्रिक[K.सौराष्ट्रा]-धातवो -अर्बुद-अन्त्यजनाः।

५.६८ गोमन्त-पारियात्र-आश्रिताश्[Kऽस् त्र्. गोमन्तः पारियात्रा] च नाशं व्रजन्त्य् आशु॥

५.६९अ कार्त्तिक्याम् अनल-उपजीवि-मगधान् प्राच्य-अधिपान् कोशलान्

५.६९ब् कल्माषान् अथ शूरसेन-सहितान् काशीश् च सन्तापयेत्।

५.६९च् *हन्याद्[K.हन्याद् च] आशु कलिङ्गदेश-नृपतिं स-अमात्य-भृत्यं तमो

५.६९द् दृष्टं क्षत्रिय-तापदं जनयति क्षेमं सुभिक्ष-अन्वितम्॥

५.७० काश्मीरकान् कौशलकान् सपुण्ड्रान् मृगांश् च हन्याद् अपरान्तकांश् च।

५.७० ये सोमपास् तांश् च निहन्त्य् सौम्ये सुवृष्टि-कृत् क्षेम-सुभिक्ष-कृत्-च॥

५.७१ पौषे द्विज-क्षत्र-जन-उपरोधः ससैन्धव-आख्याः कुकुरा विदेहाः।

५.७१ ध्वंसं व्रजन्त्य् अत्र च मन्द-वृष्टिं भयं च विन्द्याद् असुभिक्ष-युतम्॥

५.७२अ माघे तु मातृ-पितृ-भक्त-वसिष्ठ-गोत्रान्

५.७२ब् स्वाध्याय-धर्म-निरतान् करिणस् तुरङ्गान्।

५.७२च् वङ्ग-अङ्ग-काशि-मनुजांश् च दुनोति राहुर्

५.७२द् वृष्टिं च कर्षकजन-*अभिमतां[K.अनुमतां] करोति॥

५.७३ पीडा-करं फाल्गुनमासि पर्व *वङ्ग-अश्मक-अवन्तिक[K.वन्तक]-मेकलानाम्।

५.७३ *नृत्यज्ञ[K.नृत्तज्ञ]-सस्य-प्रवर-अङ्गनानां धनुष्कर-क्षत्र-तपस्विनां च॥

५.७४अ *चैत्र्यां[K.चैत्रे] तु चित्रकर-लेख-गेय-सक्तान्

५.७४ब् रूपोपजीवि-निगमज्ञ-हिरण्य-पण्यान्।

५.७४च् पौण्ड्र-औड्र-कैकय-जनान् अथ च-अश्मकांश् च

५.७४द् तापः स्पृशत्य् अमरपो -अत्र विचित्र-वर्षी॥

५.७५ वैशाख-*मासे[K.मासि] ग्रहणे विनाशम् आयान्ति कर्पास-तिलाः स-मुद्गाः।

५.७५ इक्ष्वाकु-यौधेय-शकाः कलिङ्गाः *सोप-प्लवाः[K.सोपद्रवाः] किन्तु सुभिक्षम् अस्मिन्॥

५.७६ ज्येष्ठे[K.ज्यैष्ठे] नरेन्द्र-द्विज-राजपत्न्यः सस्यानि वृष्टिश् च महागणाश् च।

५.७६ प्रध्वंसम् आयान्ति नराश् च सौम्याः साल्वैः समेताश् च निषाद-सङ्घाः॥

५.७७ आषाढ-पर्वण्य् उदपान-वप्र-नदी-प्रवाहान् फल-मूल-वार्त्तान्।

५.७७ गान्धार-काश्मीर-पुलिन्द-चीनान् हतान् वदेद् मण्डल-वर्षम् अस्मिन्॥

५.७८अ काश्मीरान् सपुलिन्द-चीन-यवनान् हन्यात् कुरुक्षेत्रजान्

५.७८ब् गान्धारान् अपि मध्यदेश-सहितान् वृष्टो ग्रहः श्रावणे।

५.७८च् काम्बोज-एकशफांश् च शारदम् अपि त्यक्त्वा यथोक्तान् इमान्

५.७८द् अन्यत्र प्रचुर-अन्न-हृष्ट-मनुजैर् धात्रीं करोत्य् आवृताम्॥

५.७९अ कलिङ्ग-वङ्गान् मगधान् सुराष्ट्रान्

५.७९ब् म्लेच्छान् सुवीरान् *दरद-अश्मकांश्[K.दरदाञ् छकांश्] च।

५.७९च् स्त्रीणां च गर्भान् असुरो निहन्ति

५.७९द् सुभिक्ष-कृद् भाद्रपदे -अभ्युपेतः॥

५.८०अ काम्बोज-चीन-यवनान् सह शल्यहृद्भिर्

५.८०ब् *बाह्लीक[K.वाल्हीक]-सिन्धुतट-वासिजनांश् च हन्यात्।

५.८०च् *आनर्त्त[K.आनर्त]-पौण्ड्र-भिषजश् च तथा किरातान्

५.८०द् दृष्टो -असुरो -अश्वयुजि भूरि-सुभिक्ष-कृच् च॥

५.८१ हनु-कुक्षि-पायु-भेदा द्विर् द्विः सञ्छर्दनं च जरणं च।

५.८१ मध्य-अन्तयोश् च विदरणम् इति दश शशि-सूर्ययोर् मोक्षाः॥

५.८२ आग्नेय्याम् अपगमनं दक्षिण-हनुभेद-संज्ञितं शशिनः।

५.८२ सस्य-विमर्दो मुख-रुग् नृप-पीडा स्यात् सुवृष्टिश् च॥

५.८३ पूर्वोत्तरेण वामो हनु-भेदो नृप-कुमार-भयदायी।

५.८३ मुखरोगं शस्त्र-भयं तस्मिन् विन्द्यात् सुभिक्षं च॥

५.८४ दक्षिण-कुक्षि-विभेदो दक्षिण-पार्श्वेन यदि भवेन् मोक्षः।

५.८४ पीडा नृप-पुत्राणाम् अभियोज्या दक्षिणा रिपवः॥

५.८५ वामस् तु कुक्षि-भेदो यद्य् उत्तरमार्ग-संस्थितो राहुः।

५.८५ स्त्रीणां गर्भ-विपत्तिः सस्यानि च तत्र मध्यानि॥

५.८६ नैरृत-वायव्य-स्थौ दक्षिण-वामौ तु पायु-भेदौ द्वौ।

५.८६ गुह्य-रुग् अल्पा वृष्टिर् द्वयोस् तु राज्ञी-क्षयो वामे॥

५.८७ पूर्वेण प्रग्रहणं कृत्वा प्राग् एव च-अपसर्पेत ।

५.८७ सञ्छर्दनम् इति तत् क्षेम-सस्य-हार्दिप्रदं जगतः॥

५.८८ प्राक् प्रग्रहणं यस्मिन् पश्चाद् अपसर्पणं तु तज् जरणम्।

५.८८ क्षुत्-शस्त्र-भय-*उद्विग्ना न[K.उद्विग्नाः क] शरणम् उपयान्ति तत्र जनाः॥

५.८९ मध्ये यदि प्रकाशः प्रथमं तन् मध्य-विदरणं नाम।

५.८९ अन्तःकोप-करं स्यात् सुभिक्षदं न-अतिवृष्टि-करम्॥

५.९० पर्यन्तेषु विमलता बहुलं मध्ये तमो *-अन्त्य[K.अन्त]-दरण-आख्यः।

५.९० मध्याख्यदेश-नाशः शारद-सस्य-क्षयश् च-अस्मिन्॥

५.९१ एते सर्वे मोक्षा वक्तव्या भास्करे -अपि किन्त्व् अत्र।

५.९१ पूर्वा दिक् शशिनि यथा तथा रवौ पश्चिमा कल्प्या॥

५.९२ मुक्ते सप्ताहान्तः पांशु-निपातो -अन्न-संक्षयं कुरुते।

५.९२ नीहारो रोग-भयं भूकम्पः प्रवर-नृप-मृत्युम्॥

५.९३ उल्का मन्त्रि-विनाशं नानावर्णा घनाश् च भयम् अतुलम्।

५.९३ स्तनितं गर्भ-विनाशं विद्युन्-नृप-दंष्ट्रि-परिपीडाम्॥

५.९४ परिवेषो रुक्-पीडां दिग्दाहो नृप-भयं च स-अग्नि-भयं।

५.९४ रूक्षो वायुः प्रबलश् चौरसमुत्थं भयं धत्ते॥

५.९५ निर्घातः सुरचापं दण्डश् च क्षुद्-भयं स-परचक्रम्।

५.९५ *ग्रहयुद्धे[K.ग्रहयुद्धं] नृप-युद्धं केतुश् च तद् एव सन्दृष्टः॥

५.९६ अविकृतसलिल*निपातैः[K.निपाते] सप्ताह-अन्तः सुभिक्षम् आदेश्यम्।

५.९६ यच् च-अशुभं ग्रहणजं तत् सर्वं नाशन् उपयाति॥

५.९७ सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहो -अर्कस्य।

५.९७ तत्र-अनयः प्रजानां दम्पत्योर् वैरम् अन्योन्यम्॥

५.९८ अर्कग्रहात् तु शशिनो ग्रहणं यदि दृश्यते ततो विप्राः।

५.९८ नैक-क्रतु-फल-भाजो भवन्ति मुदिताः प्रजाश् च-एव॥

६ भौमचाराध्यायः

६.०१ यद्य् उदय-ऋक्षाद् वक्रं करोति नवम-अष्ट-सप्तम-ऋक्षेषु।

६.०१ तद्*वक्त्राम्[K.वक्रम् ऊ.वक्त्रम्] उष्णम् उदये पीडा-करम् अग्निवार्त्तानाम्॥

६.०२ द्वादश-दशम-एकादश-नक्षत्राद् वक्रिते कुजे -अशु-मुखम्।

६.०२ दूषयति रसान् उदये करोति रोगान् अवृष्टिं च॥

६.०३ व्यालं त्रयोदश-ऋक्षाच् चतुर्दशाद् वा विपच्यते -अस्तमये।

६.०३ दंष्ट्रि-व्याल-मृगेभ्यः करोति पीडां सुभिक्षं च॥

६.०४ रुधिर-आननम् इति वक्त्रं पञ्चदशात् षोडशाच् च विनिवृत्ते।

६.०४ तत्-कालं मुख-रोगं स-भयं च सुभिक्षम् आवहति॥

६.०५ असि-मुशलं सप्तदशाद् अष्टादशतो -अपि वा तद् अनुवक्रे।

६.०५ दस्यु-गणेभ्यः पीदां करोत्य् अवृष्टिं स-शस्त्र-भयाम्॥

६.०६ भाग्य-आर्यमा-उदिते यदि निवर्तते वैश्व-दैवते भौमः।

६.०६ प्राजापत्ये -अस्तमितस् त्रीन् अपि लोकान् निपीडयति॥

६.०७ श्रवण-उदितस्य वक्रं पुष्ये मूर्ध-अभिषिक्त-पीडा-कृत्।

६.०७ यस्मिन्न् ऋक्षे -अभ्युदितस् तद्-दिग्-व्यूहान् जनान् हन्ति॥

६.०८ मध्येन यदि मघानां गत-अगतं लोहितः करोति ततः।

६.०८ पाण्ड्यो नृपो विनश्यति शस्त्र-उद्योगाद् भयम् अवृष्टिं॥

६.०९ भित्त्वा *मघा[K.मघां] विशाखां भिन्दन् भौमः करोति दुर्भिक्षम्।

६.०९ मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति॥

६.१० दक्षिणतो रोहिण्यास् चरन् महीजो -अर्घ-वृष्टि-निग्रह-कृत्।

६.१० धूमायन् स-शिखो वा विनिहन्यात् पारियात्र-स्थान्॥

६.११ प्राजापत्ये श्रवणे मूले *त्रिषु च-उत्तरेषु[K.तिसृषूत्तरासु] शाक्रे च।

६.११ विचरन् घन-निवहानाम् उपघात-करः क्षमा-तनयः॥

६.१२ चार-उदयाः प्रशस्ताः श्रवण-मघा-आदित्य*हस्त-मूलेषु[K.मूलहस्तेषु]।

६.१२ एकपदा-अश्वि-विशाखा-प्राजापत्येषु च कुजस्य॥

६.१३अ विपुल-विमल-मूर्तिः किंशुक-अशोक-वर्णः

६.१३ब् स्फुट-रुचिर-मयूखस् तप्त-ताम्र-प्रभा-आभः।

६.१३च् विचरति यदि मार्गं च-उत्तरं मेदिनीजः

६.१३द् शुभ-कृद् अवनि-पानां हार्दिदश् च प्रजानाम्॥

७ बुधचाराध्यायः

७.०१ न-उत्पात-परित्यक्तः कदा चिद् अपि चन्द्रजो व्रजत्य् उदयम्।

७.०१ जल-दहन-पवन-भय-कृद् धान्य-अर्घ-क्षय-विवृद्धौ वा॥

७.०२ विचरन् श्रवण-धनिष्ठा-प्रजापत्य[U - प्राजापत्य]-इन्दु*वैश्वदेवानि[K.विश्वदैवानि]।

७.०२ मृद्नन् हिम-कर-तनयः करोत्य् अवृष्टिं स-रोग-भयाम्॥

७.०३ रौद्र-आदीनि मघा-अन्तान्य् उपाश्रिते चन्द्रजे प्रजापीडा।

७.०३ शस्त्र-निपात-क्षुद्-भय-रोग-अनावृष्टि-सन्तापैः॥

७.०४ हस्त-आदीनि *चरन्[K.विचरन्] षड्ऋक्षाण्य् उपपीडयन् गवाम् अशुभः।

७.०४ स्नेह-रस-अर्घ-विवृद्धिं करोति च-उर्वीं प्रभूत-अन्नाम्॥

७.०५ आर्यम्णं हौतभुजं भद्रपदाम् उत्त्ररां यमेशं च।

७.०५ चन्द्रस्य सुतो निघ्नन् प्राण-भृतां धातु-संक्षय-कृत्॥

७.०६ आश्विन-वारुण-मूलान्य् उपमृद्नन् रेवतीं च चन्द्र-सुतः।

७.०६ पण्य-भिषग्-नौजीविक-सलिलज-तुरग-उपघात-करः॥

७.०७ पूर्व-आद्य्-ऋक्ष-त्रितयाद् एकम् अपि-इन्दोः सुतो -अभिमृद्नीयात्।

७.०७ क्षुत्-शस्त्र-तस्कर-आमय-भय-प्रदायी चरन् जगतः॥

७.०८ प्राकृत-विमिश्र-संक्षिप्त-तीक्ष्ण-योगान्त-घोर-पाप-आख्याः।

७.०८ सप्त पराशर-तन्त्रे नक्षत्रैः कीर्तिता गतयः॥
७.०९ प्राकृत-संज्ञा वायव्य-याम्य-पैतामहानि बहुलाश् च।

७.०९ मिश्रा गतिः प्रदिष्टा शशि-शिव-पितृ-*भुजगदेवानि[K.भुजगदैवानि]।

७.१० संक्षिप्तायां पुष्यः पुनर्वसुः फल्गुनी-द्वयं च-इति।

७.१० तीक्ष्णायां भद्रपदा-द्वयं स-शाक्र-अश्वयुक् पौष्णम्॥

७.११ योगान्तिका-इति मूलं द्वे च-आषाढे गतिः सुतस्य-इन्दोः॥

७.११ घोरा श्रवणस् त्वाष्ट्रं *वसुदैवं[K.वसुदेवं] वारुणं च-एव॥

७.१२ पाप-आख्या सावित्रं मैत्रं शक्राग्नि-दैवतं च-इति।

७.१२ उदय-प्रवास-दिवसैः स एव गति-लक्षणं प्राह॥

७.१३ चत्वारिंशत्(४०) त्रिंशद्(३०) द्विसमेता विंशतिर्(२२) द्विनवकं(१८) च।

७.१३ नव(९) मास-अर्धं(१५) दश च-एकसंयुताः(११) प्राकृताद्यानाम्॥

७.१४ प्राकृत-गत्याम् आरोग्य-वृष्टि-सस्य-प्रवृद्धयः क्षेमम्।

७.१४ संक्षिप्त-मिश्रयोर् मिश्रम् एतद् अन्यासु विपरीतम्॥

७.१५ ऋज्वी-अतिवक्रा-वक्रा विकला च मतेन देवलस्य-एताः।

७.१५ पञ्च-चतुर्-द्व्य्-एकाहा ऋज्व्यादीनां षडभ्यस्ताः॥

७.१६ ऋज्वी हिता प्रजानाम् *अतिवक्रा -अर्धं[K.अतिवक्रार्थं] गतिर् विनाशयति।

७.१६ शस्त्र-भयदा च वक्रा विकला भय-रोग-संजननी॥

७.१७ पौष-आषाढ-श्रावण-वैशाखेष्व् इन्दुजः स-माघेषु।

७.१७ वृष्टो भयाय जगतः शुभ-फल-कृत् प्रोषितस् तेषु॥

७.१८ *कार्तिके[K.कार्त्तिके] -अश्वयुजि वा यदि मासे दृश्यते तनु-भवः शिशिरांशोः।

७.१८ शस्त्र-चौर-हुतभुग्-गद-तोय-क्षुद्-भयानि च तदा विदधाति

७.१९ रुद्धानि सौम्ये *-अस्तगते[K.अस्तमिते] पुराणि यान्य् उद्गते तान्य् उपयान्ति मोक्षम्।

७.१९ अन्ये तु पश्चाद् उदिते वदन्ति लाभः पुराणां भवति तज्ज्ञाः॥

७.२० हेम-कान्तिर् अथ वा शुक-वर्णः सस्यकेन मणिना सदृशो वा।

७.२० स्निग्ध-मूर्तिर् अलघुश् च हिताय व्यत्यये न शुभ-कृत् शशिपुत्रः॥

८ बृहस्पतिचाराध्यायः

८.०१ नक्षत्रेण सह-उदयम् उपगच्छति येन देवपति-मन्त्री।

८.०१ तत्-संज्ञं वक्तव्यं वर्षं मास-क्रमेण-एव॥

८.०२ वर्षाणि कार्त्तिक-आदीन्य् आग्नेयाद् भ-द्वय-अनुयोगीनि।

८.०२ क्रमशस् त्रिभं तु पञ्चमम् उपान्त्यम् अन्त्यं च यद् वर्षम्॥

८.०३ शकट-अनल-उपजीवक-गो-पीडा व्याधि-शस्त्र-कोपश् च।

८.०३ वृद्धिस् तु रक्त-पीतक-कुसुमानां कार्त्तिके वर्षे॥

८.०४ सौम्ये -अब्दे -अनावृष्टिर् मृग-आखु-शलभ-अण्डजैश् च सस्य-वधः।

८.०४ व्याधि-भयं मित्रैर् अपि भूपानां जायते वैरम्॥

८.०५ शुभ-कृज्-जगतः पौषो निवृत्त-वैराः परस्परं क्षितिपाः।

८.०५ द्वि-त्रि-गुणो धान्य-अर्घः पौष्टिक-कर्म-प्रसिद्धिश् च॥

८.०६ पितृपूजा-परिवृद्धिर् माघे हार्दिश् च सर्वभूतानाम्।

८.०६ आरोग्य-वृष्टि-धान्य-अर्घ-सम्पदो मित्र-लाभश् च॥

८.०७ फाल्गुन-वर्षे विन्द्यात् क्व चित् क्व चित् क्षेम-वृष्टि-सस्यानि।

८.०७ दौर्भाग्यं प्रमदानां प्रबलाश् चौरा नृपाश् च-उग्राः॥

८.०८ चैत्रे मन्दा वृष्टिः प्रियम् अन्नं क्षेमम् अवनिपा मृदवः।

८.०८ वृद्धिश् च कोश-धान्यस्य भवति पीडा च रूपवताम्॥

८.०९ वैशाखे *धर्म-रता[K.धर्मपरा] विगत-भयाः प्रमुदिताः प्रजाः सनृपाः।

८.०९ यज्ञ-क्रिया-प्रावृत्तिर् निष्पत्तिः सर्व-सस्यानाम्॥

८.१० ज्यैष्ठे जाति-कुल-धन-श्रेणी-श्रेष्ठा नृपाः सधर्मज्ञाः।

८.१० पीड्यन्ते धान्यानि च हित्वा कङ्गुं शमीजातिम्॥

८.११ आषाढे जायन्ते सस्यानि क्व चिद् अवृष्टिर् अन्यत्र।

८.११ योगक्षेमं मध्यं व्यग्राश् च भवन्ति भूपालाः॥

८.१२ श्रावण-वर्षे क्षेमं सम्यक् सस्यानि पाकम् उपयान्ति।

८.१२ क्षुद्रा ये *पाखण्डाः[K.पाषण्डाः] पीड्यन्ते ये च तद्-भक्ताः॥

८.१३ भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्वसस्यं च।

८.१३ न भवत्य् अपरं सस्यं क्व चित् सुभिक्षं क्वचिच् च भयम्॥

८.१४ आश्वयुजे -अब्दे -अजस्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम्।

८.१४ प्राण-चयः प्राण-भृताम् सर्वेषाम् अन्न-बाहुल्यम्॥

८.१५ उदग्-आरोग्य-सुभिक्ष-क्षेम-करो वाक्पतिश् चरन् भानाम्।

८.१५ याम्ये तद्-विपरीतो मध्येन तु मध्य-फल-दायी॥

८.१६ विचरन् भ-द्वयम् इष्टस् तत्-सार्धं वत्सरेण मध्य-फलः।

८.१६ सस्यानां विध्वंसी विचरेद् अधिकं यदि कदा चित्॥

८.१७ अनल-भयम् अनल-वर्णे व्याधिः पीते रण-आगमः श्यामे।

८.१७ हरिते च तस्करेभ्यः पीडा रक्ते तु शस्त्र-भयम्॥

८.१८ धूम-आभे -अनावृष्टिस् त्रिदश-गुरौ नृप-वधो दिवा दृष्टे।

८.१८ विपुले -अमले सुतारे रात्रौ दृष्टे प्रजाः स्वस्थाः॥

८.१९अ रोहिण्यो -अनलभं च वत्सर-तनुर् नाभिस् त्व् अषाढ-द्वयं

८.१९ब् सार्पं हत्-पितृ-दैवतं च कुसुमं शुद्धैः शुभं तैः फलम्।

८.१९च् देहे क्रूर-निपीडिते -अग्न्य्-अनिलजं नाभ्यां भयं क्षुत्-कृतं

८.१९द् पुष्पे मूल-फल-क्षयो -अथ हृदये सस्यस्य नाशो ध्रुवम्॥

८.२०अ गतानि वर्षाणि शकेन्द्र-कालाद्

८.२०ब् धतानि रुद्रैर् गुणयेच् चतुर्भिः।

८.२०च् नव-अष्ट-पञ्च-अष्ट(८५८९)युतानि कृत्वा

८.२०द् विभाजयेच्-शून्य-शरा-गरामैः(३७५०)॥

८.२१अ *लब्धेन[K.फलेन] युक्तं शक-भूपकालं

८.२१ब् संशोध्य षष्ट्या विषयैर् विभज्य।

८.२१च् युगानि नारायण-पूर्वकाणि

८.२१द् लब्धानि शेषाः क्रमशः समाः स्युः॥

८.२२ एकैकम् अब्देषु नव-आहतेषु दत्त्वा पृथग् द्वादशकं क्रमेण।

८.२२ हृत्वा चतुर्भिर् वसुदेवता-आद्यान्य् उडूनि शेषांशक-पूर्वम् अब्दम्॥

८.२३ विष्णुः सुरेज्यो बलभिद् धुताशस् त्वष्ट-उत्तरप्रोष्ठपदा-अधिपश् च।

८.२३ क्रमाद् युगेशाः पितृ-विश्व-*सोम[K.सोमाः]-शक्रानल-आख्य-अश्वि-भगाः प्रदिष्टाः॥

८.२४ संवत्सरो -अग्निः परिवत्सरो -अर्क इदा-आदिकः शीत-मयूख-माली।

८.२४ प्रजापतिश् च-अप्य् अनुवत्सरः स्याद् इद्वत्सरः शैलसुतापतिश् च॥

८.२५ वृष्टिः समाद्ये प्रमुखे द्वितीये प्रभूत-तोया कथिता तृतीये।

८.२५ पश्चाज् जलं मुञ्चति यच् चतुर्थं स्वल्प-उदकं पञ्चमम् अब्दम् उक्तम्॥

८.२६ चत्वारि मुख्यानि युगान्य् अथ-एषां विष्णु-इन्द्र-जीव-अनल-दैवतानि।

८.२६ चत्वारि मध्यानि च मध्यमानि चत्वारि च-अन्त्यान्य् अधमानि

विन्द्यात्॥

८.२७ आद्यं धनिष्टांशम् अभिप्रपन्नो माघे यदा यात्य् उदयं सुरेज्यः।

८.२७ षष्ट्य्-अब्द-पूर्वः प्रभवः स नाम्ना *प्रपद्यते[K.प्रवर्तते] भूत-हितस् तदाब्दः॥

८.२८ क्व चित् त्व् अवृष्टिः पवन-अग्नि-कोपः सन्ति-ईतयः श्लेष्म-कृताश् च रोगाः।

८.२८ संवत्सरे -अस्मिन् प्रभवे प्रवृत्ते न दुःखम् आप्नोति जनस् तथा-अपि॥

८.२९ तस्माद् द्वितीयो विभवः प्रदिष्टः शुक्लस् तृतीयः परतः प्रमोदः।

८.२९ प्रजापतिश् च-इति यथोत्तराणि शस्तानि वर्षाणि फलान्य् *अथ-एषाम्[K.चैषाम्]॥

८.३० निष्पन्न-शालि-इक्षु-यव-आदि-सस्यां भयैर् विमुक्ताम् उपशान्त-वैराम्॥

८.३० संहृष्ट-लोकां कलि-दोष-मुक्तां क्षत्रं तदा शास्ति च भूतधात्रीम्॥

८.३१ आद्यो -अङ्गिराः श्रीमुख-भावसा-आह्वौ *युवा सुधातेति[K.युवाथ धातेति] युगे द्वितीये।

८.३१ वर्षाणि पञ्च-एव यथाक्रमेण त्रीण्य् अत्र शस्तानि समे परे द्वे॥

८.३२ त्रिष्व् *आद्य-वर्षेषु[K.अङ्गिराद्येषु, Kऽस् त्र्. आद्यवर्षेषु] निकाम-वर्षी देवी निरातङ्क-*भयश्[K.भयाश्] च लोकः।

८.३२ अब्द-द्वये -अन्त्ये -अपि समा सुवृष्टिः किन्त्व् अत्र रोगाः समर-आगमश् च॥

८.३३ शाक्रे युगे पूर्वम् अथ-ईश्वर-आख्यं वर्ष द्वितीयं बहुधान्यम् आहुः।

८.३३ प्रमाथिनं विक्रमम् अप्य् *अथ-अन्यद्[K.अतो -अन्यद्] वृषं च विन्द्याद् गुरुचार-योगात्॥

८.३४ आद्यं द्वितीयं च शुभे तु वर्षे कृत-अनुकारं कुरुतः प्रजानाम्।

८.३४ पापः प्रमाथी वृष-विक्रमौ तु सुभिक्षदौ रोग-भय-प्रदौ च॥

८.३५ श्रेष्ठं च चतुर्थस्य युगस्य पूर्वं यच् चित्रभानुं कथयन्ति वर्षम्।

८.३५ मध्यं द्वितीयं तु सुभानु-सञ्ज्ञं रोग-प्रदं मृत्यु-करं *न तं च[K.न तच् च]॥

८.३६ तारणं तद्-अनु भूरि-वारिदं सस्य-वृद्धि-*मुदिताति[K.मुदितं च]-पार्थिवम्।

८.३६ पञ्चमं व्ययम् उशन्ति शोभनं मन्मथ-प्रबलम् उत्सव-आकुलम्॥

८.३७ त्वाष्ट्रे युगे सर्वजिद्-आद्य उक्तः संवत्सरो -अन्यः खलु सर्वधारी।

८.३७ तस्माद् विरोधी विकृतः खरश् च शस्तो द्वितीयो -अत्र भयाय शेषाः॥

८.३८ नन्दनो -अथ विजयो जयस् तथा मन्मथो -अस्य परतश् च दुर्मुखः।

८.३८ कान्तम् अत्र युग आदितस् त्रयं मन्मथः सम-फलो -अधमो -अपरः॥

८.३९ हेमलम्ब इति सप्तमे युगे स्याद् विलम्बि परतो विकारि च।

८.३९ शर्वरीति तद्-अनु प्लवः स्मृतो वत्सरो गुरु-वशेन पञ्चमः॥

८.४०अ *ईति-प्राया[K.इतिप्रायः] प्रचुर-पवना वृष्टिर् अब्दे तु पूर्वे

८.४०ब् मन्दं सस्यं न बहु-सलिलं वत्सरे -अतो द्वितीये।

८.४०च् अत्युद्वेगः प्रचुर-सलिलः स्यात् तृतीयश् चतुर्थो

८.४०द् दुर्भिक्षाय प्लव इति ततः शोभनो भूरि-तोयः॥

८.४१ वैश्वे युगे *शोकहद्[K.शोभकृद्] इत्य् अथ-आद्यः संवत्सरो -अतः शुभकृद् द्वितीयः।

८.४१ क्रोधी तृतीयः परतः क्रमेण विश्वावसुश् च-इति पराभवश् च॥

८.४२ पूर्वा-परौ प्रीति-करौ प्रजानाम् एषां तृतीयो बहु-दोषदो -अब्दः।

८.४२ अन्त्यौ समौ किन्तु पराभवे -अग्निः शस्त्र-आमय-आर्तिर् द्विज-गो-भयं च॥

८.४३ आद्यः प्लवङ्गो नवमे युगे -अब्दः स्यात् कीलको -अन्यः परतश् च सौम्यः।

८.४३ साधारणो रोधकृद् इत्य् *अथ-एवं[K.अथाब्दः] शुभप्रदौ कीलक-सौम्यसंज्ञौ॥

८.४४ कष्टः प्लवङ्गो बहुशः प्रजानां साधारणे -अल्पं जलम् ईतयश् च।

८.४४ यः पञ्चमो रोधकृद् इत्य् अथ-अब्दश् चित्रम् जलम् तत्र च सस्यसम्पत्॥

८.४५ इन्द्राग्निदैवं दशमं युगं यत् *तत्र-आद्य-वर्षं[K.तराद्यमब्दं] परिधाविसंज्ञम्।

८.४५ *प्रमादिनं विक्रमम् अप्य् अतो -अन्यत्[K.प्रमाद्यथानन्दमतः परं यत्] स्याद् राक्षसं च-अनल-संज्ञितम् च॥

८.४६ परिधाविनि मध्यदेश-नाशो नृप-हानिर् जलम् अल्पम् अग्नि-कोपः।

८.४६ अलसस् तु जनः प्रमादि-संज्ञे डमरं रक्तक-पुष्प-बीज-नाशः॥

८.४७ *विक्रमः[K.तत्परः] सकल-लोक-नन्दनो राक्षसः क्षय-करो -अनलस् तथा।

८.४७ ग्रीष्म-धान्य-जननो -अत्र राक्षसो वह्नि-कोप-मरक-प्रदो -अनलः॥

८.४८ एकादशे पिङ्गल-कालयुक्त-सिद्धार्थ-रौद्राः खलु दुर्मतिश् च।

८.४८ आद्ये तु व्यृटिर् महती सचौरा श्वासो हनू-कम्प-युतश् च कासः॥

८.४९ यत् कालयुक्तं तद् अनेक-दोषं सिद्धार्थ-संज्ञे बहवो गुणाश् च।

८.४९ रौद्रो -अतिरौद्रः क्षय-कृत् प्रदिष्टो यो दुर्मतिर् मध्यम-वृष्टि-कृत् सः॥

८.५० भाग्ये युगे दुन्दुभि-संज्ञम् आद्यं सस्यस्य वृद्धिं महतीं करोति।

८.५० *अङ्गार-संज्ञं[K.उद्गारिसंज्ञं] तद्-अनु क्षयाय नरेश्वराणां विषमा च वृष्टिः॥

८.५१ रक्ताक्षम् अब्दं कथितं तृतीयं तस्मिन् भयं दंष्ट्रि-कृतं गदाश् च।

८.५१ क्रोधं बहु-क्रोध-करं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधैः॥

८.५२अ क्षयम् इति युगस्य-अन्त्यस्य-अन्त्यं बहु-क्षय-कारकं

८.५२ब् जनयति भयं तद्-विप्राणां कृषीबल-वृद्धिदम्।

८.५२च् उपचय-करं विट्-शूद्राणां पर-स्व-हतां तथा

८.५२द् कथितम् अखिलं षष्ट्य्-अब्दे यत् तद् अत्र समासतः॥

८.५३ अकलुषांशु-जटिलः पृथु-मूर्तिः कुमुद-कुन्द-कुसुम-स्फटिक-आभः।

८.५३ ग्रह-हतो न यदि सत्-पथ-वर्ती *हित-करो[K.हतकिरो] -अमर-गुरुर् मनुजानाम्॥

९ शुक्रचाराध्यायः

९.०१ नाग-गज-ऐरावत-वृषभ-गो-जरद्गव-मृग-अज-दहन-आख्याः।

९.०१ अश्विन्य्-आद्याः कैश् चित् त्रिभाः क्रमाद् वीथयः कथिताः॥

९.०२ नागा तु पवन-याम्य-अनलानि पैतामहात् त्रिभास् तिस्रः।

९.०२ गोवीथ्याम् अश्विन्यः पौष्णं द्वे च-अपि भद्रपदे॥

९.०३ जारद्गव्यां श्रवणात् त्रिभं मृग-आख्या त्रिभं तु मैत्र-आद्यम्।

९.०३ हस्त-विशाखा-त्वाष्ट्राण्य् अज-इत्य् अषाढा-द्वयं दहना॥

९.०४ तिस्रस् तिस्रस् तासां क्रमाद् उदङ्-मध्य-याम्य-मार्ग-स्थाः।

९.०४ तासाम् अप्य् उत्तर-मध्य-*दक्षिणेन स्थित-एकैका[K.दक्षिणावस्थितैकैका]॥

९.०५ वीथी-मार्गान् अपरे कथयन्ति यथास्थितान् भ-मार्गस्य।

९.०५ नक्षत्राणां तारा याम्योत्तर-मध्यमास् तद्वत्॥

९.०६ उत्तरमार्गो याम्य-आदि निगदितो मध्यमस् तु भाग्य-आद्यः।

९.०६ दक्षिण-मार्गो-आषाढा-आदि कैश् चिद् एवं कृता मार्गाः॥

९.०७ *ज्यौतिषम्[K.ज्योतिसम्] आगम-शास्त्रं विप्रतिपत्तौ न योग्यम् अस्माकम्।

९.०७ स्वयम् एवा विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये॥

९.०८ उत्तरवीथिषु शुक्रः सुभिक्ष-शिव-कृद् गतो -अस्तम् उदयम् *च[K.वा]।

९.०८ मध्यासु मध्य-फलदः कष्ट-फलो दक्षिण-स्थासु॥

९.०९ अत्युत्तम-उत्तमोनं सम-मध्य-न्यूनम् अधम-कष्ट-फलम्।

९.०९ *कष्टतरं[K.कष्टतमं] सौम्य-आद्यासु वीथिषु यथाक्रमं ब्रूयात्॥

९.१० भरणी-पूर्वं मण्डलम् ऋक्ष-चतुष्कं सुभिक्ष-करम् आद्यम्।

९.१० वङ्ग-अङ्ग-महिष-*बाह्लिक[K.वाह्लिक]-कलिङ्ग-देशेषु भय-जननम्॥

९.११ अत्र-उदितम् आरोहेद् ग्रहो -अपरो यदि सितं ततो हन्यात्।

९.११ भद्राश्व-शूरसेनक-यौधेयक-कोटिवर्ष-नृपान्॥

९.१२ भचतुष्टयम् आर्द्रा-आद्यं द्वितीयम् अमित-अम्बु-सस्य-सम्पत्त्यै।

९.१२ विप्राणाम् अशुभ-करं विशेषतः क्रूर-चेष्टानाम्॥

९.१३ अन्येन-अत्र-आक्रान्ते म्लेच्छा-*आटविक[K.& ऊ.आतविका]-श्वजीवि-गोमन्तान्।

९.१३ गोनर्द-नीच-शूद्रान् वैदेहांश् च-अनयः स्पृशति॥

९.१४ विचरन् मघा-आदि-पञ्चकम् उदितः सस्य-प्रणाश-कृत्-शुक्रः।

९.१४ क्षुत्-तस्कर-भय-जननो नीच-उन्नति-सङ्करकरश् च॥

९.१५ पित्र्याद्ये -अवष्टब्धो हन्त्य् अन्येन-आविकान् शबर-शूद्रान्।

९.१५ पुण्ड्रा-अपरान्त्य-शूलिक-वनवासि-द्रविड-सामुद्रान्॥

९.१६ स्वात्य्-आद्यं भ-त्रितयं मण्डलम् एतच् चतुर्थम् अभय-करम्।

९.१६ ब्रह्म-क्षत्र-सुभिक्ष-अभिवृद्धये मित्र-भेदाय॥

९.१७ अत्र-अक्रान्ते मृत्युः किरातभर्तुः-पिनष्टि च-इक्ष्वाकून्।

९.१७ प्रत्यन्त-अवन्ति-पुलिन्द-तङ्गणान् शूरसेनांश् च॥

९.१८ ज्येष्ठा-आद्यं पञ्च-ऋक्षं क्षुत्-तस्कर-रोग-दम् प्रबाधयते।

९.१८ काश्मीर-अश्मक-मत्स्यान् स-चारुदेवीन् अवन्तींश् च॥

९.१९ *अत्र-अरोहेद् द्रविड-आभीर-अम्बष्ठ[K.आरोहे -अत्राभीरान् द्रविडाम्बष्ठ]-त्रिगर्त-सौराष्ट्रान्।
९.१९ नाशयन्ति सिन्धु-सौवीरकांश् च काशि-ईश्वरस्य वधः॥

९.२० षष्ठं षण्नक्षत्रं शुभम् एतन् मण्डलं धनिष्ठा-आद्यम्।

९.२० भूरि-धन-गोकुल-आकुलम् अनल्प-धान्यं क्व चित् सभयम्॥

९.२१ अत्र-*आरोहेच्[K.आरोहे]-शूलिक-गान्धार-अवन्तयः प्रपीड्यन्ते।

९.२१ वैदेह-वधः प्रत्यन्त-यवन-शक-दास-परिवृद्धिः॥

९.२२ अपरस्यां स्वात्य्-आद्यं ज्येष्ठा-आद्यं च-अपि मण्डलं शुभदम्।

९.२२ पित्र्य-आद्यं पूर्वस्यां शेषाणि यथोक्त-फलदानि॥

९.२३ दृष्टो *-अनस्तमिते[K.-अनस्तगते -अर्के] भय-कृत् क्षुद्-रोग-कृत् समस्तम् अहः।

९.२३ *अर्ध-दिवसे[K.अर्थदिवसं] च स-इन्दुर् नृप-बल-पुर-भेदकृत्-शुक्रः॥

९.२४ भिन्दन् गतो -अनल-ऋक्षं कूलातिक्रान्त-वारि-वाहाभिः।

९.२४ अव्यक्त-तुङ्ग-निम्ना समा सरिद्भिर् भवति धात्री॥

९.२५ प्राजापत्ये शकटे भिन्ने कृत्वा-इव पातकं वसुधा।

९.२५ केश-अस्थि-शकल-शबला कापालम् इव व्रतं धत्ते॥

९.२६ सौम्य-उपगतो रस-सस्य-संक्षयाय-उशनाः समुद्दिष्टः।

९.२६ आर्द्रागतस् तु कोशल-कलिङ्ग-हा सलिल-निकर-करः॥

९.२७ अश्मक-वैदर्भाणां पुनर्वसुस्थे सिते महान् अनयः।

९.२७ पुष्ये पुष्टा वृष्टिर् *विद्याधररण[U - विद्याधर]-विमर्दश् च॥

९.२८ आश्लेषासु भुजङ्गम-दारुण-पीडा-वहश् चरन् शुक्रः।

९.२८ भिन्दन् मघां महामात्र-दोष-कृद् भूरि-वृष्टि-करः॥

९.२९ भाग्ये शबर-पुलिन्द-प्रध्वंस-करो -अम्बु-निवह-मोक्षाय।

९.२९ आर्यम्णे कुरु-जाङ्गल-पाञ्चाल-घ्नः सलिल-दायी॥

९.३० कौरव-चित्रकराणां हस्ते पीडा जलस्य च निरोधः।

९.३० कूपकृद्-अण्डज-पीडा चित्रास्थे शोभना वृष्टिः॥

९.३१ स्वातौ प्रभूत-वृष्टिर् दूत-वणिग्-नाविकान् स्पृशत्य् अनयः।

९.३१ ऐन्द्र-अग्ने -अपि सुवृष्टिर् वणिजां च भयं विजानीयात्॥

९.३२ मैत्रे क्षत्र-विरोधो ज्येष्ठायां क्षत्र-मुख्य-सन्तापः।

९.३२ मौलिक-भिषजाम् मूले त्रिष्व् अपि च-एतेष्व् अनावृष्टिः॥

९.३३ आप्ये सलिलज-पीडा विश्वेशे व्याधयः प्रकुप्यन्ति।

९.३३ श्रवणे श्रवण-व्याधिः *पाखण्डि[K.पाषण्डि]-भयं धनिष्ठासु॥

९.३४ शतभिषजि शौण्डिकानाम् *अजैकभे[K.अजैकपे] द्यूतजीविनां *पीडां[K.पीडा]।

९.३४ कुरु-पाञ्चालानाम् अपि करोति च-अस्मिन् सितः सलिलम्॥

९.३५ आहिर्बुध्न्ये फल-मूल-ताप-कृद् यायिनाम् च रेवत्याम्।

९.३५ अश्विन्यां हयपानां याम्ये तु किरात-यवनानाम्॥

९.३६ *चतुर्दशीं पञ्चदशीं तथा-अष्टमीं[K.चतुर्दशे पञ्चदशे तथाष्टमे] तमिस्रपक्षस्य *तिथिं[K.तिथौ] भृगोः सुतः।

९.३६ यदा व्रजेद् दर्शनम् अस्तम् एति वा तदा मही वारिमयीव लक्ष्यते॥

९.३७ गुरुर् भृगुश् च-अपर-पूर्व-काष्ठयोः परस्परं सप्तम-राशिगौ यदा।

९.३७ तदा प्रजा रुग्-भय-शोक-पीडिता न वारि पश्यन्ति पुरन्दर-उज्झितम्॥

९.३८ यदा स्थिता जीव-बुध-आर-सूर्यजाः सितस्य सर्वे -अग्रपथ-अनुवर्तिनः।

९.३८ नृ-नाग-विद्याधर-सङ्गरास् तदा भवन्ति वाताश् च समुच्छ्रित-अन्तकाः॥

९.३९ न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग् न रता द्विजातयः।

९.३९ न च-अल्पम् अप्य् अम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम्॥

९.४० शनैश्चरे म्लेच्छ-विडाल-कुञ्जराः खरा महिष्यो -असित-धान्य-शूकराः।

९.४० पुलिन्द-शूद्राश् च सदक्षिणापथाः क्षयं व्रजन्त्य् अक्षि-मरुद्-गद-उद्भवैः॥

९.४१ निहन्ति शुक्रः क्षितिजे -अग्रतः *प्रजां[K.प्रजा] हुताश-शस्त्र-क्षुद्-अवृष्टि-तस्करैः।

९.४१ चर-अचरं व्यक्तम् अथ-उत्तरापथं दिशो -अग्नि-विद्युद्-रजसा च पीड्येत्॥

९.४२ बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विज-गो-सुरालयान्।

९.४२ दिशं च पूर्वां करकासृजो -अम्बुदा गले गदा भूरि भवेच् च शारदम्॥

९.४३अ सौम्यो -अस्त-उदयोः पुरो भृगुसुतस्य-अवस्थितस् तोय-कृद्

९.४३ब् रोगान् पित्तज-*कामलांश्[K.कामलां Kऽस् त्र्. कामलाम्श् ओर् कामलाश्] च कुरुते पुष्णाति च *ग्रैष्मिकान्[K.ग्रैष्मिकम्]।

९.४३च् हन्यात् प्रव्रजित-आग्निहोत्रिक-भिषग्-रङ्गोपजीव्यान् हयान्

९.४३द् वैश्यान् गाः सह वाहनैर् नरपतीन् पीतानि पश्चाद् दिशम्॥

९.४४अ शिखि-भयम् अनलाभे शस्त्र-कोपश् च रक्ते

९.४४ब् कनकनिकषगौरे व्याधयो दैत्यपूज्ये।

९.४४च् हरित-कपिल-रूपे श्वास-कास-प्रकोपः

९.४४द् पतति न सलिलं खाद् भस्मरूक्षासिताभे॥

९.४५ दधि-कुमुद-शशाङ्क-कान्ति-भृत् स्फुट-विकसत्-किरणो बृहत्तनुः।

९.४५ सुगतिर् अविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः॥

१० शनैश्चरचाराध्यायः

१०.०१ श्रवण-अनिल-हस्त-आर्द्रा-भरणी-भाग्य-उपगः सुतो -अर्कस्य।

१०.०१ प्रचुर-सलिल-उपगूढां करोति धात्रीं यदि स्निग्धः॥

१०.०२ अहि-वरुण-पुरन्दर-दैवतेषु सुक्षेम-कृन् न च-अतिजलम्।

१०.०२ क्षुत्-शस्त्र-अवृष्टि-करो मूले प्रत्येकम् अपि वक्ष्ये॥

१०.०३ तुरग-तुरगोपचारक-कवि-वैद्य-अमात्य-हा-अर्कजो -अश्विगतः।

१०.०३ याम्ये नर्तक-वादक-गेय-ज्ञ-क्षुद्र-नैकृतिकान्॥

१०.०४ बहुलास्थे पीड्यन्ते सौरे -अग्र्युपजीविनश् चमूपाश् च।

१०.०४ रोहिण्यां कोशल-मद्र-काशि-पञ्चाल-शाकटिकाः॥

१०.०५ मृगशिरसि वत्स-याजक-यजमान-आर्यजन-मध्यदेशास् च।

१०.०५ रौद्र-स्थे *पारत-रमठास् तैलिक-रजक[K.पारतरातैलिकरजक]-चौराश् च॥

१०.०६ आदित्ये पाञ्चनद-प्रत्यन्त-सुराष्ट्र-सिन्धु-सौवीराः।

१०.०६ पुष्ये घाण्ठिक-घौषिक-यवन-वणिक्-कितव-कुसुमानि॥

१०.०७ सार्पे जलरुह-सर्पाः पित्र्ये बाह्लीक-चीन-गान्धाराः।

१०.०७ शूलिक-पारत-वैश्याः कोष्ठागाराणि वणिजश् च॥

१०.०८ भाग्ये रस-विक्रयिणः पण्य-स्त्री-कन्यका-महाराष्ट्राः।

१०.०८ आर्यम्णे नृप-गुड-लवण-भिक्षुक-अम्बूनि तक्षशिला॥

१०.०९ हस्ते नापित-चाक्रिक-चौर-भिषक्-सूचिका द्विप-ग्राहाः।

१०.०९ बन्धक्यः कौशलका मालाकाराश् च पीड्यन्ते॥

१०.१० चित्रास्थे प्रमदाजन-लेखक-चित्रज्ञ-चित्रभाण्डानि।

१०.१० स्वातौ मागध-चर-दूत-सूत-पोतप्लव-नट-आद्याः॥

१०.११ ऐन्द्राग्राख्ये त्रैगर्त-चीन-कौलूत-कुङ्कुमं लाक्षा।

१०.११ सस्यान्य् अथ माञ्जिष्ठं कौसुम्भं च क्षयं याति॥

१०.१२ मैत्रे कुलूत-तङ्गण-खस-काश्मीराः समन्त्रि-चक्रचराः।

१०.१२ उपतापं यान्ति च घाण्टिका विभेदश् च मित्राणाम्॥

१०.१३ ज्येष्ठासु नृप-पुरोहित-नृप-सत्कृत-शूर-गण-कुल-श्रेण्यः।

१०.१३ मूले तु काशि-कोशल-पाञ्चाल-फल-औषधी-योधाः॥

१०.१४ आप्ये -अङ्ग-वङ्ग-कौशल-गिरिव्रजा मगध-पुण्ड्र-मिथिलाश् च।

१०.१४ उपतापं यान्ति जना वसन्ति ये ताम्रलिप्त्यां च॥

१०.१५ विश्वेश्वरे -अर्कपुत्रश् चरन् दशार्णान् निहन्ति यवनांश् च।

१०.१५ उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश् च॥

१०.१६ श्रवणे राज-अधिकृतान् विप्राग्र्य-भिषक्-पुरोहित-कलिङ्गान्।

१०.१६ वसुभे मगधेश-जयो वृद्धिश् च धनेष्व् अधिकृतानाम्॥

१०.१७ साजे शतभिषजि भिषक्-कवि-शौण्डिक-पण्य-नीति*वृत्तीनाम्[K.वर्त्तानाम्]।

१०.१७ आहिर्बुध्न्ये नद्यो यानकराः स्त्री-हिरण्यं च॥

१०.१८ रेवत्यां राज-भृताः क्रौञ्च-द्वीप-आश्रिताः शरत्सस्यम्।

१०.१८ शबराश् च निपीड्यन्ते यवनाश् च शनैश्चरे चरति॥

१०.१९ यदा विशाखासु महेन्द्र-मन्त्री सुतश् च भानोर् दहन-ऋक्ष-यातः।

१०.१९ तदा प्रजानाम् अनयो -अतिघोरः पुर-प्रभेदो गतयोर् भम् एकम्॥

१०.२० अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद् यदि पीत-मयूखः।

१०.२० शस्त्र-भयाय च रक्तसवर्णो भस्मनिभो बहु-वैरकरश् च॥

१०.२१अ वैदूर्यकान्ति-विमलः शुभकृत् प्रजानां

१०.२१ब् बाण-अतसीकुसुम-वर्ण-निभश् च शस्तः।

१०.२१च् *यं च-अपि[K.पञ्च-अपि] वर्णम् उपगच्छति तत्सवर्णान्

१०.२१द् सूर्यात्मजः क्षयतीति मुनि-प्रवादः॥

११ केतुचाराध्यायः

११.०१ गार्गीयं शिखि-चारं पाराशरम् असितदेवल-कृतं च।

११.०१ अन्यांश् च बहून् दृष्ट्वा क्रियते -अयम् अनाकुलश् चारः॥

११.०२ दर्शनम् अस्तमयो वा न गणितविधिना-अस्य शक्यते ज्ञातुम्।

११.०२ दिव्य-अन्तरिक्ष-भौमास् त्रिविधाः स्युः केतवो यस्मात्॥

११.०३ अहुताशे -अनलरूपं यस्मिंस् तत्-केतुरूपम् एव-उक्तम्।

११.०३ खद्योत-पिशाचालय-मणि-रत्न-आदीन् परित्यज्य॥

११.०४ ध्वज-शस्त्र-भवन-तरु-तुरग-कुञ्जर-आद्येष्व् अथ-अन्तरिक्षास् ते।

११.०४ दिव्या नक्षत्रस्था भौमाः स्युर् अतो -अन्यथा शिखिनः॥

११.०५ शतम् एक-अधिकम् एके सहस्रम् अपरे वदन्ति केतूनाम्।

११.०५ बहुरूपम् एकम् एव प्राह मुनिर् नारदः केतुम्॥

११.०६ यद्य् एको यदि बहवः किम् अनेन फलं तु सर्वथा वाच्यम्।

११.०६ उदय-अस्तमयैः स्थानैः स्पर्शैर् आधूमनैर् वर्णैः।

११.०७ यावन्त्य् अहानि दृश्यो मासास् तावन्त एव फलपाकः।

११.०७ मासैर् अब्दांश् च वदेत् प्रथमात् पक्षत्रयात् परतः॥

११.०८ ह्रस्वस् तनुः प्रसन्नः स्निग्धस् त्व् ऋजुर् अचिर-संस्थितः शुक्लः।

११.०८ उदितो *-अथ वा-अभिवृष्टः[K.वा-अप्य् अभिदृष्टः] सुभिक्ष-सौख्यावहः केतुः॥

११.०९ उक्त-विपरीत-रूपो न शुभकरो धूमकेतुर् उत्पन्नः।

११.०९ इन्द्रायुध-अनुकारी विशेषतो द्वित्रिचूलो वा॥

११.१० हार-मणि-हेम-रूपाः किरण-आख्याः पञ्चविंशतिः सशिखाः।

११.१० प्रागपरदिशोर् दृश्या नृपति-विरोधावहा रविजाः॥

११.११ शुक-दहन-बन्धुजीवक-लाक्षा-क्षतज-उपमा हुताशसुताः।

११.११ आग्नेय्यां दृश्यन्ते तावन्तस् ते -अपि शिखिभयदाः॥

११.१२ वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश् च ते -अपि तावन्तः।

११.१२ दृश्यन्ते याम्यायां जन-मरक-आवेदिनस् ते च॥

११.१३ दर्पण-वृत्त-आकारा विशिखाः किरणान्विता धरातनयाः।

११.१३ क्षुद्भयदा द्वाविंशतिर् ऐशान्याम् अम्बुतैलनिभाः॥

११.१४ शशिकिरण-रजत-हिम-कुमुद-कुन्द-कुसुम-उपमाः सुताः शशिनः।

११.१४ उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः॥

११.१५ ब्रह्मसुत एक एव त्रिशिखो वर्णैस् त्रिभिर् युगान्तकरः।

११.१५ अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः॥

११.१६ शतम् अभिहितम् एकसमेतम् एतद् एकेन विरहितान्य् अस्मात्।

११.१६ कथयिष्ये केतूनां शतानि नव लक्षणैः स्पष्टैः॥

११.१७ सौम्यैशान्योर् उदयं शुक्रसुता यान्ति चतुरशीत्याख्याः।

११.१७ विपुलसिततारकास् ते स्निग्धाश् च भवन्ति तीव्रफलाः॥

११.१८ स्निग्धाः प्रभा-समेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः।

११.१८ अतिकष्टफला दृश्याः सर्वत्रैते कनकसंज्ञाः॥

११.१९ विकचा नाम गुरुसुताः सित-एकताराः शिखापरित्यक्ताः।

११.१९ षष्टिः पञ्चभिर् अधिका स्निग्धा याम्याश्रिताः पापाः॥

११.२० न-अतिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथा-इष्ट-दिक्-प्रभवाः।

११.२० बुधजास् तस्करसंज्ञाः पापफलास् त्व् एकपञ्चाशत्॥

११.२१ क्षतज-अनल-अनुरूपास् त्रि-चूल-ताराः कुजात्मजाः षष्टिः।

११.२१ नाम्ना च कौङ्कुमास् ते सौम्याशासंस्थिताः पापाः॥

११.२२ त्रिंशत्य् अधिका राहोस् ते तामसकीलका इति ख्याताः।

११.२२ रविशशिगा दृश्यन्ते तेषां फलम् अर्कचारोक्तम्॥

११.२३ विंशत्यधिकम् अन्यत्-शतम् अग्नेर् विश्वरूपसंज्ञानाम्।

११.२३ तीव्र-अनल-भयदानां ज्वालामालाकुलतनूनाम्॥

११.२४ श्यामारुणा विताराश् चामररूपा विकीर्णदीधितयः।

११.२४ अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः॥

११.२५ तारापुञ्जनिकाशा गणका नाम प्रजापतेर् अष्टौ।

११.२५ द्वे च शते चतुरधिके *चतुरस्रा[K.चतुरश्रा] ब्रह्मसन्तानाः॥

११.२६ कङ्का नाम वरुणजा द्वात्रिंशद्-वंश-गुल्म-संस्थानाः।

११.२६ शशिवत्-प्रभा-समेतास् तीव्रफलाः केतवः प्रोक्ताः॥

११.२७ षण्णवतिः कालसुताः कबन्ध-संज्ञाः कबन्ध-संस्थानाः।

११.२७ *पुण्ड्र[K.चण्ड]-अभय-प्रदाः स्युर् विरूप-ताराश् च ते शिखिनः॥

११.२८ शुक्ल-विपुल-एकतारा नव विदिशां केतवः समुत्पन्नाः।

११.२८ एवं केतु-सहस्रं विशेषम् एषाम् अतो वक्ष्ये॥

११.२९ उदगायतो महान् स्निग्ध-मूर्तिर् अपरोदयी वसाकेतुः।

११.२९ सद्यः करोति मरकं सुभिक्षम् अप्य् उत्तमं कुरुते॥

११.३० तल्लक्षणो -अस्थिकेतुः स तु रूक्षः क्षुद्-भय-आवहः प्रोक्तः।

११.३० स्निग्धस् तादृक् प्राच्यां शस्त्राख्यो डमर-मरकाय॥

११.३१ दृश्यो -अमावास्यायां कपालकेतुः सधूम्र-रश्मि-शिखः।

११.३१ प्राङ् नभसो -अर्धविचारी क्षुत्-मरक-अवृष्टि-रोग-करः॥

११.३२ प्राग् *वैश्वानर[K.वश्वानर, Kऽस् त्र्. वैश्वानर]मार्गे शूलाग्रः श्याव-रूक्ष-ताम्र-अर्चिः।

११.३२ नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः॥

११.३३ अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुल-उच्छ्रितया।

११.३३ गच्छेद् यथा यथोदक् तथा तथा दैर्घ्यम् आयाति॥

११.३४ सप्तमुनीन् संस्पृश्य ध्रुवम् अभिजितम् एव च प्रतिनिवृत्तः।

११.३४ नभसो -अर्धमात्रम् इत्वा याम्येन-अस्तम् समुपयाति॥

११.३५ हन्यात् प्रयागकूलाद् यावद् अवन्तीं च *पुष्करारण्यम्[K.पुष्कराण्यम्]।

११.३५ उदग् अपि च देविकाम् अपि भूयिष्ठं मध्यदेशाख्यम्॥

११.३६ अन्यान् अपि स देशान् क्व चित् क्व चिद् धन्ति रोगदुर्भिक्षैः।

११.३६ दश मासान् फलपाको -अस्य कैश् चिद् अष्टादश प्रोक्तः॥

११.३७ प्रागर्धरात्रदृश्यो याम्याग्रः श्वेतकेतुर् अन्यश् च।

११.३७ क इति युगाकृतिर् अपरे युगपत्तौ सप्तदिनदृश्यौ॥

११.३८ स्निग्धौ सुभिक्षशिवदाव् अथाधिकं दृश्यते कनामा यः।

११.३८ दश वर्षाण्य् उपतापं जनयति शस्त्र-प्रकोपकृतम्॥

११.३९ श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतः।
११.३९ विनिवर्तते -अपसव्यं त्रिभागशेषाः प्रजाः कुरुते॥

११.४० आधूम्रया तु शिखया दर्शनम् आयाति कृत्तिकासंस्थः।

११.४० ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते॥

११.४१ ध्रुवकेतुर् अनियत-गति-प्रमाण-वर्ण-आकृतिर् भवति विष्वक्।

११.४१ दिव्य-अन्तरिक्ष-भौमो भवत्य् अयं स्निग्ध इष्टफलः॥

११.४२ सेनाङ्गेषु नृपाणां गृह-तरु-शैलेषु च-अपि देशानाम्।

११.४२ गृहिणाम् उपस्करेषु च विनाशिनां दर्शनं याति॥

११.४३ कुमुद इति कुमुदकान्तिर् वारुण्यां प्राक्शिखो निशाम् एकाम्।

११.४३ दृष्टः सुभिक्षम् अतुलं दश किल वर्षाणि स करोति॥

११.४४ सकृद् एकयामदृश्यः सुसूक्ष्मतारो -अपरेण मणिकेतुः।

११.४४ ऋज्वी शिखास्य शुक्ला स्तनोद्गता क्षीरधारेव॥

११.४५ उदयन्न् एव सुभिक्षं चतुरो मासान् करोत्य् असौ सार्धान्।

११.४५ प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्॥

११.४६ जलकेतुर् अपि च पश्चात् स्निग्धः शिखयापरेण च-उन्नतया।

११.४६ नव मासान् स सुभिक्षं करोति शान्तिं च लोकस्य॥

११.४७ भवकेतुर् एकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः।

११.४७ हरिलाङ्गूल-उपमया प्रदक्षिणावर्तया शिखया॥

११.४८ यावत एव मुहूर्तान् दर्शनम् आयाति निर्दिशेत्-मासान्।

११.४८ तावद् अतुलं सुभिक्षं रूक्षे प्राणान्तिकान् रोगान्॥

११.४९ अपरेण पद्मकेतुर् मृणालगौरो भवेन् निशाम् एकाम्।

११.४९ सप्त करोति सुभिक्षं वर्षाण्य् अतिहर्षयुक्तानि॥

११.५० आवर्त इति निशार्धे सव्यशिखो -अरुणनिभो -अपरे स्निग्धः।

११.५० यावत् क्षणान् स दृश्यस् तावन् मासान् सुभिक्षकरः॥

११.५१ पश्चात् सन्ध्याकाले संवर्तो नाम धूम्र-ताम्र-शिखः।

११.५१ आक्रम्य वियत्त्र्यंशं शूलाग्र-अवस्थितो रौद्रः॥

११.५२ यावत एव मुहूर्तान् दृश्यो वर्षाणि हन्ति तावन्ति।

११.५२ भूपान् शस्त्र-निपातैर् उदय-ऋक्षं च-अपि पीडयति॥

११.५३ ये शस्तास् तान् हित्वा केतुभिर् *आधूपिते[K.आधूमिते] -अथ वा स्पृष्टे।

११.५३ नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्॥

११.५४ अश्विन्याम् अश्मकपं भरणीषु किरातपार्थिवं हन्यात्।

११.५४ बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्॥

११.५५ औशीनरम् अपि सौम्ये जलजाजीवाधिपं तथार्द्रासु।

११.५५ आदित्ये -अश्मक*नाथान्[K.नाथं] पुष्ये मघधाधिपं हन्ति॥

११.५६ असिकेशं भौजङ्गे पित्र्ये -अङ्गं पाण्ड्यनाथम् अपि भाग्ये।

११.५६ *औज्ञयिनिकम्[K.औज्ञयनिकम्] आर्यम्णे सावित्रे दण्डकाधिपतिम्॥

११.५७ चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत् तज्ज्ञः।

११.५७ काश्मीरक-काम्बोजौ नृपती प्राभञ्जने न स्तः॥

११.५८ इक्ष्वाकुर् अलक*नाथश्[K.नाथौ, Kऽस् त्र्. नाथो] च हन्यते यदि भवेद् विशाखासु।

११.५८ मैत्रे पुण्ड्राधिपतिर् *ज्येष्ठासु च[K.ज्येष्ठास्वथ] सार्वभौमवधः॥

११.५९ मूले -अन्ध्र-मद्रक-पती जलदेवे काशिपो मरणम् एति।

११.५९ यौधेयक-अर्जुनायन-शिवि-चैद्यान् वैश्वदेवे च॥

११.६० हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम्।

११.६० नैमिषनृपं किरातं श्रवणादिषु षट्स्व् इमान् क्रमशः॥

११.६१ उल्काभिताडितशिखः शिखी शिवः शिवतरो *-अतिदृष्टो[K.अभिवृष्टो] यः।

११.६१ अशुभः स एव चोल-अवगाण-सितहूण-चीनानाम्॥

११.६२अ नम्रा यतः शिखि-शिखा-अभिसृता यतो वा

११.६२ब् ऋक्षं च यत् स्पृशति तत् कथितांश् च देशान्।

११.६२च् दिव्य-प्रभाव-निहतान् स यथा गरुत्मान्

११.६२द् भुङ्क्ते गतो नरपतिः परभोगिभोगान्॥

१२ अगस्त्यचाराध्यायः

१२.०१अ समुद्रो -अन्तः शैलैर् मकर-नखर-उत्खात-शिखरैः

१२.०१ब् कृतस् तोय-उच्छित्त्या सपदि सुतरां येन रुचिरः।

१२.०१च् पतन् मुक्तामिश्रैः प्रवर-मणिरत्न-अम्बुनिवहैः

१२.०१द् सुरान् प्रत्यादेष्टुं *मित[K.सित]-मुकुट-रत्नान् इव पुरा॥

१२.०२ येन च-अम्बुहरणे -अपि विद्रुमैर् भूधरैः स-मणिरत्न-विद्रुमैः।

१२.०२ निर्गतैस् तद्-उरगैश् च राजितः सागरो -अधिकतरं विराजितः॥

१२.०३ प्रस्फुरत्-तिमि-जलेभ-जिह्मगः क्षिप्त-रत्न-निकरो महोदधिः।

१२.०३ आपदां पदगतो -अपि यापितो येन पीतसलिलो -अमरश्रियम्॥

१२.०४ प्रचलत्-तिमि-शुक्तिज-शङ्ख-चितः सलिले -अपहृते -अपि पतिः सरिताम्।

१२.०४ स-तरङ्ग-सितोत्पल-हंस-भृतः सरसः शरदि-इव विभर्ति *रुचिम्[K.रुचम्]॥

१२.०५ तिमि-सिताम्बुधरं मणि-तारकं स्फटिक-चन्द्रम् अनम्बु-शरद्-द्युतिः।

१२.०५ फणि-फण-उपल-रश्मि-शिखिग्रहं कुटिलगेश-वियच् च चकार यः॥

१२.०६अ दिनकर-रथ-मार्ग-विच्छित्तये -अभ्युद्यतं यच् चलत्-शृङ्गम् उद्भ्रान्त-विद्याधर-अंस-अवसक्त-प्रिया-व्यग्र-दत्त-अङ्क-देह-अवलम्ब-अम्बर-*अत्य्[K.अभ्य्]उच्छ्रित-उद्ध्रूयमान-ध्वजैः शोभितम्।

१२.०६ब् करिकट-मद-मिश्र-रक्त-अवलेह-अनुवास-अनुसारि-द्विरेफ-अवलीन-उत्तमाङ्गैः कृतान् बाणपुष्पैर् इव-उत्तंसकान् धारयद्भिर् मृगेन्द्रैः सनाथीकृत-अन्तर्-दरी-निर्झरम्।

१२.०६च् गगन-तलम् इव-उल्लिखन्तं प्रवृद्धैर् गज-आकृष्ट-फुल्ल-द्रुम-त्रास-विभ्रान्त-मत्त-द्विरेफ-आवली-*हृष्ट[K.गीत]-मन्द्र-स्वनैः शैलकूटैस् तरक्ष-ऋक्ष-शार्दूल-शाखामृग-अध्यासितैः।

१२.०६द् रहसि मदनसक्तया रेवया कान्तया-इव-उपगूढं सुर-अध्यासित-उद्यानम् अम्भोशन-अन्न-मूल-अनिलाहार-विप्र-अन्वितं विन्ध्यम् अस्तम्भयद् यश् च तस्य-उदयः शूयताम्॥

१२.०७ उदये च मुनेर् अगस्त्यनाम्नः कुसमायोगमलप्रदूषितानि।

१२.०७ हृदयानि सताम् इव स्वभावात् पुनर् अम्बूनि भवन्ति निर्मलानि॥

१२.०८ पार्श्वद्वय-अधिष्ठित-चक्रवाकामापुष्णती सस्वन-हंस-पङ्क्तिम्।

१२.०८ ताम्बूल-रक्त-उत्कषित-अग्रदन्ती विभाति योषा-इव *शरत्[K.सरित्] सहासा॥

१२.०९ इन्दीवर-आसन्न-सितोत्पल-अन्विता *शरद्[K.सरित्] भ्रमत्षट्पदपङ्क्तिभूषिता।

१२.०९ सभ्रूलताक्षेपकटाक्षवीक्षणा विदग्धयोषा-इव विभाति सस्मरा॥

१२.१०अ इन्दोः पयोदविगमोपहितां विभूतिं

१२.१०ब् द्रष्टुं तरङ्गवलया कुमुदं निशासु।

१२.१०च् उन्मीलयत्य् अलिनिलीनदलं सुपक्ष्म

१२.१०द् वापी विलोचनम् इव-असित-तारकान्तम्॥

१२.११ नाना-विचित्र-अम्बुज-हंस-कोक-कारण्डव-आपूर्ण-तडाग-हस्ता।

१२.११ रत्नैः प्रभूतैः कुसुमैः फलैश् च भूर्यच्छतीवार्घम् अगस्त्यनाम्ने॥

१२.१२ सलिलम् अमरपाज्ञया-उज्झितं यद् धन-परिवेष्टित-मूर्तिभिर् भुजङ्गैः।

१२.१२ फणि-जनित-विष-अग्नि-सम्प्रदुष्टं भवति शिवं तद् अगस्त्य-दर्शनेन॥

१२.१३ स्मरणाद् अपि पापम् अपाकुरुते किम् उत स्तुतिभिर् वरुणाङ्गरुहः।

१२.१३ मुनिभिः कथितो -अस्य यथार्घविधिः कथयामि तथ-एव नरेन्द्रहितम्॥

१२.१४ संख्याविधानात् प्रतिदेशम् अस्य विज्ञाय सन्दर्शनम् आदिशेज् ज्ञः।

१२.१४ तच् च-*उज्जयिन्याम्[K.उज्जयन्याम्] अगतस्य कन्यां भागैः स्वराख्यैः स्फुट-भास्करस्य॥

१२.१५ ईषत्प्रभिन्ने -अरुणरश्मिजालैर् नैशे -अन्धकारे दिशि दक्षिणस्याम्।

१२.१५ सांवत्सरावेदितदिग्विभागे भूपो -अर्घम् उर्व्यां प्रयतः प्रयच्छेत्॥

१२.१६अ कालोद्भवैः सुरभिभिः कुसुमैः फलैश् च

१२.१६ब् रत्नैश् च सागरभवैः कनकाम्बरैश् च।

१२.१६च् धेन्वा वृषेण परमान्न-युतैश् च भक्ष्यैर्

१२.१६द् दध्य्-अक्षतैः सुरभि-धूप-विलेपनैश् च॥

१२.१७अ नरपतिर् इमम् अर्घं श्रद्दधानो दधानः

१२.१७ब् प्रविगतगददोषो निर्जितारातिपक्षः।

१२.१७च् भवति यदि च दद्यात् सप्त वर्षाणि सम्यग्

१२.१७द् जलनिधि*रशनायाः[K.रसनायाः] स्वामितां याति भूमेः॥

१२.१८ द्विजो यथालाभम् उपाहृतार्घः प्राप्नोति वेदान् प्रमदाश् च पुत्रान्।

१२.१८ वैश्यश् च गां भूरि घनं च शूद्रो रोगक्षयं धर्मफलं च सर्वे॥

१२.१९अ रोगान् करोति परुषः कपिलस् त्व् अवृष्टिं

१२.१९ब् धूम्रो गवाम् अशुभकृत् स्फुरणो भयाय।

१२.१९च् माञ्जिष्ठराग-सदृशः क्षुधम् आहवांश् च

१२.१९द् कुर्याद् अणुश् च पुररोधम् अगस्त्यनामा॥

१२.२० शातकुम्भसदृशः स्फटिकाभस् तर्पयन्न् इव महीं *किरणाग्रैः[K.किरणौघैः]।

१२.२० दृश्यते यदि *तदा[K.ततः] प्रचुरान्ना भूर् भवत्य् अभय-रोग-जन-आढ्या॥

१२.२१ उल्कया विनिहतः शिखिना वा क्षुद्भयं मरकम् एव *विधत्ते[K.धत्ते]।

१२.२१ दृश्यते स किल हस्तगते -अर्के रोहिणीम् उपगते -अस्तम् उपैति॥

१३ सप्तर्षिचाराध्यायः

१३.०१ सैकावलीव राजति ससितोत्पलमालिनी सहासेव।

१३.०१ नाथवतीव च दिग् यैः कौवेरी सप्तभिर् मुनिभिः॥

१३.०२ ध्रुवनायकोपदेशान् *नरिनर्ती[K.नरिनर्त्ती]-इव-उत्तरा भ्रमद्भिश् च।

१३.०२ यैश् चारम् अहं तेषां कथयिष्ये वृद्धगर्ग-मतात्॥

१३.०३ आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ।

१३.०३ षड्द्विकपञ्चद्वियुतः शककालस् तस्य राज्ञश् च॥

१३.०४ एकैकस्मिन्न् ऋक्षे शतं शतं ते चरन्ति वर्षाणाम्।

१३.०४ *प्रागुदयतो -अप्य् अविवराद् र्जून् नयति तत्र संयुक्ताः[K.प्रागुत्तरतश् च एते सदा उदयन्ते ससाध्वीकाः]॥

१३.०५ पूर्वे भागे भगवान् मरीचिर् अपरे स्थितो वसिष्ठो -अस्मात्।

१३.०५ तस्याङ्गिरास् ततो -अत्रिस् तस्यासन्नः पुलस्त्यश् च॥

१३.०६ पुलहः क्रतुर् इति भगान् आसन्ना अनुक्रमेण *पूर्वाद्यात्[K.पूर्वाद्याः]।

१३.०६ तत्र वसिष्ठं मुनिवरम् उपाश्रितारुन्धती साध्वी॥

१३.०७ उल्का-अशनि-धूम-आद्यैर् हता विवर्णा विरश्मयो ह्रस्वाः।

१३.०७ हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश् च तद्वद्ध्यै॥

१३.०८ गन्धर्व-देव-दानव-मन्त्र-औषधि-सिद्ध-यक्ष-नागानाम्।

१३.०८ पीडाकारो मरीचिर् ज्ञेयो विद्याधराणां च॥

१३.०९ शक-यवन-दरद-पारत-काम्बोजांस् तापसान् वनोपेतान्।

१३.०९ हन्ति वसिष्ठो -अभिहतो विवृद्धिदो रश्मिसम्पन्नः॥

१३.१० अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश् च निर्दिष्टाः।

१३.१० अत्रेः कान्तारभवा जलजान्य् अम्भोनिधिः सरितः॥

१३.११ रक्षः-पिशाच-दानव-दैत्य-भुजङ्गाः स्मृताः पुलस्त्यस्य।

१३.११ पुलहस्य तु मूलफलं क्रतोस् तु यज्ञाः सयज्ञभृतः॥

१४ नक्षत्रकूर्माध्यायः

१४.०१ नक्षत्रत्रय-वर्गैर् आग्नेयाद्यैर् व्यवस्थितैर् नवधा।

१४.०१ भारतवर्षे *मध्य[K.मध्यात्]-प्रागादि-विभाजिता देशाः॥

१४.०२ भद्र-अरिमेद-माण्डव्य-साल्व-नीप-उज्जिहान-संख्याताः।

१४.०२ मरु-वत्स-घोष-यामुन-सारस्वत-मत्स्य-माध्यमिकाः॥

१४.०३ माथुरक-उपज्योतिष-धर्मारण्यानि शूरसेनाश् च।

१४.०३ गौरग्रीव-उद्देहिक-पाण्डु-गुड-अश्वत्थ-पाञ्चालाः॥

१४.०४ साकेत-कङ्क-कुरु-कालकोटि-कुकुराश् च पारियात्र-नगः।

१४.०४ औदुम्बर-कापिष्ठल-गजाह्वयाश् च-इति मध्यम् इदम्॥

१४.०५ अथ पूर्वस्याम् अञ्जन-वृषभ-ध्वज-पद्म-माल्यवद्-गिरयः।

१४.०५ व्याघ्रमुख-सुह्म-कर्वट-चान्द्रपुराः शूर्पकर्णाश् च॥

१४.०६ खस-मगध-शिबिरगिरि-मिथिल-समतट-उड्र-अश्ववदन-दन्तुरकाः।

१४.०६ प्राग्ज्योतिष-लौहित्य-क्षीरोद-समुद्र-पुरुषादाः॥

१४.०७ उदयगिरि-भद्र-गौडक-पौण्ड्र-उत्कल-काशि-मेकल-अम्बष्ठाः।

१४.०७ एकपद-*ताम्रलिप्तक[K.तामलिपितक]-कोशलका वर्धमानाश् च॥

१४.०८ आग्नेय्यां दिशि कोशल-कलिङ्ग-वङ्ग-उपवङ्ग-जठराङ्गाः।

१४.०८ शौलिक-विदर्भ-वत्स-अन्ध्र-चेदिकाश् च-ऊर्ध्वकण्ठाश् च॥

१४.०९ वृष-नालिकेर-चर्मद्वीपा विन्ध्यान्तवासिनस् त्रिपुरी।

१४.०९ श्मशुधर-*हेमकुड्य[K.हेमकूट्य]-व्यालग्रीवा महाग्रीवाः॥

१४.१० किष्किन्ध-कण्टकस्थल-निषादराष्ट्राणि पुरिक-दाशार्णाः।

१४.१० सह नग्न-पर्णशबरैर् आश्लेषाद्ये त्रिके देशाः॥

१४.११ अथ दक्षिणेन लङ्का-कालाजिन-सौरिकीर्ण-तालिकटाः।

१४.११ गिरिनगर-मलय-दर्दुर-महेन्द्र-मालिन्द्य-भरुकच्छाः॥

१४.१२ कङ्कट-*कङ्कण[K.टङ्कण]-वनवासि-शिबिक-फणिकार-कोङ्कण-आभीराः।

१४.१२ आकर-वेणा-*आवर्तक[K.आवन्तक]-दशपुर-गोनर्द-केरलकाः॥

१४.१३ कर्णाट-महाटवि-चित्रकूट-नासिक्य-कोल्लगिरि-चोलाः।

१४.१३ क्रौञ्चद्वीप-जटाधर-कावेर्यो रिष्यमूकश् च॥

१४.१४ वैदूर्य-शङ्ख-मुक्ता-अत्रि-वारिचर-धर्मपट्टन-द्वीपाः।

१४.१४ गणराज्य-कृष्ण-वेल्लूर-पिशिक-शूर्पाद्रि-कुसुमनगाः॥

१४.१५ तुम्बवन-*कार्मणयक[K.ऊ.कार्मणेयक]-याम्योदधि-तापसाश्रमा ऋषिकाः।

१४.१५ काञ्ची-मरुचीपट्टन-चेर्य्-आर्यक-सिंहला ऋषभाः॥

१४.१६ बलदेवपट्टनं दण्डकावन-तिमिङ्गिलाशना भद्राः।

१४.१६ कच्छो -अथ कुञ्जरदरी सताम्रपर्णी-इति विज्ञेयाः॥

१४.१७ नैरृत्यां दिशि देशाः पह्लव-काम्बोज-सिन्धुसौवीराः।

१४.१७ वडवामुख-अरव-अम्बष्ठ-कपिल-नारीमुख-आनर्ताः॥

१४.१८ फेणगिरि-यवन-*मार्गर[K.माकर]-कर्णप्रावेय-पारशव-शूद्राः।

१४.१८ बर्बर-किरात-खण्ड-*क्रव्याद[K.क्रव्याश्या]-आभीर-चञ्चूकाः॥

१४.१९ हेमगिरि-सिन्धु-कालक-रैवतक-सुराष्ट्र-बादर-द्रविडाः।

१४.१९ स्वात्य्-आद्ये भत्रितये ज्ञेयश् च महार्णवो -अत्र-एव॥

१४.२० अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणो -अस्तगिरिः।

१४.२० अपरान्तक-शान्तिक-हैहय-प्रशस्ताद्रि-वोक्काणाः॥

१४.२१ पञ्चनद-रमठ-पारत-तारक्षिति-जृङ्ग-वैश्य-कनक-शकाः।

१४.२१ निर्मर्यादा म्लेच्छा ये पश्चिम-दिक्-स्थितास् ते च॥

१४.२२ दिशि पश्चिमोत्तरस्यां माण्डव्य-*तुषार[K.तुखार]-ताल-हल-मद्राः।

१४.२२ अश्मक-कुलूत-*हलडाः[K.हड]-स्त्रीराज्य-नृसिंहवन-खस्थाः॥

१४.२३ वेणुमती फल्गुलुका गुलुहा मरुकुच्च-चर्मरङ्गाख्याः।

१४.२३ एकविलोचन-शूलिक-दीर्घग्रीव-आस्य-केशाश् च॥

१४.२४ उत्तरतः कैलासो हिमवान् वसुमान् गिरिर् धनुष्मांश् च।

१४.२४ क्रौञ्चो मेरुः कुरवस् तथा-उत्तराः क्षुद्रमीनाश् च॥

१४.२५ कैकय-वसाति-यामुन-भोगप्रस्थ-अर्जुनायन-अग्रीध्राः।

१४.२५ *आदरान्तर्द्वीपि[K.ऊ.आदर्शान्तद्वीपि]-त्रिगर्त-*तुरगाननाः श्वमुखाः[K.तुरगाननाश्वमुखाः]॥
१४.२६ केशधर-चिपिटनासिक-दासेरक-वाटधान-शरधानाः।

१४.२६ तक्षशिल-पुष्कलावत-कैलावत-कण्ठधानाश् च॥

१४.२७ अम्बर-मद्रक-मालव-पौरव-कच्छार-दण्ड-पिङ्गलकाः।

१४.२७ माणहल-हूण-कोहल-शीतक-माण्डव्य-भूतपुराः॥

१४.२८ गान्धार-यशोवति-हेमताल-राजन्य-खचर-गव्याश् च।

१४.२८ यौधेय-दासमेयाः श्यामाकाः क्षेमधूर्ताश् च॥

१४.२९ ऐशान्यां मेरुक-नष्टराज्य-पशुपाल-कीर-काश्मीराः।

१४.२९ अभिसार-दरद-तङ्गण-कुलूत-*सैरिन्ध्र[K.सैरिन्ध]-वनराष्ट्राः॥

१४.३० ब्रह्मपुर-दार्व-डामर-वनराज्य-किरात-चीन-कौणिन्दाः।

१४.३० *भल्लाः पटोल[K.भल्लापलोल]-जटासुर-*कुनटखस[K.कुनठखष]-घोष-कुचिकाख्याः॥

१४.३१ एकचरण-*अनुविद्धाः[K.अनुविश्वाः] सुवर्णभूर् *वसुधनं[K.वसुवनं] दिविष्ठाश् च।

१४.३१ पौरव-*चीरनिवासि[K.चीरनिवासन]-त्रिनेत्र-मुञ्जाद्रि-*गान्धर्वाः[K.गन्धर्वाः]॥

१४.३२ वर्गैर् आग्नेयाद्यैः क्रूरग्रह-पीडितैः क्रमेण नृपाः।

१४.३२ पाञ्चालो मागधिकः कालिङ्गश् च क्षयं यान्ति॥

१४.३३ आवन्तो -अथ-आनर्तो मृत्युं च-आयाति सिन्धुसौवीरः।

१४.३३ राजा च हारहौरो मद्रेशो -अन्यश् च कौणिन्दः॥

१५ नक्षत्रव्यूहाध्यायः

१५.०१ आग्नेये सितकुसुम-आहिताग्नि-मन्त्रज्ञ-सूत्र-भाष्य-ज्ञाः।

१५.०१ आकरिक-नापित-द्विज-घटकार-पुरोहित-अब्दज्ञाः॥

१५.०२ रोहिण्यां सुव्रत-पण्य-भूप-धनि-योग-युक्त-शाकटिकाः।

१५.०२ गो-वृष-जलचर-कर्षक-शिलोच्चय-ऐश्वर्यसम्पन्नाः॥

१५.०३ मृगशिरसि सुरभि-वस्त्र-अब्ज-कुसुम-फल-रत्न-वनचर-विहङ्गाः।

१५.०३ मृग-सोमपीथि-गान्धर्व-कामुका लेखहाराश् च॥

१५.०४ रौद्रे वध-बन्ध-आनृत-परदार-स्तेय-शाठ्य-भेद-रताः।

१५.०४ तुषधान्य-तीक्ष्ण-मन्त्र-अभिचार-वेतालकर्मज्ञाः॥

१५.०५ आदित्ये सत्य-औदार्य-शौच-कुल-रूप-धी-यशो-अर्थ-युताः।

१५.०५ उत्तमधान्यं वणिजः सेवाभिरताः सशिल्पिजनाः॥

१५.०६ पुष्ये यव-गोधूमाः शालि-इक्षु-वनानि मन्त्रिणो भूपाः।

१५.०६ सलिलोपजीविनः साधवश् च यज्ञ-इष्टि-सक्ताश् च॥

१५.०७ अहिदेवे कृत्रिम-कन्द-मूल-फल-कीट-पन्नग-विषाणि।

१५.०७ पर-धन-हरण-अभिरतास् तुषधान्यं सर्वभिषजश् च॥

१५.०८ पित्र्ये धन-धान्य-आढ्याः कोष्ठागाराणि पर्वताश्रयिणः।

१५.०८ पितृ-भक्त-वणिक्-शूराः क्रव्यादाः स्त्री-द्विषो मनुजाः॥

१५.०९ प्राक्फल्गुनीषु नट-युवति-सुभग-गान्धर्व-शिल्पि-पण्यानि।

१५.०९ कर्पास-लवण-*मक्षिक[K.ऊ.माक्षिक]-तैलानि कुमारकाश् च-अपि॥

१५.१० आर्यम्णे मार्दव-शौच-विनय-*पाखण्डि[K.पाषण्डि]-दान-शास्त्र-रताः।

१५.१० शोभन-धान्य-महाधन-कर्मानुरताः समनुजेन्द्राः॥

१५.११ हस्ते तस्कर-कुञ्जर-रथिक-महामात्र-शिल्पि-पण्यानि।

१५.११ तुषधान्यं शुतयुक्ता वणिजस् तेजोयुताश् च-अत्र॥

१५.१२ त्वाष्ट्रे भूषण-मणि-राग-लेख्य-गान्धर्व-गन्ध-युक्ति-ज्ञाः।

१५.१२ गणितपटु-तन्तुवायाः शालाक्या राजधान्यानि॥

१५.१३ स्वातौ खग-मृग-तुरगा वणिजो धान्यानि वातबहुलानि।

१५.१३ अस्थिर-सौहृद-लघु-सत्त्व-तापसाः पण्य-कुशलाश् च॥

१५.१४ इन्द्राग्निदैवते रक्त-पुष्प-फल-शाखिनः स-तिल-मुद्गाः।

१५.१४ कर्पास-माष-चणकाः पुरन्दर-हुताश-भक्ताश् च॥

१५.१५ मैत्रे शौर्यसमेता गणनायक-साधु-गोष्ठि-यान-रताः।

१५.१५ ये साधवश् च लोके सर्वं च शरत्समुत्पन्नम्॥

१५.१६ पौरन्दरे -अतिशूराः कुल-वित्त-यशो--अन्विताः परस्वहृतः।

१५.१६ विजिगीषवो नरेन्द्राः सेनानां च-अपि नेतारः॥

१५.१७ मूले भेषज-भिषजो गणमुख्याः कुसुम-मूल-फल-*वार्ताः[K.वार्त्ताः]।

१५.१७ बीजान्य् अतिधनयुक्ताः फलमूलैर् ये च वर्तन्ते॥

१५.१८ आप्ये मृदवो जलमार्गगामिनः सत्य-शौच-धन-युक्ताः।

१५.१८ सेतुकर-वारि-जीवक-फल-कुसुमान्य् अम्बुजातानि॥

१५.१९ विश्वेश्वरे महामात्र-मल्ल-करि-तुरग-देवता-*सक्ताः[K.भक्ताः]।

१५.१९ स्थावर-योधा भोगान्विताश् च ये *तेजसा[K.चौजसा] युक्ताः॥

१५.२० श्रवणे मायापटवो नित्योद्युक्ताश् च कर्मसु समर्थाः।

१५.२० उत्साहिनः सधर्मा भागवताः सत्यवचनाश् च॥

१५.२१ वसुभे मानोन्मुक्ताः *क्लीब[K.क्लीबाश्]-अचलसौहृदाः स्त्रियां *द्वेष्याः[K.द्वष्याः, Kऽस् त्र्. द्वेष्याः]।

१५.२१ दानाभिरता बहुवित्तसंयुताः शमपराश् च नराः॥

१५.२२ वरुणेशे पाशिक-मत्स्य-बन्ध-जलजानि जलचराजीवाः।

१५.२२ सौकरिक-रजक-शौण्डिक-शाकुनिकाश् च-अपि वर्गे -अस्मिन्॥

१५.२३ आजे तस्कर-पशुपाल-हिंस्र-कीनाश-नीच-शठ-चेष्टाः।

१५.२३ धर्म-व्रतैर् विरहिता नियुद्ध-कुशलाश् च ये मनुजाः॥

१५.२४ *आहिर्बुध्न्ये[K.आहिर्बुध्न्यु] विप्राः क्रतु-दान-तपो-युता महाविभवाः।

१५.२४ आश्रमिणः *पाखण्डा[K.पाषण्डा] नरेश्वराः सारधान्यं च॥

१५.२५ पौष्णे सलिलज-फल-कुसुम-लवण-मणि-शङ्ख-मौक्तिक-अब्जानि।

१५.२५ सुरभि-कुसुमानि गन्धा वणिजो नौकर्णधाराश् च॥

१५.२६ अश्विन्याम् अश्वहराः सेनापति-वैद्य-सेवकास् तुरगाः।

१५.२६ *तुरगारोहा वणिजो[K.तुरगारोहाश् च वनिग्] रूपोपेतास् तुरगरक्षाः॥

१५.२७ याम्ये -असृक्-पिशित-भुजः क्रूरा वध-बन्ध-ताडन-आसक्ताः।

१५.२७ तुषधान्यं नीचकुलोद्भवा विहीनाश् च सत्त्वेन॥

१५.२८ पूर्वात्रयं सानलम् अग्रजानां राज्ञां तु पुष्येण सहोत्तराणि।

१५.२८ सपौष्ण-मैत्रं पितृदैवतं च प्रजापतेर् भं च कृषीवलानाम्॥

१५.२९ आदित्य-हस्त-अभिजिद्-आश्विनानि वणिग्जनानां प्रवदन्ति *तानि[K.भानि]।

१५.२९ मूल-त्रिनेत्र-अनिल-वारुणानि भान्य् उग्रजातेः *प्रभविष्णुतायाः[K.प्रभविष्णुतायाम्]॥

१५.३० सौम्य-ऐन्द्र-चित्रा-वसुदैवतानि सेवाजन-स्वाम्यम् उपागतानि।

१५.३० सार्प विशाखा श्रवणो भरण्यश् चण्डालजातेर् *अभिनिर्दिशन्ति[K.इति निर्दशन्ति]॥

१५.३१ रवि-रविसुत-भोगम् आगतं क्षितिसुत-भेदन-वक्र-दूषितम्।

१५.३१ ग्रहणगतम् अथ-उल्कया हतं नियतम् उषाकर-पीडितं च यत्॥

१५.३२ तद् उपहतम् इति प्रचक्षते प्रकृति-विपर्यय-यातम् एव वा।

१५.३२ निगदित-परिवर्ग-दूषणं कथित-विपर्ययगं समृद्धये॥

१६ ग्रहभक्तियोगाध्यायः

१६.०१ प्राङ् नर्मदार्ध-शोण-उड्र-वङ्ग-सुह्माः कलिङ्ग-बाह्लीकाः।

१६.०१ शक-यवन-मगध-शबर-प्राग्ज्योतिष-चीन-काम्बोजाः॥

१६.०२ मेकल-किरात-विटका बहिर्-अन्तः-शैलजाः पुलिन्दाश् च।

१६.०२ द्रविडानां प्रागर्धं दक्षिणकूलं च यमुनायाः॥

१६.०३ चम्प-उदुम्बर-कौशाम्बि-चेदि-विन्ध्याटवी-कलिङ्गाश् च।

१६.०३ पुण्ड्रा गोलाङ्गूल-श्रीपर्वत-*वर्धमानानि[K.वर्धमानाश् च]॥

१६.०४ इक्षुमती-इत्य् अथ तस्कर-पारत-कान्तार-गोप-बीजानाम्।

१६.०४ तुषधान्य-कटुक-तरु-कनक-दहन-विष-समरशूराणाम्॥

१६.०५ भेषज-भिषक्-चतुष्पद-कृषिकर-नृप-हिंस्र-यायि-चौराणाम्।

१६.०५ व्याल-अरण्य-यशोयुत-तीक्ष्णाणां भास्करः स्वामी॥

१६.०६ गिरि-सलिल-दुर्ग-कोशल-भरुकच्छ-समुद्र-रोमक-*तुषाराः[K.तुखाराः]।

१६.०६ वनवासि-तङ्गण-हल-स्त्रीराज्य-महार्णवद्वीपाः॥

१६.०७ मधुररस-कुसुम-फल-सलिल-लवण-मणि-शङ्ख-मौक्तिक-अब्जानाम्।

१६.०७ शालि-यव-औषधि-गोधूम-सोमप-आक्रन्द-विप्राणाम्॥

१६.०८ सित-सुभग-तुरग-रतिकर-युवति-चमूनाथ-भोज्य-वस्त्राणाम् ।

१६.०८ शृङ्गि-निशाचर-कार्षक-यज्ञविदां च-अधिपश् चन्द्रः॥

१६.०९ शोणस्य नर्मदाया भीमरथायाश् च पश्चिमार्धस्थाः ।

१६.०९ निर्विन्ध्या वेत्रवती सिप्रा गोदावरी वेणा॥

१६.१० मन्दाकिनी पयोष्णी महानदी सिन्धु-मालती-पाराः ।

१६.१० उत्तरपाण्ड्य-महेन्द्राद्रि-विन्ध्य-मलय-उपगाश् चोलाः॥

१६.११ द्रविड-विदेह-अन्ध्र-अश्मक-*भासापर[K.भासापुर]-कौङ्कणाः समन्त्रिषिकाः ।

१६.११ कुन्तल-केरल-दण्डक-कान्तिपुर-म्लेच्छ-*सङ्करिणः[K.सङ्करजाः] ॥

[K.१६.१२ नासिक्यभोगवर्धनविराटविन्ध्याद्रिपार्श्वगा देशाः ।

K.१६.१२ ये च पिबन्ति सुतोयां तापीं ये च अपि गोमतीसलिलम् ॥]

१६.१२ नागर-कृषिकर-पारत-हुताशनाजीवि-*शस्त्र-वार्तानाम्[K.शस्त्र-वार्त्तानाम्] ।

१६.१२ आटविक-दुर्ग-कर्वट-*वधिक[K.वधक]-नृशंस-अवलिप्तानाम्॥

१६.१३ नरपति-कुमार-कुञ्जर-दाम्भिक-डिम्भाभिघात-पशुपानाम् ।

१६.१३ रक्त-फल-कुसुम-विदुम-चमूप-गुड-मद्य-तीक्ष्णानाम्॥

१६.१४ कोश-भवन-आग्निहोत्रिक-धात्वाकर-शाक्य-भिक्षु-चौराणाम् ।

१६.१४ शठ-दीर्घवैर-बह्वाशिनां च वसुधासुतो -अधिपतिः॥

१६.१५ लोहित्यः सिन्धुनदः सरयूर् गाम्भीरिका रथाख्या च ।

१६.१५ गङ्गा-कौशिक्य्-आद्याः सरितो वैदेह-काम्बोजाः॥

१६.१६ मथुरायाः पूर्वार्धं हिमवद्-गोमन्त-चित्रकूट-स्थाः ।

१६.१६ सौराष्ट्र-सेतु-जलमार्ग-पण्य-बिल-पर्वत-आश्रयिणः॥

१६.१७ उदपान-यन्त्र-गान्धर्व-लेख्य-मणि-राग-गन्ध-युक्ति-विदः ।

१६.१७ आलेख्य-शब्द-गणित-प्रसाधक-आयुष्य-शिल्पज्ञाः॥

१६.१८ चरपुरुष-कुहकजीवक-शिशु-कवि-शठ-सूचक-अभिचार-रताः।

१६.१८ दूत-नपुंसक-हास्यज्ञ-भूततन्त्र-इन्द्रजाल-ज्ञाः॥

१६.१९ आरक्षक-नट-नर्तक-घृत-तैल-स्नेह-बीज-तिक्तानि।

१६.१९ व्रतचारि-रसायन-कुशल-वेसराश् चन्द्रपुत्रस्य॥

१६.२० सिन्धुनद-पूर्वभागो मथुरा-पश्चार्ध-भरत-सौवीराः।

१६.२० सुघ्न-*औदीच्य[K.उदीच्य]-विपाशा-सरित्-शतद्रू रमठ-*शाल्वाः[K.साल्वाः]॥

१६.२१ त्रैगर्त-*पौरव[K.पौरब]-अम्बष्ठ-पारता वाटधान-यौधेयाः।

१६.२१ सारस्वत-अर्जुनायन-मत्स्यार्ध-ग्रामराष्ट्राणि॥

१६.२२ हस्त्य्-अश्व-पुरोहित-भूप-मन्त्रि-माङ्गल्य-पौष्टिक-आसक्ताः।

१६.२२ कारुण्य-सत्य-शौच-व्रत-विद्या-दान-धर्म-युताः॥

१६.२३ पौर-महाधन-शब्द-अर्थ-वेदविदुषो -अभिचार-नीति-ज्ञाः।

१६.२३ मनुजेश्वर-उपकरणम् छत्र-ध्वज-चामर-आद्यं च॥

१६.२४ शैलेय-कुष्ठ[K.कष्ठ]-मांसी-तगर-रस-सैन्धवानि वल्लीजम्।

१६.२४ मधुर-रस-मधूच्छिष्टानि चोरकश् च-इति जीवस्य॥

१६.२५ तक्षशिल-*मर्तिकावत[K.ऊ.मार्तिकावत]-बहुगिरि-गान्धार-पुष्कलावतकाः।

१६.२५ प्रस्थल-मालव-कैकय-दाशार्ण-उशीनराः शिबयः॥

१६.२६ ये च पिबन्ति वितस्ताम् इरावतीं चन्द्रभाग-सरितं च।

१६.२६ रथ-रजत-आकर-कुञ्जर-तुरग-महामात्र-धनयुक्ताः॥

१६.२७ सुरभि-कुसुम-अनुलेपन-मणि-वज्र-विभूषण-अम्बुरुह-शय्याः।

१६.२७ वर-तरुण-युवति-काम-उपकरण-मृष्टान्न-मधुर-भुजः॥

१६.२८ उद्यान-सलिल-कामुक-यशः-सुख-औदार्य-रूप-सम्पन्नाः।

१६.२८ विद्वद्-अमात्य-वणिग्जन-घटकृच्-चित्राण्डजास् त्रिफलाः॥

१६.२९ कौशेयपट्ट-कम्बल-पत्रौर्णिक-रोध्र-पत्र-चोचानि।

१६.२९ जातीफल-अगुरु-वचा-पिप्पल्यश् चन्दनं च भृगोः॥

१६.३० आनर्त-आर्बुद-पुष्कर-सौराष्ट्र-आभीर-शूद्र-रैवतकाः।

१६.३० नष्टा यस्मिन् देशे सरस्वती पश्चिमो देशः।

१६.३१ कुरुभूमिजाः प्रभासं विदिशा वेदस्मृती महीतटजाः।

१६.३१ खल-मलिन-नीच-तैलिक-विहीनसत्त्व-उपहत-पुंस्त्वाः॥

१६.३२ *बान्धन[K.बन्धन]-शाकुनिक-अशुचि-कैवर्त-विरूप-वृद्ध-सौकरिकाः।

१६.३२ गणपूज्य-स्खलित-व्रत-शबर-पुलिन्द-अर्थपरिहीनाः।

१६.३३ कटु-तिक्त-रसायन-विधवयोषितो भुजग-तस्कर-महिष्यः।

१६.३३ खर-करभ-चणक-*वातल[K.वातुल]-निष्पावाश् च-अर्कपुत्रस्य॥

१६.३४ गिरिशिखर-कन्दर-दरी-विनिविष्टा म्लेच्छजातयः शूद्राः।

१६.३४ गोमायु-भक्ष-शूलिक-वोक्काण-अश्वमुख-विकलाङ्गाः।

१६.३५ कुलपांसन-हिंस्र-कृतघ्न-चौर-निःसत्य-शौच-दानाश् च।

१६.३५ खर-चर-नियुद्धवित्-तीव्ररोष-*गर्त्ताश्रया[K.गर्भाशया] नीचाः॥

१६.३६ उपहत-दाम्भिक-राक्षस-निद्राबहुलाश् च जन्तवः सर्वे।

१६.३६ धर्मेण च संत्यक्ता माष-तिलाश् च-अर्कशशित्रोः॥

१६.३७ गिरिदुर्ग-पह्लव-श्वेत-हूण-चोल-आवगाण-मरु-चीनाः।

१६.३७ प्रत्यन्त-धनि-महेच्छ-व्यवसाय-पराक्रमोपेताः॥

१६.३८ परदार-विवाद-रताः पररन्ध्र-कुतूहला मद-उत्सिक्ताः।

१६.३८ मूर्खा-अधार्मिक-विजिगीषवश् च केतोः समाख्याताः॥

१६.३९अ उदयसमये यः स्निग्धांशुर् महान् प्रकृतिस्थितो

१६.३९ब् यदि च न हतो निर्घात-उल्का-रजो-ग्रहमर्दनैः।

१६.३९च् स्वभवन-गतः स्वोच्च-प्राप्तः शुभग्रह-वीक्षितः

१६.३९द् स भवति शिवस् तेषां येषां प्रभुः परिकीर्तितः॥

१६.४० अभिहित-विपरीत-*लक्षणे[K.लक्षनैः] क्षयम् उपगच्छति तत्परिग्रहः।

१६.४० डमर-भय-गद-आतुरा जना नरपतयश् च भवन्ति दुःखिताः॥

१६.४१ यदि न रिपुकृतं भयं नृपाणां स्वसुत-कृतं नियमाद् अमात्यजं वा।

१६.४१ भवति जनपदस्य च-अप्य् अवृष्ट्या गमनम् अपूर्वपुर-अद्रि-निम्नगासु॥

१७ ग्रहयुद्धाध्यायः।

१७.०१ युद्धं यथा यदा वा *भविष्यम्[K.भविष्यद्] आदिश्यते त्रिकालज्ञैः।

१७.०१ तद्विज्ञानं करणे मया कृतं सूर्य-*सिद्धान्ते[K.सिद्धान्तात्]॥

१७.०२ वियति चरतां ग्रहाणाम् उपर्युपर्य् आत्ममार्गसंस्थानाम्।

१७.०२ अतिदूराद् दृग्विषये समताम् इव सम्प्रयातानाम्॥

१७.०३ आसन्न-क्रम-योगाद् भेद-उल्लेख-अंशु-मर्दन-*असव्यैः[K.असव्यः]।

१७.०३ युद्धं चतुष्प्रकारं पराशर-आद्यैर् मुनिभिर् उक्तम्॥

१७.०४ भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानां च।

१७.०४ उल्लेखे शस्त्र-भयं मन्त्रिविरोधः प्रियान्नत्वम्॥

१७.०५ अम्शुविरोधे युद्धानि भूभृतां शस्त्र-रुक्-क्षुद्-अवमर्दाः।
१७.०५ युद्धे च-अप्य् अपसव्ये भवन्ति युद्धानि भूपानाम्॥

१७.०६ रविर् आक्रन्दो मध्ये पौरः पूर्वे -अपरे स्थितो यायी।

१७.०६ पौरा बुध-गुरु-रविजा नित्यं शीतांशुर् *आक्रन्दः[K.आक्रन्द्रः]॥

१७.०७ केतु-कुज-राहु-शुक्रा यायिन एते हता *घ्नन्ति[K.ग्रहा हन्युः]।

१७.०७ आक्रन्द-यायि-पौरान् जयिनो *जयदाः[K.जयदा] स्व-वर्गस्य॥

१७.०८ पौरे पौरेण हते पौराः पौरान् नृपान् विनिघ्नन्ति।

१७.०८ एवं *याय्याक्रन्दा[K.याय्याक्रन्दौ] नागर-यायि-ग्रहाश् च-एव॥

१७.०९ दक्षिणदिक्स्थः परुषो वेपथुर् अप्राप्य सन्निवृत्तो -अणुः।

१७.०९ अधिरूढो विकृतो निष्प्रभो विवर्णश् च यः स जितः॥

१७.१० उक्तविपरीतलक्षणसम्पन्नो जयगतो *विनिर्देश्यः[K.विनिर्दिष्टः]।

१७.१० विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थो -अपि जययुक्तः॥

१७.११ द्वाव् अपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः।

१७.११ तत्र *अन्योन्यं प्रीतिर्[K.अन्योन्यप्रीतिर्] विपरीताव् आत्मपक्षघ्नौ॥

१७.१२ युद्धं समागमो वा यद्य् अव्यक्तौ *स्वलक्षणैर्[K.तु लक्षणैर्] भवतः।

१७.१२ भुवि भूभृताम् अपि तथा फलम् अव्यक्तं विनिर्देश्यम्॥

१७.१३ गुरुणा जिते -अवनिसुते बाह्लीका यायिनो *-अग्निवार्ताश् च[K.अग्निवार्त्ताश् च]।

१७.१३ शशिजेन शूरसेनाः कलिङ्ग-*शाल्वाश्[K.साल्वाश्] च पीड्यन्ते॥

१७.१४ सौरेण-अरे विजिते जयन्ति पौराः प्रजाश् च सीदन्ति।

१७.१४ *कोष्ठागार[K.कोष्ठागार]-म्लेच्छ-क्षत्रिय-तापश् च शुक्रजिते॥

१७.१५ भौमेन हते शशिजे वृक्ष-सरित्-तापस-अश्मक-नरेन्द्राः।

१७.१५ उत्तरदिक्स्थाः क्रतु-दीक्षिताश् च सन्तापम् आयान्ति॥

१७.१६ गुरुणा *जिते बुधे[K.बुधे जिते] म्लेच्छ-शूद्र-चौर-अर्थयुक्त-पौरजनाः।

१७.१६ त्रैगर्तपार्वतीयाः पीड्यन्ते कम्पते च मही॥

१७.१७ रविजेन बुधे ध्वस्ते नाविक-योध-अब्ज-सधन-गर्भिण्यः।

१७.१७ भृगुणा जिते -अग्निकोपः सस्य-अम्बुद-यायि-विध्वंसः॥

१७.१८ जीवे शुक्र-अभिहते कुलूत-गान्धार-कैकया मद्राः।

१७.१८ *शाल्वा[K.साल्वा] वत्सा वङ्गा गावः सस्यानि *पीड्यन्ते[K.नश्यन्ति]॥

१७.१९ भौमेन हते जीवे मध्यो देशो नरेश्वरा गावः।

१७.१९ सौरेण च-अर्जुनायन-वसाति-यौधेय-शिबि-विप्राः॥

१७.२० शशितनयेन-अपि जिते बृहस्पतौ म्लेच्छ-सत्य-शस्त्र-भृतः।

१७.२० उपयान्ति मध्यदेशश् च संक्षयं यच् च भक्तिफलम्॥

१७.२१ शुक्रे बृहस्पति-*जिते[K.हते] यायी श्रेष्ठो विनाशम् उपयाति।

१७.२१ ब्रह्मक्षत्रविरोधः सलिलं च न वासवस् त्यजति॥

१७.२२ कोशल-कलिङ्ग-वङ्गा वत्सा मत्स्याश् च मध्यदेश-युताः।

१७.२२ महतीं व्रजन्ति पीडां नपुंसकाः शूरसेनाश् च॥

१७.२३ कुज-विजिते भृगु-तनये बल-मुख्य-वधो नरेन्द्र-संग्रामाः।

१७.२३ सौम्येन पार्वतीयाः क्षीरविनाशो -अल्पवृष्टिश् च॥

१७.२४ रविजेन सिते विजिते *गुणमुख्याः[U - गणमुख्याः] शस्त्र-जीविनः क्षत्रम्।

१७.२४ जलजाश् च निपीड्यन्ते सामान्यं भक्तिफलम् अन्यत्॥

१७.२५ असिते सितेन निहते -अर्घ-वृद्धिर् अहि-विहग-मानिनां पीडा।

१७.२५ क्षितिजेन तङ्गण-अन्ध्र-उड्र-काशि-बाह्लीक-देशानाम्॥

१७.२६ सौम्येन पराभूते मन्दे -अङ्ग-वणिग्-विहङ्ग-पशु-नागाः।

१७.२६ सन्ताप्यन्ते गुरुणा स्त्री-बहुला महिषक-शकाश् च॥

१७.२७ अयं विशेषो -अभिहितो हतानां कुज-ज्ञ-वागीश-सित-असितानाम्।

१७.२७ फलं तु वाच्यं ग्रह-भक्तितो -अन्यद् यथा तथा घ्नन्ति हताः स्वभक्तीः॥

१८ शशिग्रहसमागमाध्यायः

१८.०१ भानां यथासम्भवम् उत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः।

१८.०१ प्रदक्षिणं तत्-*शुभदं नृपाणां[K.शुभकृन्नराणां] याम्येन यातो न शिवः शशाङ्कः॥

१८.०२ चन्द्रमा यदि कुजस्य यात्य् उदक् पार्वतीय-बलशालिनां जयः।

१८.०२ क्षत्रियाः प्रमुदिताः सयायिनो भूरि-धान्य-मुदिता वसुन्धरा॥

१८.०३ उत्तरतः स्वसुतस्य शशाङ्कः पौर-जयाय सुभिक्ष-करश् च।

१८.०३ सस्य-चयं कुरुते जनहार्दिं कोश-चयं च नराधिपतीनाम्॥

१८.०४ बृहस्पतेर् उत्तरगे शशाङ्के पौर-द्विज-क्षत्रिय-पण्डितानाम्।

१८.०४ धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश् च॥

१८.०५ भार्गवस्य यदि यात्य् उदक् शशी कोश-युक्त-गज-वाजि-वृद्धिदः।

१८.०५ यायिनां च विजयो धनुष्मतां सस्यसम्पद् अपि च-उत्तमा तदा॥

१८.०६ रविजस्य शशी प्रदक्षिणं कुर्याच् चेत् पुरभूभृतां जयः।

१८.०६ शक-बाह्लिक-सिन्धु-पह्लवा *मुदभाजो[K.मुद्भाजो] यवनैः समन्विताः॥

१८.०७ येषाम् उदग् गच्च्छति भग्रहाणां प्रालेयरश्मिर् निरुपद्रवश् च।

१८.०७ तद्-द्रव्य-पौर-इतर-भक्ति-देशान् पुष्णाति याम्येन निहन्ति तानि॥

१८.०८अ शशिनि फलम् *उदक्स्थे[K.उदकस्थे] यद् ग्रहस्य-उपदिष्टं

१८.०८ब् भवति तद् अपसव्ये सर्वम् एव प्रतीपम्।

१८.०८च् इति शशिसमवायाः *कीर्तिता[K.कीर्त्तिता] भग्रहाणां

१८.०८द् न खलु भवति युद्धं साकम् इन्दोर् ग्रह-ऋक्षैः॥

१९ ग्रहवर्षफलाध्यायः

१९.०१अ सर्वत्र भूर् विरलसस्ययुता वनानि

१९.०१ब् दैवाद् बिभक्षयिषुदंष्ट्रिसमावृतानि।

१९.०१च् *नद्यश्[K.स्यन्दन्ति] च नैव *हि[K.च] पयः प्रचुरं *स्रवन्ति[K.स्रवन्त्यो]

१९.०१द् रुग्भेषजानि न तथातिबलान्वितानि॥

१९.०२अ तीक्ष्णं तपत्य् अदितिजः शिशिरे -अपि काले

१९.०२ब् नात्यम्बुदा जलमुचो -अचलसन्निकाशाः।

१९.०२च् नष्टप्रभ-ऋक्षगण-शीत-करं नभश् च

१९.०२द् सीदन्ति तापसकुलानि सगोकुलानि॥

१९.०३अ हस्त्य्-अश्व-पत्तिमद् असह्यबलैर् उपेता

१९.०३ब् बाण-आसन-असि-मुशल-अतिशयाश् चरन्ति।

१९.०३च् घ्नन्तो नृपा युधि नृप-अनुचरैश् च देशान्

१९.०३द् संवत्सरे दिनकरस्य दिने -अथ मासे॥

१९.०४अ व्याप्तं नभः प्रचलित-अचल-सन्निकाशैर्

१९.०४ब् व्याल-अञ्जन-अलि-गवल-च्छविभिः पयोदैः।

१९.०४च् गां पूरयद्भिर् अखिलाम् अमलाभिर् अद्भिर्

१९.०४द् *उत्कण्ठितेन[K.उत्कण्ठकेन] गुरुणा ध्वनितेन चाशाः॥

१९.०५अ तोयानि पद्म-कुमुद-उत्पलवन्त्य् अतीव

१९.०५ब् फुल्लद्रुमाण्य् उपवनान्य् अलिनादितानि।

१९.०५च् गावः प्रभूतपयसो नयनाभिरामा

१९.०५द् रामा रतैर् अविरतं रमयन्ति रामान्॥

१९.०६अ गोधूम-शालि-यव-धान्य-वर-इक्षु-वाटा

१९.०६ब् भूः पाल्यते नृपतिभिर् नगर-आकर-आढ्या।

१९.०६च् चित्यङ्किता क्रतुवरेष्टिविघुष्टनादा

१९.०६द् संवत्सरे शिशिरगोर् अभिसम्प्रवृत्ते॥

१९.०७अ वातोद्धतश् चरति वह्निर् अतिप्रचण्डो

१९.०७ब् ग्रामान् वनानि नगराणि च सन्दिधक्षुः।

१९.०७च् हाहा-इति दस्युगणपातहता रटन्ति

१९.०७द् निःस्वीकृता विपशवो भुवि मर्त्यसंघाः॥

१९.०८अ अभ्युन्नता वियति संहतमूर्तयो -अपि

१९.०८ब् मुञ्चन्ति *कुत्र चिद्[K.न क्व चिद्] अपः प्रचुरं पयोदाः।

१९.०८च् सीम्नि प्रजातम् अपि शोषम् उपैति सस्यं

१९.०८द् निष्पन्नम् अप्य् अविनयाद् अपरे हरन्ति॥

१९.०९अ भूपा न सम्यगभिपालनसक्तचित्ताः

१९.०९ब् पित्तोत्थरुक्प्रचुरता भुजगप्रकोपः।

१९.०९च् एवंविधैर् *उपहता[K.ऊ.उपहता] भवति प्रजा-इयं

१९.०९द् संवत्सरे -अवनिसुतस्य विपन्नसस्या॥

१९.१०अ माया-इन्द्रजाल-कुहक-आकर-नागराणां

१९.१०ब् गान्धर्व-लेख्य-गणित-अस्त्रविदां च वृद्धिः।

१९.१०च् पिप्रीषया नृपतयो -अद्भुतदर्शनानि

१९.१०द् दित्सन्ति तुष्टिजननानि परस्परेभ्यः॥

१९.११अ *वार्ता[K.वार्त्ता] जगत्य् अवितथा विकला त्रयी च

१९.११ब् सम्यक् चरत्य् अपि मनोर् इव दण्डनीतिः।

१९.११च् *अध्यक्षर[K.अध्यक्षरं]स्वभिनिविष्टधियो *-अपि[K.अत्र] के चिद्

१९.११द् आन्वीक्षिकीषु च परं पदमीहमानाः॥

१९.१२अ हास्यज्ञ-दूत-कवि-बाल-नपुंसकानां

१९.१२ब् युक्तिज्ञ-सेतु-जल-पर्वत-वासिनां च।

१९.१२च् हार्दिं करोति मृगलाञ्छनजः स्वके -अब्दे

१९.१२द् मासे -अथ वा *प्रचुरता[K.प्रचुरतां] भुवि च-औषधीनाम्॥

१९.१३अ ध्वनिर् उच्चरितो -अध्वरे द्युगामी

१९.१३ब् विपुलो यज्ञमुषां मनांसि भिन्दन्।

१९.१३च् विचरत्य् अनिशं द्विजोत्तमानां

१९.१३द् हृदय-आनन्द-करो -अध्वरांशभाजाम्॥

१९.१४ क्षितिर् उत्तम-सस्यवत्य् अनेक-द्विप-पत्त्य्-अश्व-धन-उरु-गोकुल-आढ्या।

१९.१४ क्षितिपैर् अभिपालनप्रवृद्धा द्युचरस्पर्धिजना तदा विभाति॥

१९.१५ विविधैर् वियद् उन्नतैः पयोदैर् वृतम् उर्वीं पयसाभितर्पयद्भिः।

१९.१५ सुरराजगुरोः शुभे *तु[K.अत्र] वर्षे बहुसस्या क्षितिर् उत्तम-ऋद्धियुक्ता॥

१९.१६अ शालि-इक्षुमत्य् अपि धरा धरणीधर-आभ-

१९.१६ब् धाराधर-उज्झित-पयः-परिपूर्ण-वप्रा।

१९.१६च् श्रीमत्-सरोरुह-तत-अम्बु-तडाग-कीर्णा

१९.१६द् योषा-इव भात्य् अभिनव-आभरण-उज्ज्वल-अङ्गी॥

१९.१७अ क्षत्रं क्षितौ क्षपित-भूरि-बल-अरि-पक्षम्

१९.१७ब् उद्धुष्ट-नैक-जय-शब्द-विरावितादाशम्।

१९.१७च् संहृष्ट-शिष्ट-जन-दुष्ट-विनष्ट-वर्गां

१९.१७द् गां पालयन्त्य् अवनिपा नगराकराढ्याम्॥

१९.१८अ पेपीयते मधु मधौ सह कामिनीभिर्

१९.१८ब् जेगीयते श्रवणहारि स-वेणु-वीणम्।

१९.१८च् बोभुज्यते -अतिथिसुहृत्स्वजनैः सहान्नम्

१९.१८द् अब्दे सितस्य मदनस्य जयावघोषः॥

१९.१९अ *उद्वृत्त[U - उद्धत]-दस्युगणभूरिरणाकुलानि

१९.१९ब् राष्ट्राण्य् अनेकपशुवित्तविनाकृतानि।

१९.१९च् रोरूयमाण-हत-बन्धुजनैर् जनैश् च

१९.१९द् रोग-उत्तमाकुलकुलानि बुभुक्षया च॥

१९.२०अ वातोद्धताम्बुधरवर्जितम् अन्तरिक्षम्

१९.२०ब् आरुग्णनैकविटपं च धरातलं द्यौः।

१९.२०च् नष्टार्कचन्द्रकिरणातिरजो -अवनद्धा

१९.२०द् तोयाशयाश् च विजलाः सरितो -अपि तन्व्यः॥

१९.२१अ जातानि कुत्र चिद् अतोयतया विनाशम्

१९.२१ब् ऋच्छन्ति पुष्टिम् अपराणि जलोक्षितानि।

१९.२१च् सस्यानि मन्दम् अभिवर्षति *वृत्र-शतुर्[K.वृत्रशत्रौ]

१९.२१द् वर्षे दिवाकरसुतस्य सदा प्रवृत्ते॥

१९.२२अ अणुर् अपटुमयूखो नीचगो -अन्यैर् जितो वा

१९.२२ब् न सकलफलदाता पुष्टिदो -अतो -अन्यथा यः।

१९.२२च् यद् अशुभम् अशुभे -अब्दे मासजं तस्य वृद्धिः

१९.२२द् शुभफलम् अपि च-एवं याप्यम् अन्योन्यतायाम्॥

२० ग्रहशृङ्गाटकाध्यायः

२०.०१ यस्यां दिशि दृश्यन्ते विशन्ति ताराग्रहा रविं सर्वे।

२०.०१ भवति भयं दिशि तस्याम् आयुध-कोप-क्षुधआ-आतङ्कैः॥

२०.०२ चक्र-धनुः-शृङ्गाटक-दण्ड-पुर-प्रास-वज्र-संस्थानाः।

२०.०२ क्षुद्-वृष्टिकरा[K.ऊ.अवृष्टिकरा] लोके समराय च मानव-इन्द्राणाम्॥

२०.०३ यस्मिन् खांशे दृश्या ग्रहमाला दिनकरे दिनान्तगते।

२०.०३ तत्र -अन्यो भवति नृपः परचक्र-उपद्रवश् च महान्॥

२०.०४ *तस्मिन्न्[K.यस्मिन्न्] ऋक्षे कुर्युः समागमं तज्ञनान् ग्रहा हन्युः।

२०.०४ *अविभेदिनः[K.अविभेदनाः] परस्परम् अमलमयूखाः शिवास् तेषाम्॥

२०.०५ ग्रह-संवर्त-समागम-सम्मोह-समाज-सन्निपात-आख्याः।

२०.०५ कोशश् चेत्य् एतेषाम् अभिधास्ये लक्षणं सफलं॥

२०.०६ एक-ऋक्षे चत्वारः सह पौरैर् यायिनो -अथ वा पञ्च।

२०.०६ संवर्तो नाम भवेत्-शिखि-राहुयुतः स सम्मोहः॥

२०.०७ पौरः पौरसमेतो यायी सह यायिना समाजाख्यः।

२०.०७ यम-जीव-सङ्गमे -अन्यो यद्य् आगच्छेत् तदा कोशः॥

२०.०८ उदितः पश्चाद् एकः प्राक् चान्यो यदि स सन्निपाताख्यः।

२०.०८ अविकृततनवः स्निग्धा विपुलाश् च समागमे धन्याः॥

२०.०९ समौ तु संवर्तसमागमाख्यौ सम्मोह-कोशौ भयदौ प्रजानाम्।

२०.०९ *समाजसंज्ञो सुसमा प्रदिष्टा[K.समाज्ञः सुसमः प्रदिष्टो] वैरप्रकोपः खलु सन्निपाते॥

२१ गर्भलक्षणाध्यायः

२१.०१ अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नम् आयत्तम्।

२१.०१ यस्माद् अतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन॥

२१.०२ तल्लक्षणानि मुनिभिर् यानि निबद्धानि तानि दृष्ट्वा-इदम्।

२१.०२ क्रियते गर्ग-पराशर-काश्यप-*वज्र-आदि[K.वात्स्यादि]रचितानि॥

२१.०३ दैवविद् अविहितचित्तो[K.अवहितचित्तो] द्युनिशं यो गर्भलक्षणे भवति।

२१.०३ तस्य मुनेर् इव वाणी न भवति मिथ्याम्बुनिर्देशे॥

२१.०४ किं वातः परम् अन्यत्-*शास्त्रज्यायो[K.शास्त्रं ज्यायो] -अस्ति यद् विदित्वा-एव।
२१.०४ प्रध्वंसिन्य् अपि काले त्रिकालदर्शी कलौ भवति॥

२१.०५ के चिद् वदन्ति *कार्तिक[K.कार्त्तिक]शुक्लान्तम् अतीत्य गर्भदिवसाः स्युः।

२१.०५ न *च[K.तु] तन्मतं बहूनां गर्ग-आदीनां मतं वक्ष्ये॥

२१.०६ *मार्गशिरःसित[K.मार्गशिरशुक्ल]पक्ष-प्रतिपत्-प्रभृति क्षपाकरे -अषाढाम्।

२१.०६ पूर्वां वा समुपगते गर्भाणां लक्षणम् ज्ञेयम्॥

२१.०७ यन्नक्षत्रम् उपगते गर्भश् चन्द्रे भवेत् स चन्द्रवशात्।

२१.०७ पञ्चनवते दिनशते तत्र-एव प्रसवम् आयाति॥

२१.०८ सित-पक्ष-भवाः कृष्णे शुक्ले कृष्णा द्युसम्भवा रात्रौ।

२१.०८ नक्तंप्रभवाश् चाहनि सन्ध्याजाताश् च सन्ध्यायाम्॥

२१.०९ मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश् च।

२१.०९ पौषस्य कृष्ण-पक्षेण निर्दिशेत्-श्रावणस्य सितम्॥

२१.१० माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिम् आयान्ति।

२१.१० माघस्य कृष्ण-पक्षेण निर्दिशेद् भाद्रपदशुक्लम्॥

२१.११ फाल्गुन-शुक्ल-समुत्था भाद्रपदस्य-असिते विनिर्देश्याः।

२१.११ तस्यैव कृष्ण-पक्ष-उद्भवास् तु ये ते -अश्वयुक्-शुक्ले॥

२१.१२ चैत्र-सित-पक्ष-जाताः कृष्णे -अश्वयुजस्य वारिदा गर्भाः।

२१.१२ चैत्र-असित-सम्भूताः *कार्तिक-शुक्ले[K.कार्त्तिकशुक्ले] -अभिवर्षन्ति॥

२१.१३ पूर्व-उद्भूताः पश्चाद् अपरोत्थाः प्राग् भवन्ति जीमूताः।

२१.१३ शेषास्व् अपि दिक्ष्व् एवं विपर्ययो भवति वायोश् च॥

२१.१४ ह्लादि-मृदु-उदक्-शिव-शक्र-दिग्-भवो मारुतो वियद्-विमलम्।

२१.१४ स्निग्ध-सित-बहुल-परिवेष-परिवृतौ हिम-*मयखार्कौ[K.ऊ.मयूखार्कौ]॥

२१.१५ पृथु-बहुल-स्निग्ध-घनं घन-सूची-क्षुरक-लोहित-अभ्र-युतम्।

२१.१५ काकाण्ड-मेचक-आभं वियद्-विशुद्ध-इन्दु-नक्षत्रम्॥

२१.१६ सुरचाप-मन्द्र-गर्जित-विद्युत्-*प्रतिसूर्यका[K.प्रतिसूर्यकाः] शुभा सन्ध्या।

२१.१६ शशि-शिव-शक्र-आशास्थाः शान्तरवाः पक्षि-मृग-सङ्घाः॥

२१.१७ विपुलाः प्रदक्षिण-चराः स्निग्ध-मयूखा ग्रहा निरुपसर्गाः।

२१.१७ तरवश् च निरुपसृष्ट-अङ्कुरा नरचतुष्पदा हृष्टाः॥

२१.१८ गर्भाणां पुष्टिकराः सर्वेषाम् एव यो -अत्र तु विशेषः।

२१.१८ स्वर्तु-स्वभाव-जनितो गर्भ-*विवृद्ध्यै[K.विवृद्धौ] तम् अभिधास्ये॥

२१.१९ पौषे समार्गशीर्षे सन्ध्यारागो -अम्बुदाः सपरिवेषाः।

२१.१९ नात्यर्थं मृगशीर्षे शीतं पौषे -अतिहिमपातः॥

२१.२० माघे प्रबलो वायुस् तुषारकलुषद्युती रविशशाङ्कौ।

२१.२० अतिशीतं सघनस्य च भानोर् अस्तोदयौ धन्यौ॥

२१.२१ फाल्गुनमासे रूक्षश् चण्डः पवनो -अभ्र-सम्प्लवाः स्निग्धाः।

२१.२१ परिवेषाश् चासकलाः कपिलस् ताम्रो रविश् च शुभः॥

२१.२२ पवन-घन-वृष्टि-युक्ताश् चैत्रे गर्भाः शुभाः सपरिवेषाः।

२१.२२ घनपवनसलिलविद्युत्स्तनितैश् च हिताय वैशाखे॥

२१.२३ मुक्ता-रजत-निकाशास्-तमाल-नीलोत्पल-अञ्जन-आभासः।

२१.२३ जलचरसत्त्वाकारा ग्रभेषु घनाः प्रभूतजलाः॥

२१.२४ तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः।

२१.२४ रुषिता इव धाराभिर् विसृजन्त्य् अम्भः प्रसवकाले॥

२१.२५ गर्भ-उपघात-लिङ्गान्य् उल्का-अशनि-पांशुपात-दिग्दाहः।

२१.२५ क्षितिकम्प-खपुर-कीलक-केतु-ग्रह-युद्ध-निर्घाताः॥

२१.२६ रुधिर-आदि-वृष्टि-वैकृत-परिघ-इन्द्रधनूंषि दर्शनं राहोः।

२१.२६ इत्य् उत्पातैर् एतैस् त्रिविधैश् चान्यैर् हतो गर्भः॥

२१.२७ स्वर्तु-स्वभाव-जनितैः सामान्यैर् यैश् च लक्षणैर् वृद्धिः।

२१.२७ गर्भाणाम् विपरीतैस् तैर् एव विपर्ययो भवति॥

२१.२८ भद्रपदा-द्वय-विश्वाम्बु*देव[K.दैव]पैतामहेष्व् अथ ऋक्षेषु।

२१.२८ सर्वेष्व् ऋतुषु विवृद्धो गर्भो बहुतोयदो भवति॥

२१.२९ शतभिषग्-आश्लेषा-आर्द्रा-स्वाति-मघा-संयुतः शुभो गर्भः।

२१.२९ पुष्णाति बहून् दिवसान् हन्त्य् उत्पातैर् हतस् त्रिविधैः॥

२१.३० मृगमास-आदिष्व् अष्टौ षट् षोडश विंशतिश् चतुर्युक्ता।

२१.३० विंशतिर् अथ दिवस-त्रयम् एकतम-ऋक्षेण पञ्चभ्यः॥

२१.३१अब्[K.२१.३५अब्]। पञ्च-निमित्तैः शत-योजनं तद्-अर्ध-अर्धम् एकहान्या -अतः।

२१.३१च्द्[K.२१.३५च्द्]। वर्षति *पञ्चनिमित्ताद्[K.पञ्चसमन्ताद्] रूपेण-एकेन यो गर्भः॥

२१.३२अब्[K.२१.३६अब्]। द्रोणः पञ्चनिमित्ते गर्भे त्रीण्य् आढकानि पवनेन।

२१.३२च्द्[K.२१.३६च्द्]। षड् विद्युता नवाभ्रैः स्तनितेन द्वादश प्रसवे॥

२१.३३ क्रूर-ग्रह-संयुक्ते करका-अशनि-मत्स्य-वर्षदा गर्भाः।

२१.३३ शशिनि रवौ वा शुभसंयुत-ईक्षिते भूरिवृष्टिकराः॥

२१.३४ ग्रभसमये -अतिवृष्टिर् गर्भ-अभावाय निर्निमित्त-कृता।

२१.३४ द्रोणाष्टांशे -अभ्यधिके वृष्टे गर्भः सुतो भवति॥

२१.३५ गर्भः पुष्टः प्रसवे ग्रह-उपघात-आदिभिर् यदि न वृष्टः।

२१.३५ आत्मीय-गर्भ-समये करका-मिश्रं ददात्य् अम्भः॥

२१.३६ काठिन्यं याति यथा चिर-काल-धृतं पयः पयस्विन्याः।

२१.३६ काल-अतीतं तद्वत् सलिलं काठिन्यम् उपयाति॥

२१.३७अ पवन-सलिल-विद्युद्-गर्जिता-अभ्र-अन्वितो यः

२१.३७ब् स भवति बहुतोयः पञ्च-रूप-अभ्युपेतः।

२१.३७च् विसृजति यदि तोयं गर्भकाले -अतिभूरि

२१.३७द् प्रसव-समयम् इत्वा शीकर-अम्भः करोति॥

२२ गर्भधारणाध्यायः

२२.०१ ज्यैष्ठसिते -अष्टम्याद्यश् चत्वारो वायुधारणा दिवसाः।

२२.०१ मृदुशुभपवनाः शस्ताः स्निग्ध-घन-स्थगित-गगनाश् च॥

२२.०२ तत्र-एव स्वात्याद्ये वृष्टे भचतुष्टये क्रमात्-मासाः।

२२.०२ श्रावणपूर्वा ज्ञेयाः परिसुता धारणास् ताः स्युः।

२२.०३ यदि ता स्युर् एकरूपाः शुभास् ततः सान्तरास् तु न शिवाय।

२२.०३ तस्कर-भयदाश् *च-उक्ताः[K.प्रोक्ताः] श्लोकाश् च-अप्य् अत्र वासिष्ठाः॥

२२.०४ सविद्युतः सपृषतः स-पांशु-उत्कर-मारुताः।

२२.०४ स-अर्क-चन्द्र-परिच्छन्ना धारणाः शुभ-धारणाः॥

२२.०५ यदा तु विद्युतः श्रेष्ठाः *शुभाशाः[K.शुभाशा] प्रत्युपस्थिताः।

२२.०५ तदापि सर्वसस्यानां वृद्धिं ब्रूयाद् विचक्षणः॥

२२.०६ सपांशुवर्षाः सापश् च शुभा बालक्रिया अपि।

२२.०६ पक्षिणाम् सुस्वरा वाचः क्रीडा पांशुजलादिषु॥

२२.०७ रविचन्द्रपरीवेषाः स्निग्धा नात्यन्तदूषिताः।

२२.०७ वृष्टिस् तदापि विज्ञेया सर्वसस्य-*अर्थसाधिका[K.अभिवृद्धये]॥

२२.०८ मेघाः स्निग्धाः संहताश् च प्रदक्षिणगतिक्रियाः।

२२.०८ तदा स्यान् महती वृष्टिः सर्वसस्य-*अभिवृद्धये[K.अर्थसाधिका]॥

२३ प्रवर्षणाध्यायः

२३.०१ ज्यैष्ठ्यां समतीतायां पूर्वाषाढादि-सम्प्रवृष्टेन।

२३.०१ शुभम् अशुभं वा वाच्यं परिमाणं च-अम्भसस् तज्ज्ञैः॥

२३.०२ हस्तविशालं कुण्डकम् अधिकृत्य-अम्बुप्रमाण-निर्देशः।

२३.०२ पञ्चाशत् पलम् आढकम् अनेन मिनुयाज् जलं पतितम्॥

२३.०३ येन धरित्री मुद्रा जनिता वा बिन्दवस् तृणा-आग्रेषु।

२३.०३ वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम्॥

२३.०४ के चिद् यथाभिवृष्टं दश-योजन-मण्डलं वदन्त्य् अन्ये।

२३.०४ गर्ग-वसिष्ठ-पराशर-मतम् एतद् द्वादशान् न परम्॥

२३.०५ येषु च भेष्व् अभिवृष्टं भूयस् तेष्व् एव वर्षति प्रायः।

२३.०५ यदि न-आप्य-आदिषु वृष्टं सर्वेषु तदा त्व् अनावृष्टिः॥

२३.०६ हस्त-आप्य-सौम्य-चित्रा-पौष्ण-धनिष्ठासु षोडश द्रोणाः।

२३.०६ शतभिषग्-ऐन्द्र-स्वातिषु चत्वारः कृत्तिकासु दश॥

२३.०७ श्रवणे मघा-अनुराधा-भरणी-मूलेषु दश चतुर्युक्ताः।

२३.०७ फल्गुन्यां पञ्चकृतिः पुनर्वसौ विंशतिर् द्रोणाः॥

२३.०८ *ऐन्द्राग्र्य्-आख्ये[K.ऐन्द्राग्नाख्ये] वैश्वे च विंशतिः सार्पभे दश त्र्यधिकाः।

२३.०८ आहिर्बुध्न्य-आर्यम्ण-प्राजापत्येषु पञ्चकृतिः।

२३.०९ पञ्चदश-आजे पुष्ये च कीर्तिता वाजिभे दश द्वौ च।

२३.०९ रौद्रे -अष्टादश कथिता द्रोणा निरुपद्रवेष्व् *एते[K.एषु]॥

२३.१० रवि-रविसुत-केतु-पीडिते भे क्षितितनय-त्रिविध-अद्भुत-आहते च।

२३.१० भवति *च[K.हि] न शिवं न च-अपि वृष्टिः शुभसहिते निरुपद्रवे शिवं च॥

२४ रोहिणीयोगाध्यायः

२४.०१ कनक-शिला-चय-विवरजतरुकुसुमासङ्गिमधुकरानुरुते।

२४.०१ बहु-विहग-कलह-सुरयुवति-गीत-मन्द्र-स्वन-उपवने॥

२४.०२ सुरनिलय-शिखरि-शिखरे बृहस्पतिर् नारदाय यान् आह।

२४.०२ गर्ग-पराशर-काश्यप-मयाश् च यान् शिष्य-सङ्घेभ्यः॥

२४.०३ तान् अवलोक्य यथावत् प्राजापत्य-इन्दुसम्प्रयोगार्थान्।

२४.०३ *अल्प[K.स्वल्प]ग्रन्थेनाहं तान् एवाभ्युद्यतो वक्तुम्॥

२४.०४ प्राजेशम् आषाढतमिस्रपक्षे क्षपाकरेण-उपगतं समीक्ष्य।

२४.०४ वक्तव्यम् इष्टं जगतो -अशुभं वा शास्त्रोपदेशाद् ग्रहचिन्तकेन॥

२४.०५ योगो यथानागत एव वाच्यः स धिष्ण्ययोगः करणे मयोक्तः।

२४.०५ चन्द्रप्रमाणद्युतिवर्णमार्गैर् उत्पातवातैश् च फलं *निगद्यम्[K.निगाद्यम्]॥

२४.०६अ पुराद् उदग् *यत्[K.यत्] पुरतो -अपि वा स्थलं

२४.०६ब् त्र्यहोषितस् तत्र हुताशतत्परः।

२४.०६च् ग्रहान् सनक्षत्रगणान् समालिखेत्

२४.०६द् सधूपपुष्पैर् बलिभिश् च पूजयेत्॥

२४.०७अ सरत्न-तोय-औषधिभिश् चतुर्दिशं

२४.०७ब् तरुप्रवालापिहितैः सुपूजितैः।

२४.०७च् अकालमूलैः कलशैर् अलङ्कृतं

२४.०७द् कुशास्तृतं स्थण्डिलम् आवसेद् द्विजः॥

२४.०८अ आलभ्य मन्त्रेण महाव्रतेन

२४.०८ब् बीजानि सर्वाणि निधाय कुम्भे।

२४.०८च् प्लाव्यानि चामीकर-दर्भ-तोयैर्

२४.०८द् होमो मरुद्वारुण-*सोम[K.सौम्य]मन्त्रैः॥

२४.०९अ श्लक्ष्णां पताकाम् असितां विदध्याद्

२४.०९ब् दण्डप्रमाणां त्रिगुणोच्छ्रितां च।

२४.०९च् आदौ कृते दिग्ग्रहणे नभस्वान्

२४.०९द् ग्राह्यस् तया योगगते शशाङ्के॥

२४.१०अ तत्रार्धमासाः प्रहरैर् विकल्प्या

२४.१०ब् वर्षानिमित्तं दिवसास् तदंशैः।

२४.१०च् सव्येन गच्छन् शुभदः सदैव

२४.१०द् यस्मिन् प्रतिष्ठा बलवान् स वायुः॥

२४.११अ वृत्ते तु योगे -अङ्कुरितानि यानि

२४.११ब् सन्तीह बीजानि धृतानि कुम्भे।

२४.११च् येषां तु यो -अंशो -अङ्कुरितस् तदंशस्

२४.११द् तेषां विवृद्धिं समुपैति नान्यः॥

२४.१२ शान्त-पक्षि-मृग-राविता दिशो निर्मलं वियदनिन्दितो -अनिलः।

२४.१२ शस्यते शशिनि *रोहिणीगते[K.रोहिणीयते] मेघमारुतफलानि वच्म्य् अतः॥

२४.१३अ क्व चिद् असितसितैः सितैः क्वचिच् च

२४.१३ब् क्व चिद् असितैर् भुजगैर् इवाम्बुवाहैः।

२४.१३च् वलित-जठर-पृष्ठ-मात्र-दृश्यैः

२४.१३द् स्फुरित-तडिद्-रसनैर् वृतं विशालैः॥

२४.१४अ विकसित-कमल-उदर-अवदातैर्

२४.१४ब् अरुणकरद्युतिरञ्जित-उपकण्ठैः।

२४.१४च् छुरितम् इव वियद्-घनैर् विचित्रैर्

२४.१४द् मधुकर-कुङ्कुम-किंशुक-अवदातैः॥

२४.१५अ असित-घन-निरुद्धम् एव वा

२४.१५ब् चलित-तडित्-सुरचाप-चित्रितम्।

२४.१५च् द्विप-महिष-कुल-आकुली-कृतं

२४.१५द् वनम् इव दावपरीतम् अम्बरम्॥

२४.१६ अथ वा-अञ्जन-शैल-शिला-निचय-प्रतिरूप-धरैः स्थगितं गगनम्।

२४.१६ हिम-मौक्तिक-शङ्ख-शशाङ्क-कर-द्युति-हारिभिर् अम्बुधरैर् अथ वा॥

२४.१७अ तडिद्-धैम-कक्ष्यैर् बलाक-अग्रदन्तैः

२४.१७ब् स्रवद्-वारि-दानैश् चलत्-प्रान्त-हस्तैः।

२४.१७च् विचित्र-इन्द्रचापध्वज-उच्छ्रायशोभैस्

२४.१७द् तमालालिनीलैर् वृतं च-अब्द-नागैः॥

२४.१८अ सन्ध्यानुरक्ते नभसि स्थितानाम्

२४.१८ब् इन्दीवर-श्याम-रुचां घनानाम्।

२४.१८च् वृन्दानि पीताम्बरवेष्टितस्य

२४.१८द् कान्तिं हरेश् चोरयतां यदा वा॥

२४.१९अ सशिखि-चातक-दर्दुर-निःस्वनैर्

२४.१९ब् यदि विमिश्रितमन्द्रपटुस्वनाः।

२४.१९च् खम् अवतत्य दिगन्तविलम्बिनः

२४.१९द् सलिलदाः सलिलौघमुचः क्षितौ॥

२४.२०अ निगदितरूपैर् जलधरजालैस्

२४.२०ब् त्र्यहम् अवरुद्धं द्व्यहम् अथ वा-अहः।

२४.२०च् यदि वियद् एवं भवति सुभिक्षं

२४.२०द् मुदितजना च प्रचुरजला भूः॥

२४.२१अ रूक्षैर् अल्पैर् मारुता-क्षिप्त-देहैर्

२४.२१ब् उष्ट्र-ध्वाङ्क्ष-प्रेत-शाखामृग-आभैः।

२४.२१च् अन्येषां वा निन्दितानां *स्वरूपैर्[K.सरूपैर्]

२४.२१द् मूकैश् चाब्दैर् नो शिवं नापि वृष्टिः॥
२४.२२अ विगत-घने वा वियति विवस्वान्

२४.२२ब् अमृदुमयूखः सलिलकृद् एवम्।

२४.२२च् सर इव फुल्लं निशि कुमुदाढ्यं

२४.२२द् खम् उडुविशुद्धं यदि च सुवृष्ट्यै॥

२४.२३अ पूर्वोद्भूतैः सस्यनिष्पत्तिर् अब्दैर्

२४.२३ब् आग्नेयाशासम्भवैर् अग्निकोपः।

२४.२३च् याम्ये सस्यं क्षीयते नैरृते *-अर्धं[K.अर्घं Kऽस् त्र्. अर्धं]

२४.२३द् पश्चाज् जातैः शोभना वृष्टिर् अब्दैः॥

२४.२४अ वायव्योत्थैर् वातवृष्टिः क्वचिच् च

२४.२४ब् पुष्टा वृष्टिः सौम्य-काष्ठा-समुत्थैः।

२४.२४च् श्रेष्ठं सस्यं स्थाणुदिक्सम्प्रवृद्धैर्

२४.२४द् वायुश् च-एवं दिक्षु धत्ते फलानि॥

२४.२५अ उल्कानिपातास् तडितो -अशनिश् च

२४.२५ब् दिग्दाह-निर्घात-महीप्रकम्पाः।

२४.२५च् नादा मृगाणां सपतत्रिणां च

२४.२५द् ग्राह्या यथ-एव अम्बुधरास् तथ-एव॥

२४.२६अ नामाङ्कितैस् तैर् उदगादिकुम्भैः

२४.२६ब् प्रदक्षिणं श्रावणमासपूर्वैः।

२४.२६च् पूर्णैः स मासः सलिलस्य दाता

२४.२६द् *सुतैर्[K.सुतर्] अवृष्टिः परिकल्प्यम् ऊनैः॥

२४.२७अ अन्यैश् च कुम्भैर् नृप-नामचिह्नैर्

२४.२७ब् देशाङ्कितैश् च-अप्य् अपरैस् तथ-एव।

२४.२७च् भग्नैः सुतैर् न्यूनजलैः सुपूर्णैर्

२४.२७द् भाग्यानि वाच्यानि यथानुरूपम्॥

२४.२८अ दूरगो निकटगो -अथ वा शशी

२४.२८ब् दक्षिणे पथि यथा तथा स्थितः।

२४.२८च् रोहिणीं यदि युनक्ति सर्वथा

२४.२८द् कष्टम् एव जगतो विनिर्दिशेत्॥

२४.२९अ स्पृशन्न् उदग् याति यदा शशाङ्कस्

२४.२९ब् तदा सुवृष्टिर् बहुल-उपसर्गा।

२४.२९च् असंस्पृशन् योगम् उदक्समेतः

२४.२९द् करोति वृष्टिं विपुलां शिवं च॥

२४.३०अ रोहिणी-शकट-मध्य-संस्थिते

२४.३०ब् चन्द्रमस्य् अशरणीकृता जनाः।

२४.३०च् क्व-अपि यान्ति शिशुयाचिताशनाः

२४.३०द् सूर्यतप्तपिठराम्बुपायिनः॥

२४.३१अ उदितं यदि शीतदीधितिं

२४.३१ब् प्रथमं पृष्ठत एति रोहिणी।

२४.३१च् शुभम् एव तदा स्मरातुराः

२४.३१द् प्रमदाः *कामवशेन[K.कामिवशे च] संस्थिताः॥

२४.३२अ अनुगच्छति पृष्ठतः शशी

२४.३२ब् *यदि[K.ओमित्तेद्] कामी वनिताम् इव प्रियाम्।

२४.३२च् मकर-ध्वज-बाण-खेदिताः

२४.३२द् प्रमदानां वशगास् तदा नराः॥

२४.३३अ आग्नेय्यां दिशि चन्द्रमा यदि भवेत् तत्र-उपसर्गो महान्

२४.३३ब् नैरृत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः।

२४.३३च् प्राजेशानिलदिक्स्थिते हिम-करे सस्यस्य मध्यश् चयो

२४.३३द् याते स्थाणुदिशं गुणाः सुबहवः सस्यार्घ-*वृष्ट्यादयः[K.वृद्ध्यादयः]॥

२४.३४ ताडयेद् यदि च योगतारकाम् आवृणोति वपुषा यदापि वा।

२४.३४ ताडने भयम् उशन्ति दारुणं छादने *नृप-बधो[K.नृप-वधो] -अङ्गनाकृतः॥

२४.३५ गोप्रवेशसमये -अग्रतो वृषो याति कृष्णपशुर् एव वा पुरः।

२४.३५ भूरि वारि शबले तु मध्यमं नो सिते -अम्बुपरिकल्पनापरैः॥

२४.३६ दृश्यते न यदि रोहिणीयुतश् चन्द्रमा नभसि तोयदावृते।

२४.३६ रुग्भयं महदुपस्थितं तदा भूश् च भूरिजलसस्यसंयुता॥

२५ स्वातियोगाध्यायः

२५.०१ यद् रोहिणीयोगफलं तद् एव स्वाताव् अषाढासहिते च चन्द्रे।

२५.०१ आषाढशुक्ले निखिलं विचिन्त्यं यो -अस्मिन् विशेषस् तम् अहं प्रवक्ष्ये॥

२५.०२अ स्वातौ निशांशे प्रथमे -अभिवृष्टे

२५.०२ब् सस्यानि सर्वाण्य् उपयान्ति वृद्धिम्।

२५.०२च् भागे द्वितीये तिल-मुद्ग-माषा

२५.०२द् ग्रैष्मं तृतीये -अस्ति न शारदानि॥

२५.०३ वृष्टे -अह्निभागे प्रथमे सुवृष्टिस् तद्वद् द्वितीये तु सकीट-सर्पा।

२५.०३ वृष्टिस् तु मध्यापरभागवृष्टे निश्छिद्रवृष्टिर् द्युनिशं प्रवृष्टे॥

२५.०४ समम् उत्तरेण तारा चित्रायाः कीर्त्यते ह्य् अपांवत्सः।

२५.०४ तस्यासन्ने चन्द्रे स्वातेर् योगः शिवो भवति॥

२५.०५अ सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे

२५.०५ब् वायुर् वा चण्डवेगः सजलजलधरो वा-अपि गर्जत्य् अजस्रम्।

२५.०५च् विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं

२५.०५द् विज्ञेया प्रावृड् एषा मुदितजनपदा सर्वसस्यैर् उपेता॥

२५.०६ तथ-एव फाल्गुने चैत्रे वैशाखस्यासिते -अपि वा।

२५.०६ स्वातियोगं विजानीयाद् आषाढे च विशेषतः॥

२६ आषाढीयोगाध्यायः

२६.०१अ आषाढ्यां समतुलिताधिवासितानाम्

२६.०१ब् अन्येद्युर् यद् अधिकताम् उपैति बीजम्।

२६.०१च् तद्वृद्धिर् भवति न जायते यदूनं

२६.०१द् मन्त्रो -अस्मिन् भवति तुलाभिमन्त्रणाय॥

२६.०२ स्तोतव्या मन्त्रयोगेन सत्या देवी सरस्वती।

२६.०२ दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्य् असि॥

२६.०३ येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणास् तथा।

२६.०३ उत्तिष्ठन्तीह पूर्वेण पश्चाद् अस्तं व्रजन्ति च॥

२६.०४ यत्सत्यं सर्ववेदेषु यत्सत्यं ब्रह्मवादिषु।

२६.०४ यत्सत्यं त्रिषु लोकेषु तत्सत्यम् इह दृश्यताम्॥

२६.०५ ब्रह्मणो दुहितासि त्वम् आदित्य-इति प्रकीर्तिता।

२६.०५ काश्यपी गोत्रतश् च-एव नामतो विश्रुता तुला॥

२६.०६अ क्षौमं चतुःसूत्रकसन्निबद्धं

२६.०६ब् षडङ्गुलं शिक्यकवस्त्रम् अस्याः।

२६.०६च् सूत्रप्रमाणम् च दशाङ्गुलानि

२६.०६द् षड् एव *कक्ष्य[K.कक्ष]-उभयशिक्यमध्ये॥

२६.०७अ याम्ये शिक्ये काञ्चनं सन्निवेश्यं

२६.०७ब् शेषद्रव्याण्य् उत्तरे -अम्बूनि *च-एव[K.च-एवम्]।

२६.०७च् तोयैः कौप्यैः *सैन्धवैः[K.स्यन्दिभिः] सारसैश् च

२६.०७द् वृष्टिर्[वर्.वृद्धिर्] हीना मध्यमा चोत्तमा च॥

२६.०८अ दन्तैर् नागा गो-हय-आद्याश् च लोम्ना

२६.०८ब् हेम्ना भूपाः शिक्थकेन द्विजाद्याः।

२६.०८च् तद्वद् देशा वर्षमासा दिशश् च

२६.०८द् शेषद्रव्याण्य् आत्मरूपस्थितानि॥

२६.०९ हैमी प्रधाना रजतेन मध्या तयोर् अलाभे खदिरेण कार्या।

२६.०९ विद्धः पुमान् येन शरेण सा वा तुला प्रमाणेन भवेद् वितस्तिः॥

२६.१० हीनस्य नाशो -अभ्यधिकस्य वृद्धिस् तुल्येन तुल्यं तुलितं तुलायाम्।

२६.१० एतत्तुला-कोश-रहस्यम् उक्तं प्राजेशयोगे -अपि नरो विदध्यात्॥

२६.११अ स्वाताव् अषाढास्व् अथ रोहिणीषु

२६.११ब् पापग्रहा योगगता न शस्ताः।

२६.११च् ग्राह्यं तु योगद्वयम् अप्य् उपोष्य

२६.११द् यदाधिमासो द्विगुणीकरोति॥

२६.१२अ त्रयो -अपि योगाः सदृशाः फलेन

२६.१२ब् यदा तदा वाच्यम् असंशयेन।

२६.१२च् विपर्यये यत्त्व् इह रोहिणीजं

२६.१२द् फलं तद् एवाभ्यधिकं निगद्यम्॥

२६.१३ निष्पत्तिर् अग्निकोपो वृष्टिर् मन्दाथ मध्यमा श्रेष्ठा।

२६.१३ बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः॥

[K.२६.१४ वृत्तायाम् आषाढ्याम् कृष्णचतुर्थ्याम् अजैकपाद-ऋक्षे।]

[K.२६.१४ यदि वर्षति पर्जन्यः प्रावृट् शस्ता न चेन् न ततः॥]

[K.२६.१५ आषाढ्याम् पौर्णमास्यां तु यद्य् ऐशानो -अनिलो भवेत्।]

[K.२६.१५ अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिर् उत्तमा॥]

२७ वातचक्राध्यायः

२७.०१अब्[K.ओमित्तेद्]। आषाढ-पौर्णमास्यां तु यद्य् ऐशानो -अनिलो भवेत्।

२७.०१च्द्[K.ओमित्तेद्]। अस्तं गच्छति तीक्ष्णांशौ सस्य सम्पत्तिर् उत्तमा॥

२७.०२अ पूर्वः पूर्वसमुद्र-वीचि-शिखर-प्रस्फालना-घूर्णितश्

२७.०२ब् चन्द्रार्क-अंशु-सटा-*कलाप[K.अभिघात]-कलितो वायुर् यदा-आकाशतः।

२७.०२च् नैकान्त-स्थित-नीलमेघ-*पटला[K.पटलां] शारद्य-*संवर्धिता[K. संवर्धितां]।

२७.०२द् वासन्त-उत्कट-सस्य-मण्डित-*तला सर्वा मही शोभते[K.तलां विद्यात् तदा मेदिनीम्]॥

२७.०३अ यदा *वह्नौ[K.अग्नेयो] वायुर् *वहति गगने -अखण्डित-तनुः[K.मलय-शिखर-आस्फालनपटुः]

२७.०३ब् प्लवत्य् अस्मिन् योगे भगवति पतङ्गे प्रवसति।

२७.०३च् तदा नित्य-उद्दीप्ता ज्वलन-शिखर-आलिङ्गिततला

२७.०३द् स्वगात्र-उष्म-उच्छ्वासैर् वमति वसुधा भस्मनिकरम्॥

२७.०४अ ताली-पत्र-लता-वितान-तरुभिः शाखामृगान् नर्तयन्

२७.०४ब् योगे -अस्मिन् प्लवति *ध्वनिः सपरुषो[K.ध्वनन्सुपरुषो] वायुर् यदा दक्षिणः।

२७.०४च् *तद्वद् योगसमुत्थितस् तु[K.सर्वोद्योगसमुन्नताश् च] गजवत् ताल-अङ्कुशैर् घट्टिताः

२७.०४द् कीनाशा इव मन्द-वारि-*कणिका[K.कणिकान्] मुञ्चन्ति मेघास् तदा॥

२७.०५अ सूक्ष्मैला-लवली-लवङ्ग-निचयान् व्याधूर्णयन् सागरे

२७.०५ब् भानोर् अस्तमये प्लवत्य् अविरतो वायुर् यदा नैरृतः।

२७.०५च् क्षुत्-*तृष्ण-आवृत[K.तृष्णामृत]-मानुष-अस्थि-शकल-प्रस्तार-भार-च्छदा

२७.०५द् मत्ता प्रेतवधूर् इव-उग्र-चपला भूमिस् तदा लक्ष्यते॥

२७.०६अ यदा रेणु-उत्पातैः *प्रविचल-सटाटोप-चपलः[K.प्रविकटसटाटोपचपलः]

२७.०६ब् प्रवातः *पश्चाच् चेद्[K.पश्चार्धे] दिनकर-कर-आपात-समये।

२७.०६च् तदा सस्योपेता *प्रवर-निकर-आबद्ध-समरा[K.प्रवरनृव्राबद्धसमरा]

२७.०६द् *क्षितिः स्थानस्थानेष्व्[K.धरा स्थाने स्थानेष्व्] अविरत-वसा-मांस-रुधिरा॥

२७.०७अ आषाढी-पर्व-काले यदि किरणपतेर् अस्तकाल-उपपत्तौ

२७.०७ब् वायव्यो वृद्धवेगः *पवन-घन-वपुः पन्नग-अर्द्ध-अनुकारि[K.प्लवति धनरिपुः पन्नगादानुकारी]।

२७.०७च् जानीयाद् वारि-धारा-प्रमुदित-*मुदित-आमुक्त[K.मुदितां मुक्त]-मण्डूक-कण्ठां

२७.०७द् सस्य-उद्भास-एकचिह्नां सुख-बहुलतया भाग्यसेनाम् इव-उर्वीम्॥

२७.०८अ मेरु-ग्रस्त-मरीचि-मण्डल-तले ग्रीष्म-अवसाने रवौ

२७.०८ब् वात्य् आमोदि-कदम्ब-गन्ध-सुरभिर् वायुर् यदा च-उत्तरः।

२७.०८च् विद्युद्-भ्रान्ति-समस्त-कान्ति-कलना मत्तास् तदा तोयदा

२७.०८द् उन्मत्ता इव नष्ट-चन्द्र-किरणां गां पूरयन्त्य् अम्बुभिः॥

२७.०९ *वृत्तायाम् आषाढ्यां कृष्ण-चतुर्थ्याम् अजैकपाद-ऋक्षे[K.ऐशानो यदि शीतलो -अमरगणैः संसेव्यमानो भवेत्]।

२७.०९ *यदि वर्षति पर्जन्यः प्रावृत् शस्ता न चेन् न तदा[K.पुन्नागागुरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः]॥

२७.१० *नष्टचन्द्रार्ककिरनं नष्टतारं न चेन् नभः[K.आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला]।

२७.१० *न तां भद्रपदां मन्ये यत्र देवो न वर्षति[K.धर्मिष्ठाः प्रणतारयो नृपतयो रक्षन्ति वर्णांस् तदा]॥

२८ सद्योवर्षणाध्यायः

२८.०१अ वर्षाप्रश्ने सलिलनिलयं राशिम् आश्रित्य चन्द्रो

२८.०१ब् लग्नं यातो भवति यदि वा केन्द्रगः शुक्ल-पक्षे।

२८.०१च् सौम्यैर् दृष्टः प्रचुरम् उदकं पापदृष्टो -अल्पम् अम्भः

२८.०१द् प्रावृट्काले सृजति न चिरात्-चन्द्रवद् भार्गवो -अपि॥

२८.०२अ आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा

२८.०२ब् तोयासन्नो भवति यदि वा तोयकार्य-उन्मुखो वा।

२८.०२च् प्रष्टा वाच्यः सलिलम् अचिराद् अस्ति निःसंशयेन

२८.०२द् पृच्छाकाले सलिलम् इति वा श्रूयते यत्र शब्दः॥

२८.०३अ उदय-शिखरि-संस्थो दुर्निरीक्ष्यो -अतिदीप्त्या

२८.०३ब् द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः।

२८.०३च् तदहनि कुरुते -अम्भस् तोयकाले विवस्वान्

२८.०३द् प्रतपति यदि च-उच्चैः खं गतो -अतीव तीक्ष्णम्॥

२८.०४अ विरसम् उदकं गोनेत्राभं वियद्विमला दिशो

२८.०४ब् लवण-विकृतिः काकाण्डाभं यदा च भवेत्-नभः।

२८.०४च् पवन-विगमः पोप्लूयन्ते झषाः स्थलगामिनो

२८.०४द् रसनम् असकृत्-मण्डूकानां जलागमहेतवः॥

२८.०५अ मार्जारा भृशम् अवनिं नखैर् लिखन्तो[K.लिखन्ते]

२८.०५ब् लोहानां मलनिचयः सविस्रगन्धः।

२८.०५च् रथ्यायां *शिशुरचिताश्[K.शिशुनिचिताश्] च सेतुबन्धाः

२८.०५द् सम्प्राप्तं जलम् अचिरात्-निवेदयन्ति॥

२८.०६ गिरयो *-अञ्जनचूर्णसन्निभा[K.अञ्जनपुञ्जसन्निभा] यदि वा बाष्पनिरुद्धकन्दराः।

२८.०६ कृकवाकुविलोचन-उपमाः परिवेषाः शशिनश् च वृष्टिदाः॥

२८.०७अ विना-उपघातेन पिपीलिकानाम्

२८.०७ब् अण्ड-उपसंक्रान्तिर् अहिव्यवायः।

२८.०७च् *द्रुमावरोहश्[K.द्रुमाधिरोहश्] च भुजङ्गमानां

२८.०७द् वृष्टेर् निमित्तानि गवां प्लुतं च॥
२८.०८अ तरु-शिखर-उपगताः कृकलासा

२८.०८ब् गगन-तल-स्थित-दृष्टि-निपाताः।

२८.०८च् यदि च गवां रविवीक्षणम् ऊर्ध्वं

२८.०८द् निपतति वारि तदा न चिरेण॥

२८.०९ न-इच्छन्ति विनिर्गमं गृहाद् धुन्वन्ति श्रवणान् खुरान् अपि।

२८.०९ पशवः पशुवच् च *कुक्कुरा[K.कुर्कुरा] यद्य् अम्भः पततीति निर्दिशेत्॥

२८.१०अ यदा स्थिता गृहपटलेषु *कुक्कुरा[K.कुर्कुरा]

२८.१०ब् *रुदन्ति[K.भवन्ति] वा यदि विततं *वियत्-मुखाः[K.दिवोन्मुखाः]।

२८.१०च् दिवा तडिद् यदि च पिनाकिदिग्भवा

२८.१०द् तदा क्षमा भवति *समैव वारिणा[K.स,आतोवारों ा]॥

२८.११अ शुक-कपोत-विलोचन-सन्निभो

२८.११ब् मधु-निभश् च यदा हिम-दीधितिः।

२८.११च् प्रतिशशी च यदा दिवि राजते

२८.११द् पतति वारि तदा न *चिरेण च[K.चिराद् दिवः]॥

२८.१२अ स्तनितं निशि विद्युतो दिवा

२८.१२ब् रुधिरनिभा यदि दण्डवत्स्थिताः।

२८.१२च् पवनः पुरतश् च शीतलो

२८.१२द् यदि सलिलस्य तदा-आगमो भवेत्॥

२८.१३अ वल्लीनां गगन-तल-उन्मुखाः प्रवालाः

२८.१३ब् स्नायन्ते यदि जलपांशुभिर् विहङ्गाः।

२८.१३च् सेवन्ते यदि च सरीसृपास् तृणाग्राण्य्

२८.१३द् आसन्नो भवति तदा जलस्य पातः।

२८.१४अ मयूर-शुक-चाष-चातक-समान-वर्णा यदा

२८.१४ब् जपाकुसुम-पङ्कज-द्युति-मुषश् च सन्ध्या-घनाः।

२८.१४च् जलोर्मि-नग-नक्र-कच्छप-वराह-मीन-उपमाः

२८.१४द् प्रभूत-पुटसंचया न तु चिरेण यच्छन्त्य् अपः॥

२८.१५अ पर्यन्तेषु सुधा-शशाङ्क-धवला मध्ये -अञ्जन-अलि-त्विषः

२८.१५ब् स्निग्धा नैक-पुटाः क्षरज्-जलकणाः सोपान-विच्छेदिनः।

२८.१५च् माहेन्द्रीप्रभवाः प्रयान्त्य् अपरतः प्राग् वा अम्बुप-आशा-उद्भवा

२८.१५द् ये ते वारिमुचस् त्यजन्ति न चिराद् अम्भः प्रभूतं भुवि॥

२८.१६ शक्रचाप-परिघ-प्रतिसूर्या रोहितो -अथ तडितः परिवेषः।

२८.१६ उद्गम-अस्तमये यदि भानोर् आदिशेत् प्रचुरम् अम्बु तदाशु॥

२८.१७अ यदि तित्तिर-पत्र-निभं गगनं

२८.१७ब् मुदिताः प्रवदन्ति च पक्षि-गणाः।

२८.१७च् उदय-अस्तमये सवितुर् द्युनिशं

२८.१७द् विसृजन्ति घना न चिरेण जलम्॥

२८.१८अ यद्य् अमोघ-किरणाः सहस्रगोर्

२८.१८ब् अस्तभूधरकरा इव-उच्छ्रिताः।

२८.१८च् भूसमं च रसते यदा-अम्बुदस्

२८.१८द् तन् महद् भवति वृष्टि-लक्षणं॥

२८.१९ प्रावृषि शीत-करो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः।

२८.१९ सूर्यसुतान् नवपञ्चमगो वा सप्तमगश् च जला-आगमनाय॥

२८.२० प्रायो ग्रहाणाम् उदयास्तकाले समागमे मण्डलसंक्रमे च।

२८.२० पक्ष-क्षये तीक्ष्णकरायनान्ते वृष्टिर् गते -अर्के नियमेन चार्द्राम्॥

२८.२१ समागमे पतति जलं ज्ञशुक्रयोर् ज्ञजीवयोर् गुरुसितयोश् च सङ्गमे।

२८.२१ यमारयोः पवन-हुताशजं भयं ह्य् अदृष्टयोर् असहितयोश् च सद्ग्रहैः॥

२८.२२ अग्रतः पृष्ठतो वा-अपि ग्रहाः सूर्यावलम्बिनः।

२८.२२ यदा तदा प्रकुर्वन्ति महीम् एकार्णवाम् इव॥

२८.२३ [K.ओमित्तेद्] प्रविशति यदि खद्योतो जलदसमीपेषु रजनीषु।

२८.२३ [K.ओमित्तेद्] केदारपूरम् अधिकं वर्षति देवस् तदा न चिरात्॥

२८.२४ [K.ओमित्तेद्] वर्षत्य् अपि रटति यदा गोमायुश् च प्रदोषवेलायाम्।

२८.२४ [K.ओमित्तेद्] सप्ताहं दुर्दिनम् अपि तदा पयो नात्र सन्देहः॥

२९ कुसुमलताध्यायः

२९.०१ फल-कुसुम-सम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्।

२९.०१ सुलभत्वं द्रव्याणां निष्पत्तिश् च-अपि सस्यानाम्॥

२९.०२ शालेन कलमशाली रक्ताशोकेन रक्तशालिश् च।

२९.०२ पाण्डूकः क्षीरिकया नीलाशोकेन सूकरकः॥

२९.०३ न्यग्रोधेन तु यवकस् तिन्दुक-वृद्ध्या च षष्टिको भवति।

२९.०३ अश्वत्थेन ज्ञेया निष्पत्तिः सर्वसस्यानाम्॥

२९.०४ जम्बूभिस् तिल-माषाः शिरीष-वृद्ध्या च कङ्गु-निष्पत्तिः।

२९.०४ गोधूमाश् च मधूकैर् यव-वृद्धिः सप्तपर्णेन॥

२९.०५ अतिमुक्तक-कुन्दाभ्यां कर्पासं सर्षपान् वदेद् अशनैः।

२९.०५ बदरीभिश् च कुलत्थांश् *चिरविल्वेन[K.ऊ.चिरबिल्वेन]-आदिशेत्-मुद्गान्॥

२९.०६ अतसी वेतस-पुष्पैः पलाश-कुसुमैश् च कोद्रवा ज्ञेयाः।

२९.०६ तिलकेन शङ्ख-मौक्तिक-रजतान्य् अथ च-इङ्गुदेन *शणाः[K.शणः]॥

२९.०७ करिणश् च हस्तिकर्णैर् आदेश्या वाजिनो -अश्वकर्णेन।

२९.०७ गावश् च पाटलाभिः कदलीभिर् अज-आविकं भवति॥

२९.०८ चम्पक-कुसुमैः कनकं विद्रुम-सम्पच् च बन्धुजीवेन।

२९.०८ *कुरवक[K.कुरुवक]-वृद्ध्या वज्रं वैदूर्यं नन्दिकावर्तैः॥

२९.०९ विन्द्याच् च सिन्धुवारेण मौक्तिकं *कारुकाः[K.कुङ्कुमं] कुसुम्भेन।

२९.०९ रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः॥

२९.१० श्रेष्ठी *सुवर्णपुष्पात्[K.सुवर्णपुष्पैः] पद्मैर् विप्राः पुरोहिताः कुमुदैः।

२९.१० सौगन्धिकेन बलपतिर् अर्केण हिरण्य-परिवृद्धिः॥

२९.११ आम्रैः क्षेमं भल्लातकैर् भयं पीलुभिस् तथा-आरोग्यम्।

२९.११ खदिर-शमीभ्यां दुर्भिक्षम् अर्जुनैः शोभना वृष्टिः॥

२९.१२ पिचुमन्द-नागकुसुमैः सुभिक्षम् अथ मारुतः कपित्थेन।

२९.१२ निचुलेन-अवृष्टिभयं व्याधिभयं भवति कुटजेन॥

२९.१३ दूर्वा-कुश-कुसुमाभ्याम् इक्षुर् वह्निश् च कोविदारेण।

२९.१३ श्यामालता-अभिवृद्ध्या बन्धक्यो वृद्धिम् आयान्ति॥

२९.१४अ यस्मिन् *काले[K.देशे] स्निग्ध-निश्छिद्र-पत्राः

२९.१४ब् संदृश्यन्ते वृक्षगुल्मा लताश् च।

२९.१४च् तस्मिन् वृष्टिः शोभना सप्रदिष्टा

२९.१४द् रूक्षैश् छिद्रैर् अल्पम् अम्भः प्रदिष्टम्॥

३० सन्ध्यालक्षणाध्यायः

३०.०१ अर्ध-अस्तमितान् उदितात् सूर्याद् अस्पष्टभं नभो यावत्।

३०.०१ तावत् सन्ध्याकालश् चिह्नैर् एतैः फलं च-अस्मिन्॥

३०.०२ मृग-*शकुनि[K.शकुन]-पवन-परिवेष-परिधि-परिघ-अभ्रवृक्ष-सुरचापैः।

३०.०२ गन्धर्वनगर-रविकर-दण्ड-रजः स्नेहवर्णैश् च॥

३०.०३ भैरवम् उच्चैर् विरुवन् मृगो -असकृद् ग्राम-घातम् आचष्टे।

३०.०३ रविदीप्तो दक्षिणतो महास्वनः सैन्य-घातकरः॥

३०.०४ अपसव्ये संग्रामः सव्ये सेना-समागमः शान्ते।

३०.०४ मृगचक्रे पवने वा सन्ध्यायां मिश्रगे वृष्टिः॥

३०.०५ दीप्त-मृग-अण्डज-विरुता प्राक् सन्ध्या देश-नाशम् आख्याति।

३०.०५ दक्षिणदिक्-स्थैर् विरुता ग्रहणाय पुरस्य दीप्तास्यैः॥

३०.०६ गृह-तरु-तोरण-मथने सपांशु-लोष्ट-उत्करे -अनिले प्रबले।

३०.०६ भैरवरावे रूक्षे खगपातिनि च-अशुभा सन्ध्या॥

३०.०७ मन्द-पवन-अवघट्टित-चलित-पलाश-द्रुमा विपवना वा।

३०.०७ मधुरस्वर-शान्त-विहङ्ग-मृग-रुता पूजिता सन्ध्या॥

३०.०८ सन्ध्याकाले स्निग्धा दण्ड-तडित्-मत्स्य-परिधि-परिवेषाः।

३०.०८ सुरपतिचाप-ऐरावत-रविकिरणाश् चाशु वृष्टिकरः॥

३०.०९ विच्छिन्न-विषम-विध्वस्त-विकृत-कुटिल-अपसव्य-परिवृत्ताः।

३०.०९ तनु-ह्रस्व-विकल-कलुषाश् च विग्रह-अवृष्टिदाः किरणाः॥

३०.१० उद्द्योतिनः प्रसन्ना ऋजवो दीर्घाः प्रदक्षिणावर्ताः।

३०.१० किरणाः शिवाय जगतो वितमस्के नभसि भानुमतः॥

३०.११ शुक्लाः करा दिनकृतो दिव-आदि-मध्य-अन्त-गामिनः स्निग्धाः।

३०.११ अव्युच्छिन्ना ऋजवो वृष्टिकरास् ते *त्व्[K.ह्य्] अमोघाख्याः॥

३०.१२ कल्माष-बभ्रु-कपिला विचित्र-माञ्जिष्ठ-हरित-शबलाभाः।

३०.१२ त्रिदिव-अनुबन्धिनो -अवृष्टये -अल्पभयदास् तु सप्ताहात्॥

३०.१३ ताम्रा बलपति-मृत्युं पीत-अरुण-सन्निभाश् च तद्-व्यसनम्।

३०.१३ हरिताः पशु-सस्य-बधं धूमसवर्णा गवां नाशम्॥

३०.१४ माञ्जिष्टाभाः शस्त्र-अग्नि-सम्भ्रमं बभ्रवः पवन-वृष्टिम्।

३०.१४ भस्म-सदृशास् त्व् अवृष्टिं तनुभावं शबल-कल्माषाः॥

३०.१५अ बन्धूक-पुष्प-अञ्जन-चूर्ण-सन्निभं

३०.१५ब् सान्ध्यं रजो -अभ्येति यदा दिवाकरम्।

३०.१५च् लोकास् तदा रोगशतैर् निपीड्यते

३०.१५द् शुक्लं रजो लोक-विवृद्धि-शान्तये॥

३०.१६ रविकिरण-जलद-मरुतां सङ्घातो दण्डवत् स्थितो दण्डः।

३०.१६ स विदिक्-स्थितो नृपाणाम् अशुभो दिक्षु *द्विजादीनाम्[Kऽस् त्र्. द्विजातीनाम्]॥

३०.१७ शस्त्र-भय-आतङ्क-करो दृष्टः प्राङ्-मध्य-सन्धिषु दिनस्य।

३०.१७ शुक्लाद्यो विप्रादीन् यद् अभिमुखस् तां निहन्ति दिशम्॥

३०.१८ दधिसदृशाग्रो नीलो भानु-च्छादी ख-मध्यगो -अभ्रतरुः।

३०.१८ पीतच्छुरिताश् च घना घनमूला भूरिवृष्टिकराः॥

३०.१९ अनुलोमगे -अभ्रवृक्षे शमं गते यायिनो नृपस्य बधः।

३०.१९ बालतरु-प्रतिरूपिणि युवराज-अमात्ययोर् मृत्युः॥

३०.२० कुवलय-वैदूर्य-अम्बुज-किञ्जल्काभा प्रभञ्जन-उन्मुक्ता।

३०.२० सन्ध्या करोति वृष्टिं रविकिरण-उद्भासिता सद्यः॥

३०.२१ अशुभ-आकृति-घन-गन्धर्वनगर-नीहार-*धूम-पांशुयुता[K.पांशुधूमयुता]।

३०.२१ प्रावृषि करोत्य् अवग्रहम् अन्यतौ शस्त्र-कोपकरी॥

३०.२२ शिशिरादिषु वर्णाः शोण-पीत-सित-चित्र-पद्म-रुधिर-निभाः।

३०.२२ प्रकृतिभवाः सन्ध्यायां स्वतौ शस्ता विकृतिर् अन्या॥

३०.२३ आयुधभृन् नररूपं छिन्नाभ्रं परभयाय रविगामि।

३०.२३ सित-खपुरे -अर्क-आक्रान्ते पुरलाभो भेदने नाशः॥

३०.२४अ सित-सितान्त-घन-आवरणं रवेर्

३०.२४ब् भवति वृष्टिकरं यदि सव्यतः।

३०.२४च् यदि च वीरण-गुल्म-निभैर् घनैर्

३०.२४द् दिवसभर्तुर् अदीप्तदिग्-उद्भवैः॥

३०.२५ नृप-विपत्तिकरः परिघः सितः क्षतज-तुल्यवपुर् बलकोपकृत्।

३०.२५ कनक-रूपधरो बल-वृद्धिदः सवितुर् उद्गम-काल-समुत्थितः॥

३०.२६अ उभयपार्श्वगतौ परिधी रवेः

३०.२६ब् प्रचुरतोय-*करौ[K.कृतौ] वपुषा-अन्वितौ।

३०.२६च् अथ समस्त-ककुप्-परिचारिणः

३०.२६द् परिधयो -अस्ति कणो -अपि न वारिणः॥

३०.२७ ध्वज-आतपत्र-पर्वत-द्विप-अश्व-रूपधारिणः।

३०.२७ जयाय सन्ध्ययोर् घना रणाय रक्तसन्निभाः॥

३०.२८ पलाल-धूम-सञ्चय-स्थित-उपमा बलाहकाः।

३०.२८ बलान्य् अरूक्ष-मूर्तयो विवर्धयन्ति भूभृताम्॥

३०.२९ विलम्बिनो द्रुम-उपमाः खर-अरुण-प्रकाशिनः।

३०.२९ घनाः शिवाय सन्ध्ययोः पुर-उपमाः शुभावहाः॥

३०.३० दीप्त-विहङ्ग-शिवा-मृग-घुष्टा दण्ड-रजः-परिघ-आदियुता च।

३०.३० प्रत्यहम् अर्कविकारयुता वा देश-नरेश-सुभिक्ष-बधाय॥

३०.३१अ प्राची तत्क्षणम् एव नक्तम् अपरा सन्ध्या त्र्यहाद् वा फलं

३०.३१ब् सप्ताहात् परिवेष-रेणु-परिघाः कुर्वन्ति सद्यो न चेत्।

३०.३१च् तद्वत् सूर्यकर-इन्द्रकार्मुक-तडित्-प्रत्यर्क-मेघ-अनिलास्

३०.३१द् तस्मिन्न् एव दिने -अष्टमे -अथ विहगाः सप्ताहपाका मृगाः॥

३०.३२अ एकं दीप्त्या योजनं भाति सन्ध्या

३०.३२ब् विद्युद्भासा षट् प्रकाशीकरोति।

३०.३२च् पञ्च-अब्दानां गर्जितं याति शब्दो

३०.३२द् नास्तीयत्ता *के चिद्[K.का चिद्] उल्कानिपाते॥

३०.३३अ प्रत्यर्कसंज्ञः परिधिस् तु तस्य

३०.३३ब् *त्रियोजनाभः[K.त्रियोजना भा] परिघस्य पञ्च।

३०.३३च् षट्पञ्चदृश्यं परिवेषचक्रं

३०.३३द् दश-अमरेशस्य धनुर् विभाति॥

३१ दिग्दाहलक्षणाध्यायः

३१.०१ दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः।

३१.०१ यश् च-अरुणः स्याद् अपसव्य-वायुः सस्यस्य नाशं स करोति दृष्टः॥

३१.०२अ यो -अतीव दीप्त्या कुरुते प्रकाशं

३१.०२ब् छायाम् अपि व्यञ्जयते -अर्कवद् यः।

३१.०२च् राज्ञो महद् वेदयते भयं स

३१.०२द् शस्त्र-प्रकोपं क्षतज-अनुरूपः॥

३१.०३अ प्राक् क्षत्रियाणां सनरेश्वराणां

३१.०३ब् प्राग्दक्षिणे शिल्पि-कुमार-पीडा।

३१.०३च् याम्ये सह-उग्रैः पुरुषैस् तु वैश्या

३१.०३द् दूताः पुनर्भूप्रमदाश् च कोणे॥

३१.०४अ पश्चात् तु शूद्राः कृषि-जीविनश् च

३१.०४ब् चौरास् तुरङ्गैः सह वायुदिक्स्थे।

३१.०४च् पीडां व्रजन्त्य् उत्तरतश् च विप्राः

३१.०४द् *पाखण्डिनो[K.पाषण्डिनो] वाणिजकाश् च शार्व्याम्॥

३१.०५अ नभः प्रसन्नं विमलानि भानि
३१.०५ब् प्रदक्षिणं वाति सदागतिश् च।

३१.०५च् दिशां च दाहः कनक-अवदातो

३१.०५द् हिताय लोकस्य सपार्थिवस्य॥

३२ भूकम्पलक्षणाध्यायः

३२.०१ क्षितिकम्पम् आहुर् एके बृहदन्तर्जलनिवासिसत्त्व-कृतम्।

३२.०१ भूभार-खिन्न-दिग्गज-विश्राम-समुद्भवं च-अन्ये॥

३२.०२ अनिलो -अनिलेन निहतः क्षितौ पतन् सस्वनं करोत्य् *अन्ये[K.एके]।

३२.०२ के चित् त्व् अदृष्ट-कारितम् इदम् अन्ये प्राहुर् आचार्याः॥

३२.०३ गिरिभिः पुरा सपक्षैर् वसुधा प्रपतद्भिर् उत्पद्भिश् च।

३२.०३ आकम्पिता पितामहम् आह-अमरसदसि सव्रीडम्॥

३२.०४ भगवन् नाम मम-एतत् त्वया कृतं यद् अचल-इति तन् न तथा।

३२.०४ क्रियते -अचलैश् चलद्भिः शक्ताहं नास्य खेदस्य॥

३२.०५ तस्याः *सगद्गद-गिरं[K.सगङ्गदगिरं] किं चित् स्फुरिताधरं विनतम् ईषत्।

३२.०५ साश्रुविलोचनम् आननम् आलोक्य पितामहः प्राह॥

३२.०६ मन्युं हर-इन्द्र धात्र्याः क्षिप कुलिशं शैल-पक्ष-भङ्गाय।

३२.०६ शक्रः कृतम् इत्य् उक्त्वा मा भैर् इति वसुमतीम् आह॥

३२.०७ किन्त्व् अनिल-दहन-सुरपति-वरुणाः सदसत्फल-अवबोधार्थम्।

३२.०७ प्राग् द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति॥

३२.०८ चत्वार्य् आर्यम्णाद्यान्य् आदित्यं मृगशिरो -अश्वयुक् च-इति।

३२.०८ मण्डलम् एतद् वायव्यम् अस्य रूपाणि सप्ताहात्॥

३२.०९ धूम-आकुलीकृत-आशे नभसि नभस्वान् रजः क्षिपन् भौमम्।

३२.०९ विरुजन् द्रुमांश् च विचरति रविर् अपटु-कर-अवभासी च॥

३२.१० वायव्ये भूकम्पे सस्य-अम्बु-वन-औषधी-क्षयो -अभिहितः।

३२.१० श्वयथु-श्वास-उन्माद-ज्वर-कास-*भवो[K.भवा] वणिक्-पीडा॥

३२.११ रूप-आयुध-भृद्-वैद्या-स्त्री-कवि-गान्धर्व-पण्य-शिल्पिजनाः।

३२.११ पीड्यन्ते सौराष्ट्रक-कुरु-मघध-दशार्ण-मत्स्याश् च॥

३२.१२ पुष्य-आग्नेय-विशाखा-भरणी-पित्र्य-अज-भाग्य-संज्ञानि।

३२.१२ वर्गो हौतभुजो -अयं करोति रूपाण्य् अथ-एतानि॥

३२.१३ तारा-उल्कापात-आवृतम् आदीप्तम् इव-अम्बरं सदिग्दाहम्।

३२.१३ विचरति मरुत्-सहायः सप्तार्चिः सप्तदिवसान्तः॥

३२.१४ आग्नेये -अम्बुद-नाशः सलिलाशय-संक्षयो नृपति-वैरम्।

३२.१४ दद्रू-विचर्चिका-ज्वर-विसर्पिकाः पाण्डुरोगश् च॥

३२.१५ दीप्तौजसः प्रचण्डाः पीड्यन्ते च-अश्मक-अङ्ग-बाह्लीकाः।

३२.१५ तङ्गण-कलिङ्ग-वङ्ग-*द्रविडाः[U - द्रविणाः] *शबरा अनेकविधाः[K.शबराश् च नैकविधाः]॥

३२.१६ अभिजित्-श्रवण-धनिष्ठा-प्राजापत्य-ऐन्द्र-वैश्व-मैत्राणि।

३२.१६ सुरपति-मण्डलम् एतद् भवन्ति *च-अप्य् अस्य रूपाणि[K.च अस्य स्वरूपाणि]॥

३२.१७ चलित-अचल-वर्ष्माणो गम्भीर-विराविणस् *तडिद्वन्तः[K.तडित्वन्तः]।

३२.१७ गवल-अलिकुल-अहिनिभा विसृजन्ति पयः पयोवाहाः॥

३२.१८ ऐन्द्रं *स्तुत[K.शुति]-कुलजाति-ख्यात-अवनिपाल-गणप-विध्वंसि।

३२.१८ अतिसार-गलग्रह-वदनरोग-कृच् छर्दिकोपाय॥

३२.१९ काशि-युगन्धर-पौरव-किरात-कीर-अभिसार-हल-मद्राः।

३२.१९ अर्बुद-*सुराष्ट्र[K.सुवास्तु]-मालव-पीडाकरम् इष्टवृष्टिकरम्॥

३२.२० पौष्ण-आप्य-आर्द्रा-आश्लेषा-मूल-अहिर्बुध्न्य-वरुणदेवानि।

३२.२० मण्डलम् एतद् वारुणम् अस्यापि भवन्ति रूपाणि॥

३२.२१ नीलोत्पल-अलि-भिन्न-अञ्जन-त्विषो मधुर-राविणो बहुलाः।

३२.२१ तडिद्-उद्भासित-देहा *धारा-अङ्कुर[K.धाराङ्कुश]वर्षिणो जलदाः॥

३२.२२ वारुणम् अर्णव-सरिद्-आश्रित-घ्नम् अतिवृष्टिदं विगत-वैरम्।

३२.२२ गोनर्द-चेदि-कुकुरान् किरात-वैदेहकान् हन्ति॥

३२.२३ षड्भिर् मासैः कम्पो द्वाभ्यां पाकं च याति निर्घातः।

३२.२३ अन्यान् अप्य् उत्पातान् जगुर् अन्ये मण्डलैर् एतैः॥

[K.३वेर्सेस् इन्सेर्तेद्

K.३२.२४ उल्का हरिश् चन्द्रपुरं रजश् च निर्घातभूकम्पककुप्प्रदाहाः।

K.३२.२४ वातो -अतिचण्डो ग्रहणं रवीन्द्वोर् नक्षत्रतारागणवैकृतानि॥

K.३२.२५ व्यभ्रे वृष्टिर् वैकृतं वातवृष्टिर् धूमो -अनग्नेर् विस्फुलिङ्गार्चिषो वा।

K.३२.२५ वन्यं सत्त्वं ग्राममध्ये विशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा॥

K.३२.२६ सन्ध्याविकाराः परिवेषखण्डा नद्यः प्रतीपा दिवि तूर्यनादाः।

K.३२.२६ अन्यच् च यत्स्यात् प्रकृतेः प्रतीपं तन्मण्डलैर् एव फलं निगाद्यम्॥]

३२.२४ हन्त्य् ऐन्द्रो वायव्यं वायुश् च-अप्य् ऐन्द्रम् एवम् अन्योन्यम्।

३२.२४ वारुण-हौतभुजाव् अपि वेला-नक्षत्रजाः कम्पाः॥

३२.२५ प्रथित-नरेश्वर-मरण-व्यसनान्य् आग्नेय-वायुमण्डलयोः।

३२.२५ क्षुद्भय-मरक-अवृष्टिभिर् उपताप्यन्ते जनाश् च अपि॥

३२.२६ वारुण-पौरन्दरयोः सुभिक्ष-शिववृष्टि-हार्दयो लोके।

३२.२६ गावो -अतिभूरि-पयसो निवृत्त-वैराश् च भूपालाः॥

३२.२७ पक्षैश् चतुर्भिर् अनिलस् त्रिभिर् अग्निर् देवराट् च सप्ताहात्।

३२.२७ सद्यः फलति च वरुणो येषु न कालो -अद्भुतेषु-उक्तः॥

३२.२८ चलयति पवनः शतद्वयं शतम् अनलो दशयोजन-अन्वितम्।

३२.२८ सलिलपतिर् अशीतिसंयुतं कुलिशधरो -अभ्यधिकं च *षष्टितः[K.षष्टिकम्]॥

३२.२९ त्रिचतुथसप्तमदिने मासे पक्षे तथा त्रिपक्षे चे।

३२.२९ यदि भवति भूमिकम्पः प्रधान-नृप-नाशनो भवति॥

३३ उल्कालक्षणाध्यायः

३३.०१ दिवि भुक्त-शुभफलानां पततां रूपाणि यानि तान्य् उल्काः।

३३.०१ धिष्ण्या-उल्का-अशनि-विद्युत्-तारा इति पञ्चधा भिन्नाः॥

३३.०२ उल्का पक्षेण फलं तद्वद् धिष्ण्या-अशनिस् त्रिभिः पक्षैः।

३३.०२ विद्युद् अहोभिः षड्भिः तद्वत् तारा विपाचयति॥

३३.०३ तारा फल-पाद-करी फलार्धदात्री प्रकीर्तिता धिष्ण्या।

३३.०३ तिस्रः सम्पूर्ण-फला विद्युद् अथ-उल्का-अशनिश् च-इति॥

३३.०४ अशनिः स्वनेन महता नृ-गज-अश्व-मृग-अश्म-वेश्म-तरु-पशुषु।

३३.०४ निपतति विदारयन्ती धरातलं चक्र-संस्थाना॥

३३.०५ विद्युत् सत्त्वत्रासं जनयन्ती तटतटस्वना सहसा।

३३.०५ कुतिलविशाला निपतति जीव-इन्धनराशिषु ज्वलिता॥

३३.०६ धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यते -अन्तराभ्यधिकम्।

३३.०६ ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन॥

३३.०७ तारा हस्तं दीर्घा शुक्ला ताम्र-अब्ज-तन्तु-रूपा वा।

३३.०७ तिर्यग् अधश् च-ऊर्ध्वं वा याति वियत्य् उह्यमाना-इव॥

३३.०८ उल्का शिरसि विशाला निपतन्ती वर्धते प्रतनु-पुच्छा॥

३३.०८ दीर्घा *च भवति[K.भवति च] पुरुषं भेदा बहवो भवत्य् अस्याः॥

३३.०९ प्रेत-प्रहरण-खर-करभ-नक्र-कपि-दंष्ट्रि-लाङ्गल-मृगाभाः।

३३.०९ गोधा-अहि-धूम-रूपाः पापा या च-उभयशिरस्का॥

३३.१० ध्वज-झष-*गिरि-करि[K.करिगिरि]-कमल-इन्दु-तुरग-सन्तप्त-रजत-हंसाभाः।

३३.१० *श्रीवृक्ष[K.श्रीवत्स, KSस् त्र्. श्रीवृक्ष]-वज्र-शङ्ख-स्वस्तिक-रूपाः शिव-सुभिक्षाः॥

३३.११ अम्बर-मध्याद् बह्व्यो निपतन्त्यो राज-राष्ट्र-नाशाय।

३३.११ बम्भ्रमती गगन-उपरि विभ्रमम् आख्याति लोकस्य॥

३३.१२ संस्पृशती चन्द्रार्कौ तद्विसृता वा सभूप्रकम्पा च।

३३.१२ परचक्र-आगम-नृप-भय-दुर्भिक्ष-अवृष्टि-भय-जननी॥

३३.१३ पौर-इतरघ्नम् उल्का-अपसव्य-करणं दिवाकर-हिमांशवोः।

३३.१३ उल्का शुभदा पुरतो दिवाकर-विनिःसृता यातुः॥

३३.१४ शुक्ला रक्ता पीता कृष्णा च-उल्का द्विज-आदिवर्णघ्नी।

३३.१४ क्रमशश् चैतान् हन्युर् मूर्ध-उरः-पार्श्व-पुच्छ-स्थाः॥

३३.१५ उत्तरदिग्-आदि-पतिता विप्रादीनाम् अनिष्टदा रूक्षा।

३३.१५ ऋज्वी स्निग्ध-अखण्डा नीच-उपगता च तद्-वृद्ध्यै॥

३३.१६ *श्याव-अरुण[K.श्यामा वारुण]-नील-असृग्-दहन-असित-भस्म-सन्निभा रूक्षा।

३३.१६ सन्ध्या-दिन-जा वक्रा दलिता च पर-आगम-भयाय॥

३३.१७ नक्षत्र-ग्रह-*घातैस्[K.घाते] तद्भक्तीनां क्षयाय निर्दिष्टा।

३३.१७ उदये घ्नती रवीन्दू पौर-इतर-मृत्यवे -अस्ते वा॥

३३.१८ भाग्य-आदित्य-धनिष्ठा-मूलेषु-उल्का-हतेषु युवतीनाम्।

३३.१८ विप्र-क्षत्रिय-पीडा पुष्य-अनिल-विष्णुदेवेषु॥

३३.१९ ध्रुव-सौम्येषु नृपाणाम् उग्रेषु सदारुणेषु चौराणाम्।

३३.१९ क्षिप्रेषु कलाविदुषां पीडा साधारणे च हते॥

३३.२० कुर्वन्त्य् एताः पतिता देवप्रतिमासु राज-राष्ट्र-भयम्।

३३.२० शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडाम्॥

३३.२१ आशा-ग्रह-उपघाते तद्देश्यानां खले कृषिरतानाम्।

३३.२१ चैत्यतरौ सम्पतिता सत्कृत-पीडां करोत्य् उल्का॥

३३.२२ द्वारि पुरस्य पुरक्षयम् अथ-इन्द्रकीले जनक्षयो -अभिहितः।

३३.२२ ब्रह्म-आयतने विप्रान् विनिहन्याद् गोमिनो गोष्ठे॥

३३.२३ क्ष्वेडा-आस्फोटित-वादित-गीत-उत्कुष्ट-स्वना भवन्ति यदा।

३३.२३ उल्का-निपात-समये भयाय राष्ट्रस्य सनृपस्य॥

३३.२४अ यस्याश् चिरं तिष्ठति खे -अनुषङ्गो

३३.२४ब् दण्डाकृतिः सा नृपतेर् भयाय।

३३.२४च् या च-उह्यते तन्तुधृता-इव खस्था

३३.२४द् या वा महेन्द्र-ध्वज-तुल्य-रूपा॥

३३.२५ श्रेष्ठिनः प्रतीपगा तिर्यगा *नृपाङ्गनानाम्[K.नृपाङ्गनाः]।

३३.२५ हन्त्य् अधोमुखी नृपान् ब्राह्मणान् अथ-ऊर्ध्वगा॥

३३.२६ *बर्हि[K.वर्हि]-पुच्छ-रूपिणी लोक-संक्षय-आवहा।

३३.२६ सर्पवत् *प्रसर्पती[K.प्रसर्पिणी] योषिताम् अनिष्टदा॥

३३.२७ हन्ति मण्डला पुरं छत्रवत् पुरोहितम्।

३३.२७ वंश-गुल्मवत् स्थिता राष्ट्र-दोष-कारिणी॥

३३.२८ व्याल-सूकर-उपमा विस्फुलिङ्ग-मालिनी।

३३.२८ खण्डशो -अथ वा गता सस्वना च पापदा॥

३३.२९ सुरपतिचाप-प्रतिमा राज्यं नभसि विलीना जलदान् हन्ति।

३३.२९ पवन-विलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा॥

३३.३० अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य।

३३.३० निपतति च यया दिशा प्रदीप्ता जयति रिपून् अचिरात् तया प्रयातः॥

३४ परिवेषलक्षणाध्यायः

३४.०१ सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः।

३४.०१ नानावर्ण-आकृतयस् तन्व् अभ्रे व्योम्नि परिवेषाः॥

३४.०२ ते रक्त-नील-पाण्डुर-कापोत-अभ्राभ-शबल-*हरित[K.हरि]-शुक्लाः।

३४.०२ इन्द्र-यम-वरुण-निरृति-श्वसन-ईश-पितामह-*अम्बु[K.अग्नि]कृताः॥

३४.०३ धनदः करोति मेचकम् अन्योन्य-गुण-आश्रयेण च-अप्य् अन्ये।

३४.०३ प्रविलीयते मुहुर्मुहुर् अल्पफलः सो -अपि वायुकृतः॥

३४.०४ चाष-शिखि-रजत-तैल-क्षीर-जलाभः स्वकाल-सम्भूतः।

३४.०४ अविकल-वृत्तः स्निग्धः परिवेषः शिव-सुभिक्ष-करः॥

३४.०५ सकल-गगन-अनुचारी नैकाभः क्षतज-सन्निभो रूक्षः।

३४.०५ असकल-शकट-शरासन-शृङ्गाटकवत् स्थितः पापः॥

३४.०६ शिखि-गल-समे -अतिवर्ष्णे बहुवर्णे नृप-वधो भयं धूम्रे।

३४.०६ हरिचाप-निभे युद्धान्य् अशोककुसुम-प्रभे च-अपि॥

३४.०७ वर्णेन-एकेन यदा बहुलः स्निग्धः क्षुर-अभ्रक-आकीर्णः।

३४.०७ स्व-ऋतौ सद्यो वर्षं करोति पीतश् च दीप्तार्कः॥

३४.०८ दीप्त-*मृग-विहङ्ग[K.विहङ्गमृग]-रुतः कलुषः सन्ध्या-त्रय-उत्थितो -अतिमहान्।

३४.०८ भयकृत् तडिद्-उल्का-आद्यैर् हतो नृपं हन्ति शस्त्रेण॥

३४.०९ प्रतिदिनम् अर्क-हिमांश्वोर् अहर्निशं रक्तयोर् नरेन्द्र-वधः।

३४.०९ परिविष्टयोर् अभीक्षणं लग्न-*अस्तमय[K.अस्तनभः]स्थयोस् तद्वत्॥

३४.१० सेनापतेर् भयकरो द्विमण्डलो न-अतिशस्त्र-कोपकरः।

३४.१० त्रिप्रभृति शस्त्र-कोपं युवराज-भयं नगररोधम्॥

३४.११ वृष्टिस् त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे।

३४.११ होराजन्माधिपयोर् जन्म-ऋक्षे वां *-अशुभो[K.वाशुभो ऊ.च अशुभो] राज्ञः॥

३४.१२ परिवेषमण्डलगतो रवितनयः क्षुद्रधान्य-नाश-करः।

३४.१२ जनयति च वात-वृष्टिं स्थावर-कृषिकृन् निहन्ता च॥

३४.१३ भौमे कुमार-बलपति-सैन्यानां विद्रवो -अग्निशस्त्र-भयम्।

३४.१३ जीवे परिवेषगते पुरोहित-अमात्य-नृप-पीडा॥

३४.१४ मन्त्रि-स्थावर-लेखक-परिवृद्धिश् चन्द्रजे सुवृष्टिश् च।

३४.१४ शुक्रे यायि-क्षत्रिय-*राज्ञी[K.राज्ञां]पीडा प्रियं चान्नम्॥

३४.१५ क्षुद्-अनल-मृत्यु-नराधिप-शस्त्रेभ्यो जायते भयं केतौ।

३४.१५ परिविष्टे गर्भ-भयं राहौ व्याधिर् नृप-भयं च॥

३४.१६ युद्धानि विजानीयात् परिवेष-अभ्यन्तरे द्वयोर् ग्रहयोः।

३४.१६ दिवसकृतः शशिनो वा क्षुद्-अवृष्टि-भयं त्रिषु प्रोक्तम्॥

३४.१७ याति चतुर्षु नरेन्द्रः स-अमात्य-पुरोहितो वशं मृत्योः।

३४.१७ प्रलयम् इव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु॥

३४.१८ ताराग्रहस्य कुर्यात् पृथग् एव समुत्थितो नरेन्द्र-वधम्।

३४.१८ नक्षत्राणाम् अथ वा यदि केतोर् न-उदयो भवति॥

३४.१९ विप्र-क्षत्रिय-विट्-शूद्रहा भवेत् प्रतिपद्-आदिषु क्रमशः।

३४.१९ श्रेणी-पुर-कोशानां पञ्चम्य्-आदिष्व् अशुभकारी॥

३४.२० युवराजस्य-अष्टम्यां परतस् त्रिषु पार्थिवस्य दोषकरः॥

३४.२० पुर-रोधो द्वादश्यां सैन्य-क्षोभस् त्रयोदश्याम्॥

३४.२१ नरपतिपत्नी-पीडां परिवेषो -अभ्युत्थितश् चतुर्दश्याम्।

३४.२१ कुर्यात् तु पञ्चदश्यां पीडां मनुजाधिपस्य-एव॥

३४.२२ नागरकाणाम् अभ्यन्तर-स्थिता यायिनां च बाह्यस्था।

३४.२२ परिवेष-मध्य-रेखा विज्ञेया-आक्रन्दसाराणाम्॥

३४.२३ रक्तः श्यामो रूक्षश् च भवति येषां पराजयस् तेषाम्।
३४.२३ स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस् तेषाम्॥

३५ इन्द्रायुद्धलक्षणाध्यायः

३५.०१ सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः स-अभ्रे।

३५.०१ वियति धनुः-संस्थाना ये दृश्यन्ते तद् इन्द्रधनुः॥

३५.०२ के चिद् अनन्तकुल-उरग-निःश्वास-उद्भूतम् आहुर् आचार्याः।

३५.०२ तद् यायिनां नृपाणाम् अभिमुखम् अजय-आवहं भवति॥

३५.०३ अच्छिन्नम् अवनि-गाढं द्युतिमत् स्निग्धं घनं विविधवर्णम्।

३५.०३ द्विर् उदितम् अनुलोमं च प्रशस्तम् अम्भः प्रयच्छति च॥

३५.०४ विदिग्-उद्भूतं दिक्-स्वामि-नाशनं व्यभ्रजं मरक-कारि।

३५.०४ पाटल-पीतक-नीलैः शस्त्र-अग्नि-क्षुत्-कृता दोषाः॥

३५.०५ जलमध्ये -अनावृष्टिर् भुवि सस्य-वधस् तरौ स्थिते व्याधिः।

३५.०५ *वाल्मीके[K.वल्मीके] शस्त्र-भयं निशि सचिव-वधाय धनुर् ऐन्द्रम्॥

३५.०६ वृष्टिं करोत्य् अवृष्ट्यां वृष्टिं वृष्ट्यां निवारयत्य् ऐन्द्र्याम्।

३५.०६ पश्चात् सदैव वृष्टिं कुलिशभृतश् चापम् आचष्टे॥

३५.०७अ चापं मघोनः कुरुते निशायाम्

३५.०७ब् आखण्डलायां दिशि भूपपीडाम्।

३५.०७च् याम्य-अपर-उदक्-प्रभवं निहन्यात्

३५.०७द् सेनापतिं नायक-मन्त्रिणौ च॥

३५.०८ निशि सुरचापं सित-वर्णाद्यं जनयति पीडां द्विज-पूर्वाणाम्।

३५.०८ भवति च यस्यां दिशि तद् देश्यं नरपति-मुख्यं नचिराद् धन्यात्॥

३६ गन्धर्वनगरलक्षणाध्यायः

३६.०१ उदग्-आदि पुरोहित-नृप-बलपति-युवराज-दोषदं खपुरम्।

३६.०१ सित-रक्त-पीत-कृष्णं विप्र-आदीनाम् अभावाय॥

३६.०२ नागर-नृपति-जय-आवहम् उदग्-विदिक्स्थं विवर्ण-नाशाय।

३६.०२ शान्त-आशायां दृष्टं सतोरणं नृपति-विजयाय॥

३६.०३ सर्वदिग्-उत्थं सततोत्थितं च भयदं नरेन्द्र-राष्ट्राणाम्।

३६.०३ चौर-अटविकान् हन्याद् धूम-अनल-शक्रचाप-आभम्॥

३६.०४ गन्धर्वनगरम् उत्थितम् आपाण्डुरम् अशनिपात-वात-करम्।

३६.०४ दीप्ते नरेन्द्र-मृत्युर् वामे -अरिभयं जयः सव्ये॥

३६.०५ अनेकवर्ण-आकृति खे प्रकाशते पुरं पताका-ध्वज-तोरण-अन्वितम्।

३६.०५ यदा तदा नाग-मनुष्य-वाजिनां पिबत्य् असृग् भूरि रणे वसुन्धरा॥

३७ प्रतिसूर्यलक्षणाध्यायः

३७.०१ प्रतिसूर्यकः प्रशस्तो दिवसकृद्-ऋतु-वर्ण-सप्रभः स्निग्धः।

३७.०१ वैदूर्य-निभः स्वच्छः शुक्लश् च क्षेम-सौभिक्षः॥

३७.०२ पीतो व्याधिं जनयत्य् अशोकरूपश् च शस्त्र-कोपाय।

३७.०२ प्रतिसूर्याणां माला दस्यु-भय-आतङ्क-नृप-हन्त्री॥

३७.०३ दिवसकृतः प्रतिसूर्यो जलकृद्-उदग्-दक्षिणे स्थितो -अनिलकृत्।

३७.०३ उभयस्थः सलिलभयं नृपम् उपरि निहन्त्य् अधो जनहा॥

[K.छप्. ३८ रजोलक्षणम् इन्सेर्तेद्

K.३८.०१ कथयन्ति पार्थिववधं रजसा घन-तिमिर-सञ्चय-निभेन।

K.३८.०१ अविभाव्यमान-गिरि-पुर-तरवः सर्वा दिशश् छन्नाः॥

K.३८.०२ यस्याम् दिशि धूमचयः प्राक् प्रभवति नाशमेति वा यस्याम्।

K.३८.०२ आगच्छति सप्ताहात् तत्र एव भयं न सन्देहः॥

K.३८.०३ श्वेते रजोघनौघे पीडा स्यान् मन्त्रिजनपदानां च।

K.३८.०३ नचिरात् प्रकोपम् उपयाति शस्त्रम् अतिसङ्कुला सिद्धिः॥

K.३८.०४ अर्कोदये विजृम्भति यदि दिनम् एकं दिनद्वयं वा-अपि।

K.३८.०४ स्थगयन्न् इव गगन-तलं भयम् अत्युग्रं निवेदयति॥

K.३८.०५ अनवरतसञ्चयवहं रजनीम् एकां प्रधाननृप-हन्तृ।

K.३८.०५ क्षेमाय च शेषाणां विचक्षणानां नरेन्द्राणाम्॥

K.३८.०६ रजनीद्वयं विसर्पति यस्मिन् राष्ट्रे रजोघनं बहुलम्।

K.३८.०६ परचक्रस्य आगमनं तस्मिन्न् अपि सन्निबोद्धव्यम्॥

K.३८.०७ निपतति रजनीत्रितयं चतुष्कम् अप्य् अन्नरसविनाशाय।

K.३८.०७ राज्ञां सैन्यक्षोभो रजसि भवेत् पञ्चरात्रभवे॥

K.३८.०८ केत्वाद्युदयविमुक्तं यदा रजो भवति तीव्रभयदायि।

K.३८.०८ शिशिराद् अन्यत्रर्तौ फलम् अविकलम् आहु आचार्याः॥]

३८ निर्घातलक्षणाध्यायः

३८.०१ पवनः पवन-अभिहतो गगनाद् अवनौ यदा समापतति।

३८.०१ भवति तदा निर्घातः स च पापो दीप्त-विहग-रुतः॥

३८.०२ अर्क-उदये -अधिकरणिक-नृप-धनि-योध-अङ्गना-वणिग्-वेश्याः।

३८.०२ आप्रहरांशे -अज-आविकम् उपहन्यात्-शूद्रपौरांश् च॥

३८.०३ आमध्य-अह्नाद् राज-उपसेविनो ब्राह्मणांश् च पीडयति।

३८.०३ वैश्य-जलदांस् तृतीये चौरान् प्रहरे चतुर्थे तु॥

३८.०४ अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि।

३८.०४ रात्रौ द्वितीय-यामे पिशाच-सङ्घान् निपीडयति॥

३८.०५ तुरग-करिणस् तृतीये विनिहन्याद् यायिनश् चतुर्थे च।

३८.०५ भैरव-जर्जरशब्दो याति यतस् तां दिशं हन्ति॥

३९ सस्यजातकाध्यायः

३९.०१ वृश्चिक-वृष-प्रवेशे भानोर् ये बादरायणेन-उक्ताः।

३९.०१ ग्रीष्म-शरत्-सस्यानां सद्-असद्-योगाः कृतास् त इमे॥

३९.०२ भानोर् अलिप्रवेशे केन्द्रैस् तस्मात्-शुभग्रह-आक्रान्तैः।

३९.०२ बलवद्भिः सौम्यैर् वा *निरीक्षिते[K.निरीक्षितैर्] ग्रैष्मिक-विवृद्धिः॥

३९.०३ अष्टमराशिगते -अर्के गुरुशशिनोः कुम्भ-सिंह-*संस्थितयोः[K.स्थितयोः]।

३९.०३ सिंह-घट-संस्थयोर् वा निष्पत्तिर् ग्रीष्म-सस्यस्य॥

३९.०४ अर्कात् सिते द्वितीये बुधे -अथ वा युगपद् एव वा स्थितयोः।

३९.०४ व्ययगतयोर् अपि तद्वन् निष्पत्तिर् अतीव गुरुदृष्ट्या॥

३९.०५ शुभमध्ये -अलिनि सूर्याद् गुरुशशिनोः सप्तमे परा सम्पत्।

३९.०५ अल्य्-आदिस्थे सवितरि गुरौ द्वितीये -अर्धनिष्पत्तिः॥

३९.०६ लाभ-हिबुक-अर्थ-युक्तैः सूर्याद् अलिगात् सित-इन्दु-शशिपुत्रैः।

३९.०६ सस्यस्य परा सम्पत् कर्मणि जीवे गवां च-अग्र्या॥

३९.०७ कुम्भे गुरुर् गवि शशी सूर्यो -अलिमुखे कुज-अर्कजौ मकरे।

३९.०७ निष्पत्तिर् अस्ति महती पश्चात् परचक्र-भय-रोगम्॥

३९.०८ मध्ये पापग्रहयोः सूर्यः सस्यं विनाशयत्य् अलिगः।

३९.०८ पापः सप्तमराशौ जातं जातं विनाशयति॥

३९.०९ अर्थस्थाने क्रूरः सौम्यैर् अनिरीक्षितः प्रथमजातम्।

३९.०९ सस्यं निहन्ति पश्चाद् उग्रं निष्पादयेद् व्यक्तम्॥

३९.१० जामित्र-केन्द्र-संस्थौ क्रूरौ सूर्यस्य वृश्चिक-स्थस्य।

३९.१० सस्य-विपत्तिं कुरुतः सौम्यैर् दृष्टौ न सर्वत्र॥

३९.११ वृश्चिक-संस्थाद् अर्कात् सप्तम-षष्ठ-उपगौ यदा क्रूरौ।

३९.११ भवति तदा निष्पत्तिः सस्यानाम् अर्घ-परिहानिः॥

३९.१२ विधिना-अनेन-एव रविर् वृष-प्रवेशे शरत्-समुत्थानाम्।

३९.१२ विज्ञेयः सस्यानां नाशाय शिवाय वा तज्ज्ञैः॥

३९.१३ त्रिषु मेष-आदिषु सूर्यः सौम्ययुतो वीक्षितो -अपि वा विचरन्।

३९.१३ *ग्रैष्मिक[K.ग्रष्मिक]धान्यं कुरुते *समर्घम्[K.समर्थम्] अभय-उपयोग्यं च॥

३९.१४ कार्मुक-मृग-घट-संस्थः *शारद-सस्यस्य[K.शारदस्य] तद्वद् एव रविः।

३९.१४ संग्रहकाले ज्ञेयो विपर्ययः क्रूरदृग्-*योगात्[K.यागात्]॥

४० द्रव्यनिश्चयाध्यायः

४०.०१ ये येषां द्रव्याणाम् अधिपतयो राशयः समुद्दिष्टाः।

४०.०१ मुनिभिः शुभाशुभार्थं तान् आगमतः प्रवक्ष्यामि॥

४०.०२ वस्त्र-आविक-कुतुपानां मसूर-गोधूम-रालक-यवानाम्।

४०.०२ स्थल-सम्भव-ओषधीनां कनकस्य च कीर्तितो मेषः॥

४०.०३ गवि वस्त्र-कुसुम-गोधूम-शालि-यव-महिष-सुरभितनयाः स्युः।

४०.०३ मिथुने -अपि धान्य-शारद-वल्ली-शालूक-कार्पासाः॥

४०.०४ कर्किणि कोद्रव-कदली-दूर्वा-फल-कन्द-पत्र-चोचानि।

४०.०४ सिंहे तुषधान्य-रसाः सिंह-आदीनां त्वचः सगुडाः॥

४०.०५ षष्ठे -अतसी-कलायाः कुलत्थ-गोधूम-मुद्ग-निष्पावाः।

४०.०५ सप्तमराशौ माषा *यव-गोधूमाः ससर्षपाश् च-एव[K.गोधूमाः सर्षपाः सयवाः]॥

४०.०६ अष्टमराशाव् इक्षुः सैक्यं लोहान्य् अज-आविकं च-अपि।

४०.०६ नवमे तु तुरग-लवण-अम्बर-अस्त्र-तिल-धान्य-मूलानि॥

४०.०७ मकरे तरु-गुल्म-आद्यं सैक्य-इक्षु-सुवर्ण-कृष्णलोहानि।

४०.०७ कुम्भे सलिलज-फल-कुसुम-रत्न-चित्राणि रूपाणि॥

४०.०८ मीने कपाल-सम्भव-रत्नान्य् अम्बु-उद्भवानि वज्राणि।

४०.०८ स्नेहाश् च नैकरूपा व्याख्याता मत्स्यजातं च॥

४०.०९ राशेश् चतुर्-दश-अर्थ-अय-सप्त-नव-पञ्चमस्थितो जीवः।

४०.०९ द्व्य्-एकादश-दश-पञ्च-अष्टमेषु शशिजश् च वृद्धिकरः॥

४०.१० षट्-सप्तमगो हानिं वृद्धिं शुक्रः करोति शेषेषु।

४०.१० उपचय-संस्थाः क्रूराः शुभदाः शेषेषु हानिकराः॥

४०.११ राशेर् यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः।

४०.११ तत्प्रोक्त-द्रव्याणां महार्घता दुर्लभत्वं च॥

४०.१२ इष्टस्थाने सौम्या बलिनो येषां भवन्ति राशीनाम्।

४०.१२ तद्द्रव्याणां वृद्धिः *सामर्घ्यं वल्लभत्वं च[K.सामर्थयमदुर्लभत्वं च]॥

४०.१३ गोचर-पीडायाम् अपि राशिर् बलिभिः शुभग्रहैर् दृष्टः।

४०.१३ पीडां न करोति तथा क्रूरैर् एवं विपर्यासः॥

४१ अर्घकाण्डाध्यायः

४१.०१ अतिवृष्ट्य्-उल्का-दण्डान् परिवेष-ग्रहण-परिधि-पूर्वांश् च।

४१.०१ दृष्ट्वा-अमावास्यायाम् उत्पातान् *पौर्णमास्यां[K.पूर्णमास्यां] च॥

४१.०२ ब्रूयाद् अर्घविशेषान् प्रतिमासं राशिषु क्रमात् सूर्ये।

४१.०२ अन्यतिथाव् उत्पाता ये ते डमरार्तये राज्ञाम्॥

४१.०३ मेष-उपगते सूर्ये ग्रीष्मज-धान्यस्य संग्रहं *कृत्वा[K.कुर्यात्]।

४१.०३ वन-मूल-फलस्य वृषे चतुर्थमासे तयोर् लाभः॥

४१.०४ मिथुनस्थे सर्वरसान् धान्यानि च संग्रहं समुपनीय।

४१.०४ षष्ठे मासे विपुलं *विक्रेता[K.विक्रीणन्] प्राप्नुयाल् लाभम्॥

४१.०५ कर्किण्य् अर्के मधु-गन्ध-तैल-घृत-फाणितानि विनिधाय।

४१.०५ द्विगुणा द्वितीयमासे लब्धिर् हीन-अधिके छेदः॥

४१.०६ सिंहे सुवर्ण-मणि-चर्म-वर्म-शस्त्राणि मौक्तिकं रजतम्।

४१.०६ पञ्चममासे लब्धिर् विक्रेतुर् अतो -अन्यथा छेदः॥

४१.०७ कन्यागते दिनकरे चामर-खर-करभ-वाजिनां क्रेता।

४१.०७ षष्ठे मासे द्विगुणं लाभम् अवाप्नोति विक्रीणन्॥

४१.०८ तौलिनि तान्तव-भाण्डं मणि-कम्बल-काच-पीतकुसुमानि।

४१.०८ आदद्याद् धान्यानि च *वर्षार्धाद्[K.षण्मासाद्] द्विगुणिता वृद्धिः॥

४१.०९ वृश्चिक-संस्थे सवितरि फल-कन्दक-मूल-विविध-रत्नानि।

४१.०९ वर्षद्वयम् उषितानि द्विगुणं लाभं प्रयच्छन्ति॥

४१.१० चापगते गृह्णीयात् *कुङ्कुम[K.कुङ्कम]-शङ्ख-प्रवाल-काचानि।

४१.१० मुक्ताफलानि च ततो वर्षार्धाद् द्विगुणतां यान्ति॥

४१.११ *मृग-घट-संस्थे सवितरि गृह्णीयाल्[K.मृगधटगे गृह्णीयाद् दिवाकरे] लोहभाण्ड-धान्यानि।

४१.११ स्थित्वा मासं दद्याल् लाभार्थी द्विगुणम् आप्नोति॥

४१.१२ सवितरि झषम् उपयाते मूल-फलं कन्द-भाण्ड-रत्नानि।

४१.१२ संस्थाप्य वत्सरार्धं लाभकम् इष्टं समाप्नोति॥

४१.१३ राशौ राशौ यस्मिन् शिशिरमयूखः सहस्रकिरणो वा।

४१.१३ युक्तो -अधिमित्रदृष्टस् तत्र-अयं लाभको दिष्टः॥

४१.१४अ सवितृ-सहितः सम्पूर्णो वा शुभैर् युतवीक्षितः

४१.१४ब् शिशिरकिरणः सद्यो -अर्घस्य प्रवृद्धिकरः स्मृतः।

४१.१४च् अशुभसहितः सन्दृष्टो वा हिनस्त्य् अथ वा रविः

४१.१४द् प्रतिगृहगतान् भावान् बुद्ध्वा वदेत् सदसत्फलम्॥

४२ इन्द्रध्वजसम्पदध्यायः

४२.०१ ब्रह्माणम् ऊचुर् अमरा भगवन् शक्ताः स्म नासुरान् समरे।

४२.०१ प्रतियोधयितुम् अतस् त्वां शरण्यशरणं समुपयाताः॥

४२.०२ देवान् उवाच भगवान् क्षीरोदे केशवः स वः केतुम्।

४२.०२ यं दास्यति तं दृष्ट्वा न-आजौ स्थास्यन्ति वो दैत्याः॥

४२.०३ लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः स-इन्द्राः।

४२.०३ श्रीवत्स-अङ्कं कौस्तुभ-मणि-किरन-उद्भासित-उरस्कम्॥

४२.०४ श्रीपतिम् अचिन्त्यम् असमं *समं ततः[K.समन्ततः] सर्वदेहिनां सूक्ष्मम्।

४२.०४ परमात्मानम् अनादिं विष्णुम् अविज्ञात-पर्यन्तम्॥

४२.०५ तैः संस्तुतः स देवस् तुतोष नारायणो ददौ चैषाम्।

४२.०५ ध्वजम् असुर-सुर-वधू-मुख-कमल-वन-तुषार-तीक्ष्णांशुम्॥

४२.०६ तं विष्णु-तेजो-भवम् अष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे।

४२.०६ देदीप्यमानं शरदि-इव सूर्यं ध्वजं समासाद्य मुमोद शक्रः॥
४२.०७ स किङ्किणी-जाल-*परिष्कृतेन[K.परिस्कृतेन] स्रक्-छत्र-घण्टा-पिटका-अन्वितेन।

४२.०७ समुच्छ्रितेन-अमरराड्-ध्वजेन निन्ये विनाशं समरे -अरिसैन्यम्॥

४२.०८ उपरिचरस्य-अमरपो वसोर् ददौ चेदिपस्य वेणुमयीम्।

४२.०८ यष्टिं तां स नरेन्द्रो विधिवत् सम्पूजयाम् आस॥

४२.०९ प्रीतो महेन *मघवा[K.मघवान्] प्राह-एवं ये नृपाः करिष्यन्ति।

४२.०९ वसुवद्-वसुमन्तस् ते भुवि सिद्धाज्ञा भविष्यन्ति॥

४२.१० मुदिताः प्रजाश् च तेषां भयरोग-विवर्जिताः प्रभूतान्नाः।

४२.१० ध्वज-एव च-अभिधास्यति जगति निमित्तैः फलं सदसत्॥

४२.११ पूजा तस्य नरेन्द्रैर् बल-वृद्धि-जय-अर्थिभिर् यथा पूर्वम्।

४२.११ शक्राज्ञया प्रयुक्ता ताम् आगमतः प्रवक्ष्यामि॥

४२.१२ तस्य विधानं शुभ-करण-दिवस-नक्षत्र-मङ्गल-मुहूर्तैः।

४२.१२ प्रास्थानिकैर् वनम् इयाद् दैवज्ञः सूत्रधारश् च॥

४२.१३ उद्यान-देवतालय-पितृवन-वल्मीक-मार्ग-चितिजाताः।

४२.१३ कुब्ज-ऊर्ध्वशुष्क-कण्टकि-वल्ली-वन्दाक-युक्ताश् च॥

४२.१४ बहु-विहगालय-कोटर-पवन-अनल-पीडिताश् च ये तरवः।

४२.१४ ये च स्युः स्त्रीसंज्ञा न ते शुभाः शक्रकेत्वर्थे॥

४२.१५ श्रेष्ठो -अर्जुनो *-अजकर्णः[K.अश्वकमः] प्रियक-धव-उदुम्बराश् च पञ्चैते।

४२.१५ एतेषाम् *एकतमं[K.अन्यतमं] प्रशस्तम् अथ वा-अपरं वृक्षम्॥

४२.१६ गौर-असित-क्षिति-भवं सम्पूज्य यथाविधि द्विजः पूर्वम्।

४२.१६ विजने समेत्य रात्रौ स्पृष्ट्वा ब्रूयाद् इमं मन्त्रम्॥

४२.१७ यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमो -अस्तु वः।

४२.१७ उपहारं गृहीत्वा-इमं क्रियतां वासपर्ययः॥

४२.१८ पार्थिवस् त्वां वरयते स्वस्ति ते -अस्तु नगोत्तम।

४२.१८ ध्वजार्थं देवराजस्य पूजा-इयं प्रतिगृह्यताम्॥

४२.१९ छिन्द्यात् प्रभातसमये वृक्षम् उदक् प्राङ्मुखो -अपि वा भूत्वा।

४२.१९ परशोर् जर्जरशब्दो न-इष्टः स्निग्धो घनश् च हितः॥

४२.२० नृप-जयदम् अविध्वंस्तं पतनम् अनाकुञ्चितं च पूर्वोदक्।

४२.२० अविलग्नं च-अन्यतरौ विपरीतम् अतस् त्यजेत् पतितम्॥

४२.२१ छित्त्वाग्रे चतुर्-अङ्गुलम् अष्टौ मूले जले क्षिपेद् यष्टिम्।

४२.२१ उद्धृत्य पुरद्वारं शकटेन नयेन् मनुष्यैर् वा॥

४२.२२ अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः।

४२.२२ अर्थक्षयो -अक्ष-भङ्गे तथा-अणिभङ्गे च वर्द्धकिनः॥

४२.२३ भाद्रपद-शुक्ल-पक्षस्य-अष्टम्यां नागरैर् वृतो राजा।

४२.२३ दैवज्ञ-सचिव-कञ्चुकि-विप्रप्रमुखैः सुवेषधरैः॥

४२.२४ अहत-अम्बर-संवीतां यष्टिं पौरन्दरीं पुरं पौरैः।

४२.२४ स्रग्-गन्ध-धूप-युक्तां प्रवेशयेत् शङ्ख-तूर्य-रवैः॥

४२.२५ रुचिर-पताका-तोरण-वनमाला-अलङ्कृतं प्रहृष्ट-जनम्।

४२.२५ सम्मार्जित-अर्चित-पथं सुवेष-गणिकाजन-आकीर्णम्॥

४२.२६ अभ्यर्चित-आपणगृहं प्रभूत-पुण्याह-वेद-निर्घोषम्।

४२.२६ नट-नर्तक-गेयज्ञैर् आकीर्ण-चतुष्पथं नगरम्॥

४२.२७ तत्र पताकाः श्वेता *भवन्ति विजयाय[K.विजयाय भवन्ति] रोगदाः पीताः।

४२.२७ जयदाश् च चित्ररूपा रक्ताः शस्त्र-प्रकोपाय॥

४२.२८ यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागाद्याः।

४२.२८ बालानां तलशब्दे संग्रामः सत्त्व-युद्धे वा॥

४२.२९ सन्तक्ष्य पुनस् तक्षा विधिवद् यष्टिं प्ररोपयेद् यन्त्रे।

४२.२९ जागरम् एकादश्यां नरेश्वरः कारयेच् चास्याम्॥

४२.३० सित-वस्त्र-उष्णीषधरः पुरोहितः शाक्र-वैष्णवैर् मन्त्रैः।

४२.३० जुहुयाद् अग्निं साम्वत्सरो निमित्तानि गृह्णीयात्॥

४२.३१ इष्ट-द्रव्य-आकारः सुरभिः स्निग्धो घनो -अनलो -अर्चिष्मान्।

४२.३१ शुभकृद् अतो -अन्यो *-अनिष्टो[K.नेष्टो] यात्रायां विस्तरो -अभिहितः॥

४२.३२अ स्वाहावसानसमये स्वयम् उज्ज्वलार्चिः

४२.३२ब् स्निग्धः प्रदक्षिण-शिखो हुतभुग् नृपस्य।

४२.३२च् गङ्गा-दिवाकरसुता-जल-चारुहारां

४२.३२द् धात्रीं *समुद्र-रशनां[K.समुद्ररसनां] वशगां करोति॥

४२.३३अ चामीकर-अशोक-कुरण्टक-अब्ज-

४२.३३ब् वैदूर्य-नीलोत्पल-सन्निभे -अग्नौ।

४२.३३च् न ध्वान्तम् अन्तर्भवने -अवकाशं

४२.३३द् करोति रत्न-अंशु-हतं नृपस्य॥

४२.३४अ येषां रथौघ-अर्णव-मेघ-दन्तिनां

४२.३४ब् समस्वनो -अग्निर् यदि वा-अपि दुन्दुभेः।

४२.३४च् तेषां मदान्ध-इभ-घट-अवघट्टिता

४२.३४द् भवन्ति याने तिमिर-उपमा दिशः॥

४२.३५ ध्वज-कुम्भ-हय-इभ-भूभृताम् अनुरूपे वशम् एति भूभृताम्।

४२.३५ उदय-अस्त-धराधरा -अधरा हिमवद्-विन्ध्य-पयोधरा धरा॥

४२.३६ द्विरद-मद-मही-सरोज-लाजा[K.लाजैः]-घृत-मधुना च हुताशने सगन्धे।

४२.३६ प्रणत-नृप-शिरोमणि-प्रभाभिर् भवति पुरश्-छुरितेव भूर् नृपस्य॥

४२.३७ उक्तं यद् उत्तिष्ठति शक्रकेतौ शुभ-अशुभं सप्तमरीचिरूपैः।

४२.३७ तज्जन्म-यज्ञ-ग्रहशान्ति-यात्रा-विवाह-कालेष्व् अपि चिन्तनीयम्॥

४२.३८ गुड-पूप-पायस-आद्यैर् विप्रान् अभ्यर्च्य दक्षिणाभिश् च।

४२.३८ श्रवणेन द्वादश्याम् उत्थाप्यो -अन्यत्र वा श्रवणात्॥

४२.३९ शक्र-कुमार्यः कार्याः प्राह मनुः सप्त पञ्च वा तज्ज्ञैः।

४२.३९ नन्द-उपनन्द-संज्ञे *पाद-ऊन-अर्धे ध्वज-उच्छ्रायात्[K.पादेनार्धेन चोच्छ्रायात्]॥

४२.४० षोडशभाग-अभ्यधिके जयविजये द्वे वसुन्धरे च-अन्ये।

४२.४० अधिका शक्रजनित्री मध्ये -अष्टांशेन च-एतासाम्॥

४२.४१ प्रीतैः कृतानि विबुधैर् यानि पुरा भूषणानि सुरकेतोः।

४२.४१ तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि॥

४२.४२ रक्त-अशोक-निकाशं *चतुरस्रं[K.चतुरश्रम्] विश्वकर्मणा प्रथमम्।

४२.४२ *रशना[K.रसना] स्वयम्भुवा शङ्करेण *च-अनेकवर्णगा दत्ता[K.चानेकवर्णधरी]॥

४२.४३ अष्टाश्रि नीलरक्तं तृतीयम् इन्द्रेण भूषणं दत्तम्।

४२.४३ असितं यमश् चतुर्थं मसूरकं कान्तिमद् अयच्छत्॥

४२.४४ मञ्जिष्ठाभं वरुणः षडश्रि तत्पञ्चमं जलोर्मिनिभम्।

४२.४४ मयूरं केयूरं षष्ठं वायुर् जलदनीलम्॥

४२.४५ स्कन्धः स्वं केयूरं सप्तमम् अददद् ध्वजाय बहुचित्रम्।

४२.४५ अष्टमम् अनल-ज्वाला-सङ्काशं हव्यभुग्-*वृत्तम्[K.दत्तम्]॥

४२.४६ वैदूर्य-सदृशम् *इन्द्रो[K.इन्दुर्] नवमं ग्रैवेयकं ददाव् अन्यत्।

४२.४६ रथचक्राभं दशमं सूर्यस् त्वष्टा प्रभायुक्तम्॥

४२.४७ एकादशम् उद्वंशं विश्वेदेवाः सरोजसङ्काशम्।

४२.४७ द्वादशम् अपि च *निवेशम् ऋषयो[K.निवंशं मुनयो] नीलोत्पलाभासम्॥

४२.४८ किञ् चिद् अधऊर्ध्व-*निर्मितम्[K.निर्नतम्] उपरि विशालं त्रयोदशं केतोः।

४२.४८ शिरसि बृहस्पति-शुक्रौ लाक्षारससन्निभं ददतुः॥

४२.४९ यद्य् यद् येन *विभूषणम्[K.विनिर्मितम्] अमरेण विनिर्मितं[K.विभूषणम्] ध्वजस्य-अर्थे।

४२.४९ तत्तत् तद्दैवत्यं विज्ञातव्यं विपश्चिद्भिः॥

४२.५० ध्वज-परिमाण-त्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य।

४२.५० परतः प्रथमात् प्रथमाद् अष्टांशाष्टांशहीनानि॥

४२.५१ कुर्याद् अहनि चतुर्थे पूरणम् इन्द्रध्वजस्य शास्त्रज्ञः।

४२.५१ मनुना च-आगमगीतान् मन्त्रान् एतान् पठेन् नियतः॥

४२.५२ हर-अर्क-वैवस्वत-शक्र-सोमैर् धनेश-वैश्वानर-पाशभृद्भिः।

४२.५२ महर्षि-संघैः सदिग्-अप्सरोभिः शुक्र-अङ्गिरः-स्कन्द-मरुद्गणैश् च॥

४२.५३ यथा त्वम् ऊर्जस्करण-एकरूपैः समर्चितस् त्व् आभरणैर् उदारैः।

४२.५३ तथेह तान्य् आभरणानि *यागे[K.देव] शुभानि सम्प्रीतमना गृहाण॥

४२.५४ अजो -अव्ययः शाश्वत एकरूपो विष्णुर् वराहः पुरुषः पुराणः।

४२.५४ त्वम् अन्तकः सर्वहरः कृशानुः *सहस्रशीर्षः[K.सहस्रशीर्शा] शतमन्युर् ईड्यः॥

४२.५५ कविं सप्तजिह्वं त्रातारम् इन्द्रं *स्ववितारं[K.अवितारं] सुरेशम्।

४२.५५ ह्वयामि शक्रं वृत्रहणं सुषेणम् अस्माकं वीरा *उत्तरा[K.उत्तरे] भवन्तु॥

४२.५६ प्रपूरणे च-उच्छ्रयणे प्रवेशे स्नाने तथा माल्यविधौ विसर्गे।

४२.५६ पठेद् इमान् नृपतिः सोपवासो मन्त्रान् शुभान् पुरुहूतस्य केतोः॥

४२.५७ क्षत्र[K.ऊ.छत्र]-ध्वज-आदर्श-फल-अर्ध-चन्द्रैर् विचित्रमाला-कदली-इक्षुदण्डैः।

४२.५७ सव्याल-सिंहैः पिटकैर् गवाक्षैर् अलङ्कृतं दिक्षु च लोकपालैः॥

४२.५८अ अच्छिन्न-रज्जुं दृढ-काष्ठ-मातृकं

४२.५८ब् सुश्लिष्ट-यन्त्र-अर्गल-पाद-तोरणम्।

४२.५८च् उत्थापयेल् लक्ष्म सहस्रचक्षुषः

४२.५८द् सारद्रुम-अभग्न-कुमारिक-अन्वितम्॥

४२.५९अ अविरत-जन-रावं मङ्गल-आशीः-प्रणामैः।

४२.५९ब् पटु-पटह-मृदङ्गैः शङ्ख-भेर्य्-आदिभिश् च।

४२.५९च् श्रुति-विहित-वचोभिः पापठद्भिश् च विप्रैर्

४२.५९द् अशुभ-*विहत[K.रहित]-शब्दं केतुम् *उत्थापयेच्[K.उत्थापयीत] च॥

४२.६०अ फल-दधि-घृत-लाजा-क्षौद्र-पुष्प-अग्रहस्तैः

४२.६०ब् प्रणिपतित-शिरोभिस् *तुष्टवद्भिश्[K.तुष्टुवद्भिश्] च पौरैः।

४२.६०च् *वृतम्[K.धृतम्] अनिमिष-भर्तुः केतुम् ईशः प्रजानाम्

४२.६०द् अरिनगर-नत-अग्रं कारयेद् द्विड्-*बधाय[K.वधाय]॥

४२.६१अ न-अतिद्रुतं न च विलम्बितम् अप्रकम्पम्

४२.६१ब् अध्वस्त-माल्य-पिटक-आदि-विभूषणम् च।

४२.६१च् उत्थानम् इष्टम् अशुभं यद् अतो -अन्यथा स्यात्

४२.६१द् तच्छान्तिभिर् नरपतेः शमयेत् पुरोधाः॥

४२.६२अ क्रव्याद-कौशिक-कपोतक-काक-कङ्कैः

४२.६२ब् केतुस्थितैर् महद् उशन्ति भयं नृपस्य।

४२.६२च् चाषेण च-अपि युवराजभयं वदन्ति

४२.६२द् श्येनो विलोचनभयं निपतन् करोति॥

४२.६३अ छत्र-भङ्ग-पतने नृप-मृत्युस्

४२.६३ब् तस्करान् मधु करोति निलीनम्।

४२.६३च् हन्ति च-अप्य् अथ पुरोहितम् उल्का

४२.६३द् पार्थिवस्य महिषीम् अशनिश् च॥

४२.६४अ राज्ञीविनाशं पतिता पताका

४२.६४ब् करोत्य् अवृष्टिं पिटकस्य पातः।

४२.६४च् मध्य-अग्र-मूलेषु च केतुभङ्गो

४२.६४द् निहन्ति मन्त्रि-क्षितिपाल-पौरान्॥

४२.६५अ धूम-आवृते शिखि-भयं तमसा च मोहो

४२.६५ब् व्यालैश् च भग्न-पतितैर् न भवत्य् अमात्याः।

४२.६५च् ग्लायन्त्य् उदक्प्रभृति च क्रमशो *द्विजाद्यान्[K.द्विजाद्या]

४२.६५द् भङ्गे तु बन्धकि-*बधः[K.वधः] कथितः कुमार्याः॥

४२.६६अ रज्जु-उत्सङ्ग-च्छेदने बाल-पीडा

४२.६६ब् राज्ञो मातुः पीडनं मातृकायाः।

४२.६६च् यद्यत् कुर्युश् *चारणा बालका[K.बालकाश् चारणा] वा

४२.६६द् तत्तत् तादृग् भावि पापं शुभं वा॥

४२.६७अ दिनचतुष्टयम् उत्थितम् अर्चितं

४२.६७ब् समभिपूज्य नृपो -अहनि पञ्चमे।

४२.६७च् प्रकृतिभिः सह लक्ष्म विसर्जयेद्

४२.६७द् बलभिदः स्वबल-अभिविवृद्धये॥

४२.६८ उपरिचर-वसु-प्रवर्तितं नृपतिभिर् अप्य् अनुसन्ततं कृतम्।

४२.६८ विधिम् इमम् अनुमन्य पार्थिवो न रिपुकृतं भयम् आप्नुयाद् इति॥

४३ नीराजनाध्यायः

४३.०१ भगवति जलधर-पक्ष्म-क्षपाकर-अर्क-ईक्षणे कमलनाभे।

४३.०१ उन्मीलयति *तुरङ्ग[K.तुरङ्गन]करि-नर-नीराजनं कुर्यात्॥

४३.०२ द्वादश्याम् अष्टम्यां *कार्तिक[K.कार्त्तिक]शुक्लस्य पञ्चदश्यां वा।

४३.०२ आश्वयुजे वा कुर्यान् नीराजन-संज्ञितां शान्तिम्॥

४३.०३ नगर-उत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्तदारुमयम्।

४३.०३ षोडशहस्त-उच्छ्रायं दशविपुलं तोरणं कार्यम्॥।

४३.०४ सर्ज-उदुम्बर-*ककुभ-शाखामय[K.शाखाककुभमयं]-शान्तिसद्म कुशबहुलम्।

४३.०४ वंश-विनिर्मित-मत्स्य-ध्वज-चक्र-अलङ्कृत-द्वारम्॥

४३.०५ प्रतिसरया तुरगाणां भल्लातक-शालि-कुष्ठ-सिद्धार्थान्।

४३.०५ कण्ठेषु निबध्नीयात् पुष्ट्यर्थं शान्तिगृहगाणाम्॥

४३.०६ रवि-वरुण-विश्वदेव-प्रजेश-पुरुहूत-वैष्णवैर् मन्त्रैः।

४३.०६ सप्ताहं शान्तिगृहे कुर्यात्-शान्तिं तुरङ्गाणाम्॥

४३.०७ अभ्यर्चिता न परुषं वक्तव्या नापि ताडनीयास् ते।

४३.०७ पुण्याह-शङ्ख-तूर्य-ध्वनि-गीतरवैर् विमुक्त-भयाः॥

४३.०८ प्राप्ते अष्टमे -अह्नि कुर्याद् उदङ्मुखं तोरणस्य दक्षिणतः।

४३.०८ कुश-चीर-आवृतम् आश्रमम् अग्निं पुरतो -अस्य वेद्यां च॥

४३.०९ चन्दन-कुष्ठ-समङ्गा-हरिताल-मनःशिला-प्रियङ्गु-वचाः।

४३.०९ दन्त्य्-अमृता-अञ्जन-रजनी-सुवर्णपुष्प्य्-अग्निमन्थाश्[K.सुवर्णपुष्पाग्निमन्थाश्] च॥

४३.१० श्वेतां सपूर्णकोशां कटम्भरा-त्रायमाण-सहदेवीः।

४३.१० नागकुसुमं स्वगुप्तां शतावरीं सोमराजीं च॥

४३.११ कलशेष्व् *एताः[K.एतान्] कृत्वा सम्भारान् उपहरेद् *वलिं[K.ऊ.बलिं] सम्यक्॥

४३.११ भक्ष्यैर् नानाकारैर् मधु-पायस-यावक-प्रचुरैः॥

४३.१२ खदिर-पलाश-उदुम्बर-काश्मर्य्-अश्वत्थ-निर्मिताः समिधः।

४३.१२ सुक् कनकाद् रजताद् वा कर्तव्या भूतिकामेन॥

४३.१३ पूर्व-अभिमुखः श्रीमान् वैयाघ्रे चर्मणि स्थितो राजा।

४३.१३ तिष्ठेद् अनल-समीपे तुरगभिषग्-दैववित्-सहितः॥

४३.१४ यात्रायां यद् अभिहितं ग्रहयज्ञ-विधौ महेन्द्रकेतौ च।

४३.१४ वेदी-पुरोहित-अनल-लक्षणम् अस्मिंस् तद् अवधार्यम्॥

४३.१५ लक्षणयुक्तं तुरगं द्विरदवरं च-एव दीक्षितं स्नातम्।

४३.१५ अहत-सित-अम्बर-गन्ध-स्रग्-*धूम[K.ऊ.धूपा]-अभ्यर्चितं कृत्वा।

४३.१६ आश्रम-तोरण-मूलं समुपनयेत् सान्त्वयन् शनैर् वाचा।
४३.१६ वादित्र-शङ्ख-पुण्याह-निःस्वन-आपूरित-दिगन्तम्॥

४३.१७ यद्य् आनीतस् तिष्ठेद् दक्षिणचरणं हयः समुत्क्षिप्य।

४३.१७ स जयति तदा नरेन्द्रः शत्रून् *नचिराद्[K.अचिराद्] विना यत्नात्॥

४३.१८ त्रस्यन् न-इष्टो राज्ञः परिशेषं चेष्टितं द्विप-हयानाम्।

४३.१८ यात्रायां व्याख्यातं तद् इह विचिन्त्यं यथायुक्ति॥

४३.१९ पिण्डम् अभिमन्त्र्य दद्यात् पुरोहितो वाजिने स यदि जिघ्रेत्।

४३.१९ अश्नीयाद् वा जयकृद् विपरीतो -अतो -अन्यथा-अभिहितः॥

४३.२० कलश-उदकेषु शाखाम् आघ्राव्य-औदुम्बरीं स्पृशेत् तुरगान्।

४३.२० शान्तिक-पौष्टिक-मन्त्रैर् एवं सेनां सनृप-नागाम्॥

४३.२१ शान्तिं राष्ट्र-विवृद्ध्यै कृत्वा भूयो -अभिचारकैर् मन्त्रैः।

४३.२१ मृत्मयम् अरिं विभिन्द्यात्-शूलेन-उरःस्थले विप्रः॥

४३.२२ खलिनं हयाय दद्याद् अभिमन्त्र्य पुरोहितस् ततो राजा।

४३.२२ आरुह्य-उदक्पूर्वां यायान् नीराजितः सबलः॥

४३.२३ मृदङ्ग-शङ्ख-ध्वनि-हृष्ट-कुञ्जर-स्रवन्मद-आमोद-सुगन्ध-मारुतः।

४३.२३ शिरोमणि-*प्रान्त[K.व्रात]चलत् प्रभाचयैर् ज्वलन् विवस्वान् इव तोयद-अत्यये॥

४३.२४ हंस-पङ्क्तिभिर् इतस् ततो -अद्रिराट् सम्पतद्भिर् इव शुक्लचामरैः॥

४३.२४ मृष्टगन्ध-पवन-अनुवाहिभिर् धूयमान-रुचिर-स्रग्-अम्बरः।

४३.२५ नैकवर्ण-मणि-वज्र-भूषितैर् भूषितो मुकुट-कुण्डल-अङ्गदैः।

४३.२५ भूरि-रत्न-किरण-अनुरञ्जितः शक्रकार्मुक-*रुचिं[K.रुचं] समुद्वहन्॥

४३.२६ उत्पतद्भिर् इव खं तुरङ्गमैर् दारयद्भिर् इव दन्तिभिर् धराम्।

४३.२६ निर्जित-अरिभिर् इव-अमरैर् नरैः शक्रवत् परिवृतो व्रजेन् नृपः॥

४३.२७ सवज्र-मुक्ताफल-भूषणो -अथ वा सित-स्रग्-उष्णीष-विलेपन-अम्बरः।

४३.२७ धृत-आतपत्रो गज-पृष्ठम् आश्रितो घन-उपरि-इव-इन्दुतले भृगोः सुतः॥

४३.२८ सम्प्रहृष्ट-नर-वाजि-कुञ्जरं निर्मल-प्रहरण-अंशु-भासुरम्।

४३.२८ निर्विकारम् अरि-पक्ष-भीषणं यस्य सैन्यम् अचिरात् स गां जयेत्॥

४४ खञ्जनकलक्षणाध्यायः

४४.०१ खञ्जनको नाम-अयं यो विहगस् तस्य दर्शने प्रथमे।

४४.०१ प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि॥

४४.०२ स्थूलो-अभ्युन्नत-कण्ठः कृष्ण-गलो भद्रकारको भद्रः।

४४.०२ आकण्ठ-मुखात् कृष्णः सम्पूर्णः पूरयत्य् आशाम्॥

४४.०३ कृष्णो गले -अस्य बिन्दुः सित-करटान्तः स रिक्तकृद् रिक्तः।

४४.०३ पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः॥

४४.०४ अथ मधुर-सुरभि-फल-कुसुम-तरुषु सलिलाशयेषु पुण्येषु।

४४.०४ करि-तुरग-भुजग-मूर्ध्नि प्रासाद-उद्यान-हर्म्येषु॥

४४.०५ गो-गोष्ठ-सत्-समागम-यज्ञ-उत्सव-पार्थिव-द्विज-समीपे।

४४.०५ हस्ति-तुरङ्गम-शाला-च्छत्र-ध्वज-चामर-आद्येषु॥

४४.०६ हेम-समीप-सित-अम्बर-कमल-उत्पल-पूजित-उपलिप्तेषु।

४४.०६ दधि-पात्र-धान्य-कूटेषु च श्रियं खञ्जनः कुरुते॥

४४.०७ पङ्के स्वाद्व्-अन्न-आप्तिर् गोरस-सम्पच् च गोमय-उपगते।

४४.०७ शाद्वलगे वस्त्र-आप्तिः शकटस्थे देश-विभ्रंशः॥

४४.०८ गृहपटले -अर्थभ्रंशो *बध्रे[K.वध्रे] बन्धो -अशुचौ भवति रोगः।

४४.०८ पृष्ठे त्व् अज-आविकानां प्रिय-सङ्गमम् आवहत्य् आशु॥

४४.०९ महिष-उष्ट्र-गर्दभ-अस्थिश्मशान-गृहकोण-शर्कर-*अट्ट[K.अद्रि]स्थः।

४४.०९ प्राकार-भस्म-केशेषु च-अशुभो मरण-रुग्-भयदः॥

४४.१० पक्षौ धुन्वन् न शुभः शुभः पिबन् वारि निम्नगा-संस्थः।

४४.१० सूर्योदये *प्रशस्तो[K.-अथ शस्तो] न-इष्टफलः खञ्जनो -अस्तमये॥

४४.११ नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम्।

४४.११ पश्येत् तया गतस्य क्षिप्रम् अरातिर् वशम् उपैति॥

४४.१२अ तस्मिन् निधिर् भवति मैथुनम् एति यस्मिन्

४४.१२ब् यस्मिंस् तु छर्दयति तत्र तले -अस्ति काचम्।

४४.१२च् अङ्गारम् अप्य् उपदिशन्ति पुरीषणे -अस्य

४४.१२द् तत्-कौतुक-अपनयनाय खनेद् धरित्रीम्॥

४४.१३ मृत-विकल-विभिन्न-रोगितः स्वतनु-समान-फलप्रदः खगः।

४४.१३ धनकृद् अभिनिलीयमानको वियति च बन्धु-समागम-प्रदः॥

४४.१४ नृपतिर् अपि शुभं शुभप्रदेशे खगम् अवलोक्य महीतले विदध्यात्।

४४.१४ सुरभि-कुसुम-धूप-युक्तम् अर्घं शुभम् *अभिनन्दिम्[K.ऊ.अभिनन्दितम्] एवम् एति वृद्धिम्॥

४४.१५ अशुभम् अपि विलोक्य खञ्जनं द्विज-गुरु-साधु-सुर-अर्चने रतः।

४४.१५ न नृपतिर् अशुभं *समाप्नुयात्[K.समाप्नुयान्] न यदि दिनानि च सप्त मांसभुक्॥

४४.१६ आवर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु *दिनशेषात्[K.दिनशेषे]।

४४.१६ दिक्-स्थान-मूर्ति-लग्न-ऋक्ष-शान्त-दीप्त-आदिभिश् च-ऊह्यम्॥

४५ उत्पाताध्यायः

४५.०१ यान् अत्रेर् उत्पातान् गर्गः प्रोवाच तान् अहं वक्ष्ये।

४५.०१ तेषां संक्षेपो -अयं प्रकृतेर् अन्यत्वम् उत्पातः॥

४५.०२ अपचारेण नराणाम् उपसर्गः पापसञ्चयाद् भवति।

४५.०२ संसूचयन्ति दिव्य-आन्तरिक्ष-भौमास् *त उत्पाताः[K.तदुत्पाताः]॥

४५.०३ मनुजानाम् अपचाराद् अपरक्ता देवताः सृजन्त्य् एतान्।

४५.०३ तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुञ्जीत॥

४५.०४ दिव्यं ग्रह-ऋक्ष-वैकृतम् उल्का-निर्घात-पवन-परिवेषाः।

४५.०४ गन्धर्वपुर-पुरन्दरचाप-आदि यद् आन्तरिक्षं तत्॥

४५.०५ भौमं चर-स्थिर-भवं तत्-शान्तिभिर् आहतं शमम् उपैति।

४५.०५ नाभसम् उपैति मृदुतां शाम्यति नो दिव्यम् इत्य् एके॥

४५.०६ दिव्यम् अपि शमम् उपैति प्रभूत-कनक-अन्न-गो-मही-दानैः।

४५.०६ रुद्र-आयतने भूमौ गोदोहात् कोटिहोमाच् च॥

४५.०७ आत्म-सुत-कोश-वाहन-पुर-दार-पुरोहितेषु *लोके च[K.लोकेषु]।

४५.०७ पाकम् उपयाति दैवं परिकल्पितम् अष्टधा नृपतेः॥

४५.०८ अनिमित्त-भङ्ग-चलन-स्वेद-अश्रु-निपात-जल्पन-आद्यानि।

४५.०८ लिङ्ग-आर्चा-आयतनानां नाशाय नरेश-देशानाम्॥

४५.०९ दैवतयात्रा-शकटाक्ष-चक्र-युग-केतु-भङ्ग-पतनानि।

४५.०९ सम्पर्यासन-सादन-*सङ्गश्[K.सङ्गाश्] च न देश-नृप-शुभदाः॥

४५.१० ऋषि-धर्म-पितृ-ब्रह्म-प्रोद्भूतं वैकृतं द्विजातीनाम्।

४५.१० यद् रुद्र-लोकपाल-उद्भवं पशूनाम् अनिष्टं तत्॥

४५.११ गुरु-सित-शनैश्चर-उत्थं पुरोधसां विष्णुजं च लोकानाम्।

४५.११ स्कन्द-विशाख-समुत्थं माण्डलिकानां नरेन्द्राणाम्॥

४५.१२ वेदव्यासे मन्त्रिणि विनायके वैकृतं चमूनाथे।

४५.१२ धातरि सविश्वकर्मणि लोकाभावाय निर्दिष्टम्॥

४५.१३ देव-कुमार-कुमारी-वनिता-प्रेष्येषु वैकृतं यत् स्यात्।

४५.१३ तन् नरपतेः कुमारक-कुमारिका-स्त्री-परिजनानाम्॥

४५.१४ रक्षः-पिशाच-*गृह्यक[U - गुह्यक]-नागानाम् *एवम्[K.एतद्] एव *निर्दिष्टम्[K.निर्देश्यम्]।

४५.१४ मासैश् च-अप्य् अष्टाभिः सर्वेषाम् एव फलपाकः॥

४५.१५ बुद्ध्वा देवविकारं शुचिः पुरोधास् त्र्यह-उषितः स्नातः।

४५.१५ स्नान-कुसुम-अनुलेपन-वस्त्रैर् अभ्यर्चयेत् प्रतिमाम्॥

४५.१६ मधुपर्केण पुरोधा *भक्ष्यैर्[K.बक्षैर्] बलिभिश् च विधिवद् उपतिष्ठेत्।

४५.१६ स्थालीपाकं जुहुयाद् विधिवन् मन्त्रैश् च तल्-लिङ्गैः॥

४५.१७अ इति विबुध-विकारे शान्तयः सप्तरात्रं

४५.१७ब् द्विज-विबुध-गण-अर्चा गीत-नृत्य-उत्सवाश् च।

४५.१७च् विधिवद् अवनि-पालैर् यैः प्रयुक्ता न तेषां

४५.१७द् भवति दुरित-पाको दक्षिणाभिश् च रुद्धः॥

४५.१८ राष्ट्रे यस्य-अनग्निः प्रदीप्यते दीप्यते च न-इन्धनवान्।

४५.१८ मनुजेश्वरस्य पीडा तस्य *च[K.ओमित्तेद्] राष्ट्रस्य विज्ञेया॥

४५.१९ जल-मांस-आर्द्र-ज्वलने नृपति-वधः प्रहरणे रणो रौद्रः।

४५.१९ सैन्य-ग्राम-पुरेषु च नाशो वह्नेर् भयं कुरुते॥

४५.२० प्रासाद-भवन-तोरण-केत्व्-आदिष्व् अननलेन दग्धेषु।

४५.२० तडिता वा षण्मासात् परचक्रस्य-आगमो नियमात्॥

४५.२१ धूमो -अनग्नि-समुत्थो रजस् तमश् च-अह्निजं महा-भयदम्।

४५.२१ व्यभ्रे निश्य् उडुनाशो दर्शनम् अपि च-अह्नि दोषकरम्॥

४५.२२ नगर-*चतुष्पाद्-अण्डज[K.चतुष्पाद-अण्डज]-मनुजानां भयकरं ज्वलनम् आहुः।

४५.२२ धूम-अग्नि-विस्फुलिङ्गैः शय्या-अम्बर-केशगैर् मृत्युः॥

४५.२३ आयुध-ज्वलन-सर्पण-स्वनाः कोश-निर्गमन-वेपनानि वा।

४५.२३ वैकृतानि यदि वा-आयुधे -अपराण्य् आशु रौद्र-रण-सङ्कुलं वदेत्॥

४५.२४अ मन्त्रैर् *आग्नेयैः[K.वाह्नैः] क्षीरवृक्षात् समिद्भिर्

४५.२४ब् होतव्यो -अग्निः सर्षपैः सर्पिषा च।

४५.२४च् अग्न्यादीनां वैकृते शान्तिर् एवं

४५.२४द् देयं च-अस्मिन् काञ्चनं ब्राह्मणेभ्यः॥

४५.२५ शाखाभङ्गे -अकस्माद् वृक्षाणां निर्दिशेद् रणोद्योगम्।

४५.२५ हसने देशभ्रंशं रुदिते च व्याधि-बाहुल्यम्॥

४५.२६ राष्ट्र-विभेदस् त्व् अनृतौ बालवधो -अतीव कुसुमिते बाले।

४५.२६ वृक्षात् क्षीरस्रावे सर्वद्रव्य-क्षयो भवति॥

४५.२७ मद्ये वाहन-नाशः संग्रामः शोणिते मधुनि रोगः।

४५.२७ स्नेहे दुर्भिक्ष-भयं महद्भयं *निःसृते[K.निःसृते] सलिले॥

४५.२८ शुष्क-विरोहे वीर्य-अन्न-संक्षयः शोषणे च विरुजानाम्।

४५.२८ पतितानाम् उत्थाने स्वयं भयं दैवजनितं च॥

४५.२९ पूजितवृक्षे ह्य् अनृतौ कुसुमफलं नृप-वधाय निर्दिष्टम्।

४५.२९ धूमस् तस्मिन् ज्वाला -अथ वा भवेन् नृप-वधाय-एव॥

४५.३० सर्पत्सु तरुषु जल्पत्सु वा-अपि जन-संक्षयो विनिर्दिष्टः।

४५.३० वृक्षाणां वैकृत्ये दशभिर् मासैः फल-विपाकः॥

४५.३१ स्रग्-गन्ध-धूप-अम्बर-पूजितस्य छत्रं विधाय-उपरि पादपस्य।

४५.३१ कृत्वा शिवं रुद्रजपो -अत्र कार्यो रुद्रेभ्य इत्य् अत्र *षड् एव होमाः[K.षडङ्गहोमः]॥

४५.३२ पायसेन *मधुनापि[K.मधुना च] भोजयेद् ब्राह्मणान् घृतयुतेन भूपतिः।

४५.३२ मेदिनी निगदिता-अत्र दक्षिणा वैकृते तरुकृते हितार्थिभिः॥

४५.३३ नाले -अब्ज-यव-आदीनाम् एकस्मिन् द्वि-त्रि-सम्भवो मरणम्।

४५.३३ कथयति तदधिपतीनां यमलं जातं च कुसुमफलम्॥

४५.३४ अतिवृद्धिः सस्यानां नाना-फल-कुसुम-*सम्भवो[K.भवो] वृक्षे।

४५.३४ भवति हि यद्य् एकस्मिन् परचक्रस्य-आगमो नियमात्॥

४५.३५ अर्धेन यदा तैलं भवति तिलानाम् अतैलता वा स्यात्।

४५.३५ अन्नस्य च वैरस्यं तदा तु विन्द्याद् भयं सुमहत्॥

४५.३६ विकृत-कुसुमं फलम् वा ग्रामाद् अथ वा पुराद् वहिः[K.ऊ.बहिः] कार्यम्।

४५.३६ सौम्यो -अत्र चरुः कार्यो निर्वाप्यो वा पशुः शान्त्यै॥

४५.३७अ सस्ये च दृष्ट्वा विकृतिं प्रदेयं

४५.३७ब् तत्क्षेत्रम् एव प्रथमं द्विजेभ्यः।

४५.३७च् तस्य-एव मध्ये चरुम् अत्र भौमं

४५.३७द् कृत्वा न दोषं समुपैति *तज्ञम्[K.तज्ञान्]॥

४५.३८ दुर्भिक्षम् *अनावृष्टाव् अतिवृष्टौ[K.अनावृष्ट्याम् अतिवृष्ट्याम्] क्षुद्भयं *परभयं च[K.सपरचक्रम्]।

४५.३८ रोगो ह्य् अनृतु-भवायां *नृपति-वधो[K.नृप-वधो] -अनभ्रजातायाम्॥

४५.३९ शीत-उष्ण-*विपर्यासो[K.विपर्यासे] नो सम्यगृतुषु च सम्प्रवृत्तेषु।

४५.३९ षण्मासाद् राष्ट्र-भयं रोग-भयं दैव-जनितं च॥

४५.४० अन्य-ऋतौ सप्ताहं प्रबन्ध-वर्षे प्रधान-नृप-मरणम्।

४५.४० रक्ते शस्त्र-उद्योगो मांस-अस्थि-वसा-आदिभिर् मरकः॥

४५.४१ धान्य-हिरण्य-त्वक्-फल-कुसुम-आद्यैर् वर्षितैर् भयं विन्द्यात्।

४५.४१ अङ्गार-पांशु-वर्षे विनाशम् आयाति तन्नगरम्॥

४५.४२ उपला विना जलधरैर् विकृता वा प्राणिनो यदा वृष्टाः।

४५.४२ छिद्रं वा-अप्य् अतिवृष्टौ सस्यानाम् ईति-संजननम्॥

[K.ओने वेर्से इन्सेर्तेद्

K. ४६.४३ क्षीर-घृत-क्षौद्राणां दध्नो रुधिर-उष्ण-वारिणां[Kऽस् त्र्. वारिणो] वर्षे।

K. ४६.४३ देशविनाशो ज्ञेयो -असृग्वर्षे च अपि नृप-युद्धम्॥]

४५.४३ यद्य् अमले -अर्के छाया न दृश्यते प्रतीपा वा।

४५.४३ देशस्य तदा सुमहद्-भयम् आयातं विनिर्देश्यम्॥

४५.४४ व्यभ्रे नभसि-इन्द्रधनुर् दिवा यदा दृश्यते -अथ वा रात्रौ।

४५.४४ प्राच्याम् अपरस्यां वा तदा भवेत् क्षुद्भ्यं सुमहत्॥

४५.४५ सूर्य-इन्दु-पर्जन्य-समीरणानां *यागः[K.योगः] स्मृतो वृष्टि-विकार-काले।

४५.४५ धान्य-अन्न-गो-काञ्चन-दक्षिणाश् च देयास् ततः शान्तिम् उपैति पापम्॥

४५.४६ अपसर्पणं नदीनाम् नगराद् अचिरेण शून्यतां कुरुते।

४५.४६ शोषश् च-अशोष्याणाम् अन्येषां वा ह्रदादीनाम्॥

४५.४७ स्नेहा-सृग्-मांस-वहाः सङ्कुल-कलुषाः प्रतीपगाश् च-अपि।

४५.४७ परचक्रस्य-आगमनं नद्यः कथयन्ति षण्मासात्॥

४५.४८ ज्वाला-धूम-क्काथ-आरुदित-उत्क्रुष्टानि च-एव कूपानाम्।

४५.४८ गीत-प्रजल्पितानि च जन-मरकाय-*उपदिष्टानि[K.प्रदिष्टानि]॥

४५.४९ *सलिल[K.तोय]-उत्पत्तिर् अखाते गन्ध-रस-विपर्यये च तोयानाम्।

४५.४९ सलिलाशय-विकृतौ वा महद्भयं तत्र शन्तिम् *इमाम्[K.इयम्]॥

४५.५० सलिल-विकारे कुर्यात् पूजां वरुणस्य वारुणैर् मन्त्रैः।

४५.५० तैर् एव च जप-होमं शमम् एवं पापम् उपयाति॥

४५.५१ प्रसव-विकारे स्त्रीणां द्वि-त्रि-चतुष्-प्रभृति-सम्प्रसूतौ वा।

४५.५१ हीन-अतिरिक्त-काले च देश-कुल-संक्षयो भवति॥

४५.५२ वडवा-उष्ट्र-महिष-गो-हस्तिनीषु यमल-उद्भवे *रण-मरणम्[K.मरणम्] एषाम्।

४५.५२ षण्मासात् सूतिफलं शान्तौ श्लोकौ च गर्ग-उक्तौ॥

४५.५३ नार्यः परस्य विषये त्यक्तव्यास् ता हित-अर्थिना।

४५.५३ तर्पयेच् च द्विजान् कामैः शान्तिं च-एव-अत्र कारयेत्॥

४५.५४ चतुष्पादः स्व-यूथेभ्यस् त्यक्तव्याः पर-भूमिषु।

४५.५४ नगरं स्वामिनं यूथम् अन्यथा तु विनाशयेत्॥

४५.५५ परयोनाव् अभिगमनं भवति तिरश्चाम् असाधु धेनूनाम्।

४५.५५ उक्षाणो वा-अन्योन्यं पिबति श्वा वा सुरभि-पुत्रम्॥
४५.५६ मासत्रयेण विन्द्यात् तस्मिन् निःसंशयं पर-आगमनम्।

४५.५६ तत्प्रतिघाताय-एतौ श्लोकौ गर्गेण निर्दिष्टौ॥

४५.५७ त्यागो विवासनं दानं तत् तस्य-आशु शुभं भवेत्।

४५.५७ तर्पयेद् ब्राह्मणांश् च-अत्र जप-होमांश् च कारयेत्॥

४५.५८ स्थालीपाकेन धातारं पशुना च पुरोहितः।

४५.५८ प्राजापत्येन मन्त्रेण यजेद् बह्व्-अन्न-दक्षिणम्॥

४५.५९ यानं वाह-वियुक्तं यदि गच्छेन् न व्रजेच् च वाह-युतम्।

४५.५९ राष्ट्र-भयं भवति तदा चक्राणां साद-भङ्गे च॥

४५.६०अब्[K.४६.६१अब्]। गीतरव-तूर्यशब्दा नभसि यदा वा चर-स्थिर-अन्यत्वम्।

४५.६०च्द्[K.४६.६१च्द्]। मृत्युस् तदा गदा वा *विस्वतूर्ये[K.ऊ.विस्वरतार्ये] पर-अभिभवः॥

४५.६१अब्[K.४६.६२अब्]। अनभिहत-तूर्य-नादः शब्दो वा ताडितेषु यदि न स्यात्।

४५.६१च्द्[K.४६.६२च्द्]। व्युत्पत्तौ वा तेषां पर-आगमो नृपति-मरणं वा॥

४५.६२ गो-लाङ्गलयोः सङ्गे दर्वी-शूर्प-आद्य्-उपस्कर-विकारे।

४५.६२ क्रोष्टुक-नादे च तथा शस्त्र-भयं मुनिवचश् च-इदम्॥

४५.६३ वायव्येष्व् एषु नृपतिर् वायुं शक्तुभिर् अर्चयेत्।

४५.६३ आवायोर् इति पञ्चर्चो *जप्तव्याः[K.जाप्याश् च] प्रयतैर् द्विजैः॥

४५.६४ ब्राह्मणान् परम-अन्नेन दक्षिणाभिश् च तर्पयेत्।

४५.६४ बह्व्-अन्न-दक्षिणा होमाः कर्तव्याश् च प्रयत्नतः॥

४५.६५ पुर-पक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम्।

४५.६५ नक्तं वा दिवस-चराः क्षपा-चरा वा चरन्त्य् अहनि॥

४५.६६ सन्ध्या-द्वये -अपि मण्डलम् आबध्नन्तो मृगा विहङ्गा वा।

४५.६६ दीप्तायां दिश्य् अथ वा क्रोशन्तः संहता भयदाः॥

४५.६७ *श्येनाः[K.श्वानः] प्ररुदन्त इव द्वारे क्रोशन्ति जम्बुका दीप्ताः।

४५.६७ प्रविशेन् नरेन्द्र-भवने कपोतकः कौशिको यदि वा॥

४५.६८ कुक्कुट-रुतं प्रदोषे हेमन्त-आदौ च कोकिल-आलापाः।

४५.६८ प्रतिलोम-मण्डल-चराः श्येन-आद्याश् च-अम्बरे भयदाः॥

४५.६९ गृह-चैत्य-तोरणेषु द्वारेषु च पक्षि-सङ्घ-*सम्पातः[K.सम्पाताः]।

४५.६९ मधु-वल्मीक-अम्भोरुह-*समुद्भवश्[K.समुद्भवाश्] च-अपि नाशाय॥

४५.७० श्वभिर् अस्थि-शव-अवयव-प्रवेशनं मन्दिरेषु मरकाय।

४५.७० पशु-शस्त्र-व्याहारे नृप-मृत्युर् मुनिवचश् च-इदम्॥

४५.७१ मृग-पक्षि-विकारेषु कुर्याद् *धीमान्[K.ऊ.धोमान्] सदक्षिणान्।

४५.७१ देवाः कपोत इति च जप्तव्याः पञ्चभिर् द्विजैः॥

४५.७२ सुदेवा इति च-एकेन देया गावः *सदक्षिणाः[K.च दक्षिणा]।

४५.७२ जपेत्-शाकुन-सूक्तं वा मनो वेदशिरांशि च॥

४५.७३ शक्रध्वज-इन्द्रकील-स्तम्भद्वार-प्रपात-भङ्गेषु।

४५.७३ तद्वत् कपाट-तोरण-केतूनां नरपतेर् मरणम्॥

४५.७४ सन्ध्या-द्वयस्य दीप्तिर् धूम-उत्पत्तिश् च कानने -अनग्नौ।

४५.७४ छिद्र-अभावे भूमेर् दरणं कम्पश् च भयकारी॥

४५.७५अ *पाखण्डाणां[K.पाषण्डाणां] नास्तिकानां च भक्तः

४५.७५ब् साध्व्-आचार-प्रोज्झितः क्रोध-शीलः।

४५.७५च् ईर्ष्युः क्रूरो विग्रह-आसक्त-चेता

४५.७५द् यस्मिन् राजा तस्य देशस्य नाशः॥

४५.७६ प्रहर हर छिन्धि भिन्धि-इत्य् आयुध-काष्ठ-अश्म-पाणयो बालाः।

४५.७६ निगदन्तः प्रहरन्ते तत्र-अपि भयं भवत्य् आशु॥

४५.७७ अङ्गार-गैरिक-आद्यैर् विकृत-प्रेत-अभिलेखनं यस्मिन्।

४५.७७ नायक-चित्रितम् अथ वा क्षये क्षयं याति न चिरेण॥

४५.७८ लूता-पट-अङ्ग-शबलं न सन्ध्ययोः पूजितं कलह-युक्तम्।

४५.७८ नित्य-उच्छिष्ट-स्त्रीकं च यद् गृहं तत् क्षयं याति॥

४५.७९ दृष्टेषु यातुधानेषु निर्दिशेन् मरकम् आशु सम्प्राप्तम्।

४५.७९ प्रतिघाताय-एतेषां गर्गः शान्तिं चकार-इमाम्॥

४५.८० महाशान्त्यो -अथ बलयो भोज्यानि सुमहान्ति च।

४५.८० कारयेत महेन्द्रं च *माहेन्द्रीं[K.महेन्द्रीभिः] च समर्चयेत्॥

४५.८१ नरपति-देश-विनाशे केतोर् उदये -अथ वा ग्रहे -अर्केन्द्वोः।

४५.८१ उत्पातानां प्रभवः स्व-ऋतुभवश् च-अप्य् अदोषाय॥

४५.८२ ये च न दोषान् जनयन्त्य् उत्पातास् तान् ऋतु-स्वभाव-कृतान्।

४५.८२ ऋषिपुत्र-कृतैः श्लोकैर् विद्याद् एतैः समास-उक्तैः॥

४५.८३ वज्र-अशनि-मही-कम्प-सन्ध्या-निर्घात-निःस्वनाः।

४५.८३ परिवेष-रजो-धूम-रक्त-अर्क-*अस्तमय[K.अस्तमन]-उदयाः॥

४५.८४ द्रुमेभ्यो -अन्न-रस-स्नेह-बहु-पुष्प-फल-उद्गमाः।

४५.८४ गो-पक्षि-मद-वृद्धिश् च शिवाय मधु-माधवे॥

४५.८५ तारा-उल्का-पात-कलुषं कपिल-अर्केन्दु-मण्डलम्।

४५.८५ अनग्नि-ज्वलन-स्फोट-धूम-रेण्व्-अनिल-आहतम्॥

४५.८६ रक्त-पद्म-*अरुणा[K.अरुणम्] *सन्ध्या[K.सन्ध्यं] नभः क्षुब्ध-अर्णव-उपमम्।

४५.८६ सरितां च-अम्बु-संशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्॥

४५.८७ शक्रायुध-परीवेष-विद्युत्-शुष्क-विरोहणम्।

४५.८७ कम्प-उद्वर्तन-वैकृत्यं रसनं दरणं क्षितेः॥

४५.८८ सरो-नद्य्-उदपानानां वृद्ध्य्-ऊर्ध्व-तरण-प्लवाः।

४५.८८ सरणं च-अद्रि-गेहानां वर्षासु न भय-आवहम्॥

४५.८९ दिव्य-स्त्री-भूत-गन्धर्व-विमान-अद्भुत-दर्शनम्।

४५.८९ ग्रह-नक्षत्र-ताराणां दर्शनं च दिवा -अम्बरे॥

४५.९० गीत-वादित्र-निर्घोषा वन-पर्वत-सानुषु।

४५.९० सस्य-वृद्धिर् अपां हानिर् अपापाः शरदि स्मृताः॥

४५.९१ शीत-अनिल-तुषारत्वं नर्दनं मृग-पक्षिणाम्।

४५.९१ रक्षो-यक्ष-आदि-सत्त्वानां दर्शनं वाग् अमनुषी॥

४५.९२ दिशो धूम-अन्धकाराश् च स-नभो-वन-पर्वताः।

४५.९२ उच्चैः सूर्य-उदय-अस्तौ च हेमन्ते शोभनाः स्मृताः॥

४५.९३ हिम-पात-अनिल-उत्पाता विरूप-अद्भुत-दर्शनम्।

४५.९३ कृष्ण-अञ्जन-आभम् आकाशं तारा-उल्का-पात-पिञ्जरम्॥

४५.९४ चित्र-गर्भ-उद्भवाः स्त्रीषु गो-अज-अश्व-मृग-पक्षिषु।

४५.९४ पत्र-अङ्कुर-लतानां च विकाराः शिशिरे शुभाः॥

४५.९५ ऋतु-स्वभाव-जा ह्य् एते दृष्टाः स्व-ऋतौ शुभ-प्रदाः।

४५.९५ ऋतोर् अन्यत्र च-उत्पाता दृष्टास् ते *च-अतिदारुणाः[K.बृशदारुनाः]॥

४५.९६ उन्मत्तानां च या गाथाः शिशूनां *यच् च भाषितम्[K.भाषितं च यत्]।

४५.९६ स्त्रियो यच् च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः॥

४५.९७ पूर्वं चरति देवेषु पश्चाच् *चरति[K.गच्छति] मानुषान्।

४५.९७ न-अचोदिता वाग् वदति सत्या ह्य् एषा सरस्वती॥

४५.९८अ उत्पातान् गणित-विवर्जितो -अपि बुद्ध्वा

४५.९८ब् विख्यातो भवति नरेन्द्र-वल्लभश् च।

४५.९८च् एतत् तन्-मुनिवचनं रहस्यम् उक्तं

४५.९८द् यज् ज्ञात्वा भवति नरस् त्रिकालदर्शी॥

४६ मयूरचित्रकाध्यायः

४६.०१ दिव्य-आन्तरिक्ष-आश्रयम् उक्तम् आदौ मया फलं शस्तम् अशोभनं च।

४६.०१ प्रायेण चारेषु समागमेषु युद्धेषु मार्ग-आदिषु विस्तरेण॥

४६.०२अ भूयो वराहमिहिरस्य न युक्तम् एतत्

४६.०२ब् कर्तुं समासकृद् असव् इति तस्य दोषः।

४६.०२च् तज्ज्ञैर् न वाच्यम् इदम् उक्तफल-अनुगीति

४६.०२द् यद् *बर्हि[K.वर्हि]चित्रकम् इति प्रथितं वराङ्गम्॥

४६.०३ स्वरूपम् एव तस्य तत्-प्रकीर्तित-अनुकीर्तनम्।

४६.०३ ब्रवीम्य् अहं न चेद् इदं तथा -अपि मे -अत्र वाच्यता॥

४६.०४ उत्तरवीथि-गता द्युतिमन्तः क्षेम-*शुभिक्ष[U - सुभिक्ष]-शिवाय समस्ताः।

४६.०४ दक्षिण-मार्ग-गता द्युतिहीनाः क्षुद्भय-तस्कर-मृत्यु-करास् ते॥

४६.०५ कोष्ठागार-गते भृगु-पुत्रे पुष्यस्थे च गिराम् प्रभविष्णौ।

४६.०५ निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश् च जना गतरोगाः॥

४६.०६ पीडयन्ति यदि कृत्तिकां मघां रोहिणीं श्रवम् ऐन्द्रम् एव वा।

४६.०६ प्रोज्झ्य सूर्यम् अपरे ग्रहास् तदा पश्चिमा दिग् अनयेन पीड्यते॥

४६.०७अ प्राच्यां चेद् ध्वजवद् अवस्थिता दिनान्ते

४६.०७ब् प्राच्यानां भवति हि विग्रहो नृपाणाम्।

४६.०७च् मध्ये चेद् भवति हि मध्यदेश-*पीठा[K.ऊ.पीडा]

४६.०७द् रूक्षैस् तैर् न तु *रुचिमन्[K.रुचिरैर्] मयूखवद्भिः॥

४६.०८ दक्षिणां ककुभम् *आश्रितस्[K.आश्रितैस्] तु तैर् दक्षिणापथपयोमुचां क्षयः।

४६.०८ हीन-रूक्ष-तनुभिश् च विग्रहः स्थूल-देह-किरण-अन्वितैः शुभम्॥

४६.०९ उत्तरमार्गे स्पष्ट-मयूखाः शान्तिकरास् ते तन् नृपतीनाम्।

४६.०९ ह्रस्व-शरीरा भस्म-सवर्णा दोषकराः स्युर् देश-नृपाणाम्॥

४६.१०अ नक्षत्राणां तारकाः सग्रहाणाम्

४६.१०ब् धूमज्वालाविस्फुलिङ्गान्विताश् चेत्।

४६.१०च् आलोकं वा निर्निमित्तं न यान्ति

४६.१०द् याति ध्वंसं सर्वलोकः सभूपः॥

४६.११अ दिवि भाति यदा तुहिनांशुयुगं

४६.११ब् द्विज-वृद्धिर् अतीव तदाशु शुभा।

४६.११च् तदनन्तरवर्णरणो -अर्कयुगे

४६.११द् जगतः प्रलयस् त्रिचतुष्प्रभृति॥

४६.१२अ मुनीन् अभिजितं ध्रुवं मघवतश् च भं संस्पृशन्

४६.१२ब् शिखी घनविनाशकृत् कुशलकर्महा शोकदः।

४६.१२च् *भुजङ्गम्[K.भुजङ्गभम्] अथ संस्पृशेद् भवति वृष्टिनाशो ध्रुवं

४६.१२द् क्षयं व्रजति विदुतो जनपदश् च बालाकुलः॥

४६.१३ प्राग्द्वारेषु चरन् रविपुत्रो नक्षत्रेषु करोति च वक्रम्।

४६.१३ दुर्भिक्षं कुरुते *महदुग्रं[K.भयम् उग्रं] मित्राणां च विरोधम् अवृष्टिम्॥

४६.१४ रोहिणीशकटम् अर्कनन्दनो यदि भिनत्ति रुधिरो -अथ वा शिखी।

४६.१४ किं वदामि यद् अनिष्टसागरे जगद् अशेषम् उपयाति संक्षयम्॥

४६.१५ उदयति सततं यदा शिखी चरति भचक्रम् अशेषम् एव वा।

४६.१५ अनुभवति पुराकृतं तदा फलम् अशुभं सचर-अचरं जगत्॥

४६.१६अ धनुःस्थायी रूक्षो रुधिरसदृशः क्षुब्धयकरो

४६.१६ब् बलोद्योगं *चन्द्रः[K.चेन्दुः] कथयति जयं ज्या -अस्य च यतः।

४६.१६च् गवां{ अवाक्] शृङ्गो गोघ्नो निधनम् अपि सस्यस्य कुरुते

४६.१६द् ज्वलन् धूमायन् वा नृपतिमरणायैव भवति॥

४६.१७ स्निग्धः स्थूलः समशृङ्गो विशालस् तुङ्गश् च-उदग्विचरन् नागवीथ्याम्।

४६.१७ दृष्टः सौम्यैर् अशुभैर् विप्रयुक्तो लोकानन्दं कुरुते -अतीव चन्द्रः॥

४६.१८ पित्र्य-मैत्र-पुरुहूत-विशाखा-त्वाष्ट्रम् एत्य च युनक्ति शशाङ्कः।

४६.१८ दक्षिणेन न *शुभः शुभकृत्[K.शुभो हितकृत्] स्याद् यद्य् उदक् चरति मध्यगतो वा॥

४६.१९ परिघ इति मेघरेखा या तिर्यग्भास्करोदये -अस्ते वा।

४६.१९ परिधिस् तु प्रतिसूर्यो दण्डस् त्व् ऋजुर् इन्द्रचापनिभः॥

४६.२० उदये -अस्ते वा भानोर् ये दीर्घा रश्मयस् त्व् अमोघास् ते।

४६.२० सुरचापखण्डम् ऋजु यद् रोहितम् ऐरावतं दीर्घम्॥

४६.२१ अर्ध-अस्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्।

४६.२१ तेजःपरिहानि मुखाद् भानोर् अर्ध-उदयो यावत्॥

४६.२२ तस्मिन् सन्ध्या-काले चिह्नैर् एतैः शुभ-अशुभं वाच्यम्।

४६.२२ सर्वैर् एतैः स्निग्धैः सद्यो वर्ष भयं रूक्षैः॥

४६.२३अ अच्छिन्नः परिघो वियच् च विमलं श्यामा मयूखा रवेः

४६.२३ब् स्निग्धा दीधितयः *मितं[K.ऊ.सितं] सुरधनुर्विद्युच् च पूर्वोत्तरा।

४६.२३च् स्निग्धो मेघतरुर् दिवाकरकरैर् आलिङ्गतो वा यदा

४६.२३द् वृष्टिः स्याद् यदि वा -अर्कम् अस्तसमये मेघो महान् छादयेत्॥

४६.२४ खण्डो वक्रः कृष्णो ह्रस्वः काक-आद्यैर् वा चिह्नैर् विद्धः।

४६.२४ यस्मिन् देशे रूक्षश् चार्कस् तत्राभावः प्रायो राज्ञः॥

४६.२५ वाहिनीं समुपयाति पृष्ठतो मांसभुक् खगगणो युयुत्सतः।

४६.२५ यस्य तस्य बलविद्रवो महान् अग्रैस् तु विजयो विहङ्गमैः॥

४६.२६ भानोर् उदये यदि वास्तमये गन्धर्वपुरप्रतिमा ध्वजनी।

४६.२६ विम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत्॥

४६.२७ शस्ता शान्तिद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुपवना च।

४६.२७ पांशुध्वस्ता जनपदनाशं धत्ते रूक्षा रुधिरनिभा वा॥

४६.२८अ यद्विस्तरेण कथितं मुनिभिस् तद् अस्मिन्

४६.२८ब् सर्वं मया निगदितं पुनरुक्तवर्जम्।

४६.२८च् शुत्वा -अपि कोकिल-रुतं बलिभुग् विरौति

४६.२८द् यत्-तत् स्वभावकृतम् अस्य पिकं न जेतुम्॥

४७ पुष्यस्नानाध्यायः

४७.०१ मूलं मनुजाधिपतिः प्रजातरोस् तद् उपघात-संस्कारात्।

४७.०१ अशुभं शुभं च लोके भवति यतो -अतो नृपति-चिन्ता॥

४७.०२ या व्याख्याता शान्तिः स्वयम्भुवा सुरगुरोर् महेन्द्र-अर्थे।

४७.०२ तां प्राप्य वृद्धगर्गः प्राह यथा भागुरेः शृणुत॥

४७.०३ पुष्यस्नानं नृपतेः कर्तव्यं दैववित्-पुरोधाभ्याम्।

४७.०३ नातः परं पवित्रं सर्व-उत्पात-अन्तकरम् अस्ति॥

४७.०४ श्लेष्मातक-अक्ष-कण्टकि-कटु-तिक्त-विगन्धि-पादप-विहीने।

४७.०४ कौशिक-गृध्रप्रभृतिभिर् अनिष्ट-विहगैः परित्यक्ते॥

४७.०५ तरुण-तरु-गुल्म-वल्ली-लता-प्रतान-*अन्विते[K.आवृते] वनोद्देशे।

४७.०५ निरुपहत-पत्र-पल्लव-मनोज्ञ-मधुरद्रुमप्राये॥

४७.०६ कृकवाकु-जीव-जीवक-शुक-शिखि-शतपत्र-चाष-हारीतैः।

४७.०६ क्रकर-चकोर-कपिञ्जल-वञ्जुल-पारावत-श्रीकैः॥

४७.०७ कुसुम-रसपान-मत्त-द्विरेफ-पुंस्कोकिल-आदिभिश् च-अन्यैः।

४७.०७ विरुते वनोपकण्ठे क्षेत्र-आगारे शुचाव् अथ वा॥

४७.०८ *ह्रदिनी[K.ऊ.ह्रदिनी]-विलासिनीनां जलखग-नखविक्षतेषु रम्येषु।

४७.०८ पुलिन-जघनेषु कुर्याद् दृक्-मनसोः प्रीतिजननेषु॥
४७.०९ प्रोत्प्लुत-हंस-च्छत्रे कारण्डव-कुरर-सारस-उद्गीते।

४७.०९ फुल्ल-इन्दीवर-नयने सरसि सहस्राक्ष-कान्ति-धरे॥

४७.१० प्रोत्फुल्ल-कमल-वदनाः कलहंस-*कल[K.कलस्वन]-प्रभाषिण्यः।

४७.१० प्रोत्तुङ्ग-कुड्मल-कुचा यस्मिन् नलिनी-विलासिन्यः॥

४७.११ कुर्याद् गोरोमन्थज-फेनलव-शकृत्-खुर-क्षत-उपचिते।

४७.११ अचिर-प्रसूत-हुङ्कृत-वल्गित-वत्स-उत्सवे गोष्ठे॥

४७.१२ अथ वा समुद्रतीरे कुशल-आगत-*रत्न-पोत[K.पोतरत्न]-सम्बाधे।

४७.१२ घन-निचुल-लीन-जलचर-सितखग-शबलीकृत-उपान्ते॥

४७.१३ क्षमया क्रोध इव जितः सिंहो मृग्य-अभिभूयते *येषु[K.यत्र]।

४७.१३ दत्त-अभय-खग-मृग-शावकेषु तेष्व् आश्रमेष्व् अथ वा॥

४७.१४ काञ्ची-कलाप-नूपुर-गुरुजघन-उद्वहन-विघ्नित-पदाभिः।

४७.१४ श्रीमति मृगेक्षणाभिर् गृहे -अन्यभृत-वल्गु-वचनाभिः॥

४७.१५ पुण्येष्व् आयतनेषु च तीर्थेषु-उद्यान-रम्य-देशेषु।

४७.१५ पूर्वोदक्-प्लव-भूमौ प्रदक्षिण-अम्भोवहायां च॥

४७.१६ भस्म-अङ्गार-अस्थ्य्-ऊषर-तुष-केश-श्वभ्र-कर्कट-आवासैः।

४७.१६ *श्वाविध[K.श्वाविन्]-मूषक-विवरैर् वल्मीकैर् या च सन्त्यक्ता॥

४७.१७ धात्री घना सुगन्धा स्निग्धा मधुरा समा च विजयाय।

४७.१७ सेनावासे -अप्य् एवं योजयितव्या यथायोगम्॥

४७.१८ निष्क्रम्य पुरान् नक्तं दैवज्ञ-अमात्य-याजकाः प्राच्याम्।

४७.१८ कौबेर्यां वा कृत्वा बलिं दिशीशाधिपायां वा॥

४७.१९ लाजा-अक्षत-दधि-कुसुमैः प्रयतः प्रणतः पुरोहितः कुर्यात्।

४७.१९ आवाहनम् अथ मन्त्रस् तस्मिन् मुनिभिः समुद्दिष्टः॥

४७.२० आगच्छन्तु सुराः सर्वे ये -अत्र पूजा-अभिलाषिणः।

४७.२० दिशो नागा द्विजाश् च-एव ये *च-अप्य् अन्ये[K.चानेय् अप्य्] -अंशभागिनः॥

४७.२१ आवाह्य-एवम् ततः सर्वान् एवं ब्रूयात् पुरोहितः।

४७.२१ श्वः पूजां प्राप्य यास्यन्ति दत्त्वा शान्तिं महीपतेः॥

४७.२२ आवाहितेषु कृत्वा पूजां तां शर्वरीं वसेयुस् ते।

४७.२२ सदसत्-स्वप्ननिमित्तं यात्रायां स्वप्नविधिर् उक्तः॥

४७.२३ अपरे -अहनि प्रभाते सम्भारान् उपहरेद् यथोक्तगुणान्।

४७.२३ गत्वा -अवनिप्रदेशे श्लोकाश् च-अप्य् अत्र मुनिगीताः॥

४७.२४ तस्मिन् मण्डलम् आलिख्य कल्पयेत् तत्र मेदिनीम्।

४७.२४ नाना-रत्नाकरवतीं स्थानानि विविधानि च॥

४७.२५ पुरोहितो यथास्थानं नागान् यक्षान् सुरान् पितॄन्।

४७.२५ गन्धर्व-अप्सरसश् च-एव मुनीन् सिद्धांश् च विन्यसेत्॥

४७.२६ ग्रहांश् च *सर्व[K.सह]नक्षत्रै रुद्रांश् च सह मातृभिः।

४७.२६ स्कन्दं विष्णुं विशाखं च लोकपालान् सुरस्त्रियः॥

४७.२७ वर्णकैर् विविक्थैः कृत्वा हृद्यैर् गन्ध-गुणान्वितैः।

४७.२७ यथास्वं पूजयेद् विद्वान् गन्ध-माल्यानुलेपनैः॥

४७.२८ भक्ष्यैर् अन्नैश् च विविधैः फल-मूल-आमिषैस् तथा।

४७.२८ *पानैश् च[K.पानकैर्] विविधैर् हृद्यैः सुरा-क्षीर-आसव-आदिभिः॥

४७.२९ कथयाम्य् अतः परम् अहं पूजाम् अस्मिन् यथाभिलिखितानाम्।

४७.२९ ग्रहयज्ञे यः प्रोक्तो विधिर् ग्रहाणां स कर्तव्यः॥

४७.३० मांस-ओदन-मद्यैः पिशाच-दितितनय-दानवाः पूज्याः।

४७.३० अभ्यञ्जन-अञ्जन-तिलैः पितरो मांस-ओदनैश् च-अपि॥

४७.३१ साम-यजुर्भिर् मुनयस् त्व् ऋग्भिर् गन्धैश् च धूप-माल्य-युतैः।

४७.३१ अश्लेषकवर्णैस् त्रिमधुरेण च-अभ्यर्चयेद् नागान्॥

४७.३२ धूप-आज्य-आहुति-माल्यैर् विबुधान् *रत्नः[U - रत्नैः] स्तुति-प्रणामैश् च।

४७.३२ गन्धर्वान् अप्सरसो गन्धैर् माल्यैश् च सुसुगन्धैः॥

४७.३३ शेषांस् तु सार्ववर्णिक-बलिभिः पूजां न्यसेच् च सर्वेषाम्।

४७.३३ प्रतिसर-वस्त्र-पताका-भूषण-यज्ञोपवीतानि॥

४७.३४ मण्डल-पश्चिमभागे कृत्वा-अग्निं दक्षिणे -अथ वा वेद्याम्।

४७.३४ आदद्यात् सम्भारान् दर्भान् दीर्घान् अगर्भांश् च॥

४७.३५ लाजा-आज्य-अक्षत-दधि-मधु-सिद्धार्थक-गन्ध-सुमनसो *धूपः[K.धुपान्]।

४७.३५ गोरोचन-अञ्जन-*तिलाः[K.तिलान्] स्वर्तुज-मधुराणि च फलानि॥

४७.३६ सघृतस्य पायसस्य च तत्र शरावाणि तैश् च सम्भारैः।

४७.३६ पश्चिमवेद्यां पूजां कुर्यात् *स्नानस्य[U - स्नातस्य] सा वेदी॥

४७.३७ तस्याः कोणेषु दृढान् कलशान् सित-सूत्र-वेष्टित-ग्रीवान्।

४७.३७ सक्षीर-वृक्ष-पल्लव-फल-अपिधानान् व्यवस्थाप्य॥

४७.३८ पुष्यस्नान-विमिश्रेण-आपूर्णान् अम्भसा सरत्नांश् च।

४७.३८ पुष्यस्नानद्रव्याण्य् आदद्याद् गर्ग-गीतानि॥

४७.३९ ज्योतिष्मतीं त्रायमाणाम् अभयाम् अपराजिताम्।

४७.३९ जीवां विश्वेश्वरीं पाठां समङ्गां विजयां तथा॥

४७.४० सहां च सहदेवीं च पूर्णकोशां शतावरीम्।

४७.४० अरिष्टिकां शिवां भद्रां तेषु कुम्भेषु विन्यसेत्॥

४७.४१ ब्राह्मीं क्षेमाम् अजां च-एव सर्वबीजानि *काञ्चनीम्[K.काञ्चनम्]।

४७.४१ मङ्गल्यानि यथालाभं सर्वौषध्यो *रसास्[K.रसांस्] तथा॥

४७.४२ रत्नानि *सर्वगन्धाश्[K.सर्वगन्धांश्] च बिल्वं च सविकङ्कतम्।

४७.४२ प्रशस्त-नाम्न्यश् च-ओषध्यो हिरण्यं मङ्गलानि च॥

४७.४३ आदाव् अनडुहश् चर्म जरया संहतायुषः।

४७.४३ प्रशस्तलक्षणभृतः प्राचीनग्रीवम् आस्तरेत्॥

४७.४४ ततो वृषस्य योधस्य चर्म रोहितम् अक्षतम्।

४७.४४ सिम्हस्याथ तृतीयं स्याद् व्याघ्रस्य च ततः परम्॥

४७.४५ चत्वार्य् एतानि चर्माणि तस्यां वेद्याम् उपास्तरेत्।

४७.४५ शुभे मुहूर्ते सम्प्राप्ते पुष्ययुक्ते निशाकरे॥

४७.४६ भद्रासनम् एकतमेन कारितं कनक-रजत-ताम्राणाम्।

४७.४६ क्षीरतरु-निर्मितं वा विन्यस्यं चर्मणाम् उपरि॥

४७.४७ त्रिविधस् तस्य-उच्छ्रायो हस्तः पादाधिको -अर्धयुक्तश् च।

४७.४७ माण्डलिका-अनन्तरजित्-समस्त-राज्य-अर्थिनां शुभदः॥

४७.४८ अन्तर्धाय हिरण्यं तत्र-उपविशेन् नरेश्वरः सुमनाः।

४७.४८ सचिव-आप्त-पुरोहित-दैव-पौर-कल्याण-नामवृतः॥

४७.४९ वन्दिजन-पौर-*विप्रैः प्रघुष्ट[K.विप्रप्रघुष्ट]-पुण्याह-वेद-निर्घोषैः।

४७.४९ समृदङ्ग-शङ्ख-तूर्यैर् मङ्गल-शब्दैर् हतानिष्टः॥

४७.५० अहत-क्षौम-निवसनं पुरोहितः कम्बलेन सञ्छाद्य।

४७.५० कृत-बलि-पूजं कलशैर् अभिषिञ्चेत् सर्पिषा पूर्णैः॥

४७.५१ अष्टाव् अष्टाविंशतिर् अष्टशतं वा-अपि कलश-परिमाणम्।

४७.५१ अधिके -अधिके गुणोत्तरम् अयं च मन्त्रो -अत्र मुनिगीतः॥

४७.५२ आज्यं तेजः समुद्दिष्टम् आज्यं पापहरं परम्।

४७.५२ आज्यं सुराणाम् आहार आज्ये लोकाः प्रतिष्ठिताः॥

४७.५३ भौम-आन्तरिक्षं दिव्यं वा यत् ते *कल्मषम्[K.कल्विषं] आगतम्।

४७.५३ सर्वं तदाज्यसंस्पर्शात् प्रणाशम् उपगच्छतु॥

४७.५४ कम्बलम् अपनीय ततः पुष्यस्नानाम्बुभिः सफलपुष्पैः।

४७.५४ अभिषिञ्चेन् मनुजेन्द्रं पुरोहितो -अनेन मन्त्रेण॥

४७.५५ सुरास् त्वाम् अभिषिञ्चन्तु ये च सिद्धाः पुरातनाः।

४७.५५ ब्रह्मा विष्णुश् च *रुद्रश्[K.शम्भुश्] च साध्याश् च समरुद्गणाः॥

४७.५६ आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ।

४७.५६ अदितिर् देवमाता च स्वाहा सिद्धिः सरस्वती॥

४७.५७ कीर्तिर् लक्ष्मीर् धृतिः श्रीश् च सिनीवाली कुहूस् तथा।

४७.५७ दनुश् च सुरसा च-एव विनता कद्रुर् एव च॥

४७.५८ देवपत्न्यश् च या नोक्ता देवमातर एव च।

४७.५८ सर्वास् त्वाम् अभिषिञ्चन्तु दिव्याश् च-अप्सरसां गणाः॥

४७.५९ नक्षत्राणि मुहूर्ताश् च पक्ष-अहोरात्र-सन्धयः।

४७.५९ संवत्सरा दिनेशाश् च कलाः काष्ठाः क्षणा लवा।

४७.६०अब्[K.४८.६९च्द्] । सर्वे त्वाम् अभिषिञ्चन्तु कालस्यावयवाः शुभाः।

४७.६०च्द्[K.४८.७०अब्] । एते च-अन्ये च मुनयो वेद-व्रत-परायणाः॥

४७.६१अब्[K.ओमित्तेद्] । सशिष्यास् ते -अभिषिञ्चन्तु सदाराश् च तपोधनाः।

४७.६१च्द्[K.ओमित्तेद्] । वैमानिकाः सुरगणा मनवः सागरैः सह॥

४७.६२ सरितश् च महाभागा नागाः किंपुरुषाश् तथा।

४७.६२ वैखानसा महाभागा द्विजा वैहायसाश् च ये॥

४७.६३ सप्तर्षयः सदाराश् च ध्रुवस्थानानि यानि च।

४७.६३ मरीचिर् अत्रिः पुलहः पुलस्त्यः क्रतुर् अङ्गिराः॥

४७.६४ भृगुः सनत्कुमारश् च सनको -अथ सनन्दनः।

४७.६४ सनातनश् च दक्षश् च जैगीषव्यो भगन्दरः॥

४७.६५ एकतश् च द्वितश् च-एव त्रितो जाबालिकश्यपौ।

४७.६५ दुर्वासा दुर्विनीतश् च कण्वः कात्यायनस् तथा॥

४७.६६ मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः।

४७.६६ ऊर्ध्वः संवर्तकश् च-एव च्यवनो -अत्रिः पराशरः॥

४७.६७ द्वैपायनो यवक्रीतो देवराजः सहानुजः।

४७.६७ पर्वतास् तरवो वल्ल्यः पुण्यान्य् आयतनानि च॥

४७.६८ प्रजापतिर् दितिश् च-एव गावो विश्वस्य मातरः।

४७.६८ वाहनानि च दिव्यानि सर्वलोकाश् चर-अचराः॥

४७.६९ अग्नयः पितरस् तारा जीमूताः खं दिशो जलम्।

४७.६९ एते च-अन्ये च बहवः पुण्य-सङ्कीर्तनाः *शुभैः[K.शुभाः]॥

४७.७० तोयैस् त्वाम् अभिषिञ्चन्तु सर्व-उत्पात-निबर्हणैः।

४७.७० *यथाभिषिक्तो मघवान् एतैर् मुदित-मनसैः[K.कल्याणम् ते प्रकुर्वन्तु आयुरारोग्यम् एव च]॥

४७.७१ इत्य् एतैश् चान्यैश् च-अप्य् अथर्वकल्प-*आहितैः[K.विहितैः] सरुद्रगणैः।

४७.७१ कौष्माण्ड-महारौहिण-कुबेरहृद्यैः समृद्ध्या च॥

४७.७२ आपोहिष्ठा-तिसृभिर् हिरण्यवर्णा-इति चतसृभिर् जप्तम्।

४७.७२ कार्पासिक-वस्त्रयुगं बिभृयात् स्नातो नराधिपतिः॥

४७.७३ पुण्याह-शङ्ख-शब्दैर् आचान्तो -अभ्यर्च्य देव-गुरु-विप्रान्।

४७.७३ छत्र-ध्वज-आयुधानि च ततः स्वपूजां प्रयुञ्जीत॥

४७.७४ आयुष्यं वर्चस्यं रायस्पोषाभिर् ऋग्भिर् एताभिः।

४७.७४ परिजप्तं वैजयिकं नवं विदध्याद् अलङ्कारम्॥

४७.७५ गत्वा द्वितीयवेदीं समुपविशेच् चर्मणां उपरि राजा।

४७.७५ देयानि च-एव चर्माण्य् उपर्युपर्य् एवम् एतानि॥

४७.७६ वृषस्य वृषदंशस्य रुरोश् च पृषतस्य च।

४७.७६ तेषाम् उपरि सिंहस्य व्याघ्रस्य च ततः परम्॥

४७.७७ मुख्यस्थाने जुहुयात् पुरोहितो -अग्निं समित्-तिल-घृताद्यैः।

४७.७७ त्रिनयन-शक्र-बृहस्पति-नारायण-नित्यगति-ऋग्भिः॥

४७.७८ इन्द्रध्वज-निर्दिष्टान्य् अग्निनिमित्तानि दैवविद् ब्रूयात्।

४७.७८ कृत्वा -अशेष-समाप्तिं पुरोहितः प्राञ्जलिर् ब्रूयात्॥

४७.७९ यान्तु देवगणाः सर्वे पूजाम् आदाय पार्थिवात्।

४७.७९ सिद्धिं दत्त्वा *तु विपुलां[K.सुविपुलाम्] पुनर् आगमनाय *च[K.वै]॥

४७.८० नृपतिर् अतो दैवज्ञं पुरोहितं च-अर्चयेद् धनैर् बहुभिः।

४७.८० अन्यांश् च दक्षिणीयान् *यथोचितं[K.यथार्हतः] श्रोत्रियप्रभृतीन्॥

४७.८१ दत्त्वा -अभयं प्रजानाम् आघातस्थानगान् विसृज्य पशून्।

४७.८१ बन्धन-मोक्षं कुर्याद् अभ्यन्तर-दोषकृद्-वर्जम्॥

४७.८२ एतत् प्रयुज्यमानं प्रतिपुष्यं सुख-यशो-अर्थ-वृद्धिकरम्।

४७.८२ *पुष्याद्[K.पुष्यम्] विना-अर्धफलदा पौषी शान्तिः *परा[K.पुरा] प्रोक्ता॥

४७.८३ राष्ट्र-उत्पात-उपसर्गेषु राहोः केतोश् च दर्शने।

४७.८३ ग्रहावमर्दने च-एव पुष्यस्नानं समाचरेत्॥

४७.८४ नास्ति लोके स उत्पातो यो ह्य् अनेन न शाम्यति।

४७.८४ मङ्गलं चापरं नास्ति यद् अस्माद् अतिरिच्यते॥

४७.८५ अधिराज्यार्थिनो राज्ञः पुत्रजन्म च काङ्क्षतः।

४७.८५ तत्पूर्वम् अभिषेके च विधिर् एष प्रशस्यते॥

४७.८६ महेन्द्रार्थम् उवाच-इदम् बृहत्कीर्तिर् बृहस्पतिः।

४७.८६ स्नानम् आयुष्-प्रजा-वृद्धि-सौभाग्य-करणं परम्॥

४७.८७ अनेनैव विधानेन हस्त्य्-अश्वं *स्नापयेत् ततः[K.स्नापयीत यः]।

४७.८७ तस्य-आमय-विनिर्मुक्तं परां सिद्धिम् अवाप्नुयात्॥

४८ पट्टलक्षणाध्यायः

४८.०१ विस्तरशो निर्दिष्टं पट्टाणां लक्षणं यद् आचार्यैः।

४८.०१ तत् संक्षेपः क्रियते मया -अत्र सकलार्थसम्पन्नः॥

४८.०२ पट्टः शुभदो राज्ञां मध्ये -अष्टाव् अङ्गुलानि विस्तीर्णः।

४८.०२ सप्त नरेन्द्र-महिष्याः षड् युवराजस्य निर्दिष्टः॥

४८.०३ चतुर्-अङ्गुल-विस्तारः पट्टः सेनापतेर् भवति मध्ये।

४८.०३ द्वे च प्रसादपट्टः पञ्चैते कीर्तिताः पट्टाः॥

४८.०४ सर्वे द्विगुणायामा मध्याद् अर्धेन पार्श्वविस्तीर्णाः।

४८.०४ सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्ध्यै॥

४८.०५ पञ्च-शिखो भूमिपतेस् त्रिशिखो युवराज-पार्थिव-महिष्योः।

४८.०५ एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥

४८.०६ क्रियमाणं यदि पत्रं सुखेन विस्तारम् एति पट्टस्य।

४८.०६ वृद्धिजयौ भूमिपतेस् तथा प्रजानां च सुखसम्पत्॥

४८.०७ जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः।

४८.०७ मध्ये स्फुटितस् त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः॥

४८.०८ अशुभनिमित्त-उत्पत्तौ शास्त्रज्ञः शान्तिम् आदिशेद् राज्ञः।

४८.०८ शस्तनिमित्तः पट्टो नृप-राष्ट्र-विवृद्धये भवति॥

४९ खड्गलक्षणाध्यायः

४९.०१ अङ्गुल-शतार्धम् उत्तम ऊनः स्यात् *पञ्चविंशतिः[K.पञ्चविंशतिं] खड्गः।

४९.०१ अङ्गुलमानाज् ज्ञेयो व्रणो -अशुभो विषम-पर्वस्थः॥

४९.०२ श्रीवृक्ष-वर्धमान-आतपत्र-शिवलिङ्ग-कुण्डल-अब्जानाम्।

४९.०२ सदृशा व्रणाः प्रशस्ता ध्वज-आयुध-स्वस्तिकानां च॥
४९.०३ कृकलास-काक-कङ्क-क्रव्याद-कबन्ध-वृश्चिक-आकृतयः।

४९.०३ खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश् च॥

४९.०४ स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृग्-मनो -अनुगतः।

४९.०४ अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः॥

४९.०५ क्वणितं मरणाय-उक्तं पराजयाय प्रवर्तनं कोशात्।

४९.०५ स्वयम् उद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे॥

४९.०६अ नाकारणं विवृणुयान् न विघट्टयेच् च

४९.०६ब् पश्येन् न तत्र वदनं न वदेच् च मूल्यम्।

४९.०६च् देशं न चास्य कथयेत् प्रतिमानयेन् न

४९.०६द् नैव स्पृशेन् नृपतिर् अप्रयतो -असियष्टिम्॥

४९.०७ गोजिह्वा-संस्थानो नीलोत्पल-वंश-पत्र-सदृशश् च।

४९.०७ करवीर-पत्र-शूल-अग्र-मण्डल-अग्राः प्रशस्ताः स्युः॥

४९.०८ निष्पन्नो न छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः।

४९.०८ मूले म्रियते स्वामी जननी तस्याग्रतश् छिन्ने॥

४९.०९ यस्मिन् त्सरुप्रदेशे व्रणो भवेत् तद्वद् एव खड्गस्य।

४९.०९ वनितानाम् इव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा॥

४९.१० अथ वा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत् तदवधार्य।

४९.१० कोशस्थस्य-आदेश्यो व्रणो -अस्ति शास्त्रं विदित्वेदम्॥

४९.११ शिरसि स्पृष्टे प्रथमे -अङ्गुले द्वितीये ललाटसंस्पर्शे।

४९.११ भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च॥

४९.१२ *नास-औष्ठ[K.नासोष्ठ]-कपोल-हनु-श्रवण-ग्रीव-*अंसके च[K.अंसकेषु] पञ्चाद्याः।

४९.१२ उरसि द्वादशसंस्थस् त्रयोदशे कक्षयोर् ज्ञेयः॥

४९.१३ स्तन-हृदय-उदर-*कुक्षि-नाभौ[K.कुक्षिनाभीषु] तु चतुर्दशादयो ज्ञेयाः।

४९.१३ नाभिमूले कट्यां गुह्ये च-एकोनविंशतितः॥

४९.१४ ऊर्वोर् द्वाविंशे स्याद् ऊर्वोर् मध्ये व्रणस् त्रयोविंशे।

४९.१४ जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥

४९.१५ जङ्घामध्ये गुल्फे पाष्ण्यां पादे तदङ्गुलीष्व् अपि च।

४९.१५ षड्विंशतिकाद् यावत् त्रिंशद् इति मतेन गर्गस्य॥

४९.१६ पुत्रमरणं धनाग्निर् धनहानिः सम्पदश् च बन्धश् च।

४९.१६ एकाद्यङ्गुलसंस्थैर् व्रणैः फलं निर्दिशेत् क्रमशः॥

४९.१७ सुतलाभः कलहो हस्ति-लब्धयः पुत्रमरण-धनलाभौ।

४९.१७ क्रमशो विनाश-वनिताग्नि-चित्तदुःखानि षट्प्रभृति॥

४९.१८ लब्धिर् *हानिः स्त्रीलब्धयो[K.हानिस्त्रीलब्धयो] बधो वृद्धि-मरण-परितोषाः।

४९.१८ ज्ञेयाश् चतुर्दशादिषु धनहानिश् चैकविंशे स्यात्॥

४९.१९ वित्ताग्निर् अनिर्वाणं धन-आगमो मृत्यु-सम्पदो -अस्वत्वम्।

४९.१९ ऐश्वर्य-मृत्यु-राज्यानि च क्रमात् त्रिंशद् इति यावत्॥

४९.२० परतो न विशेषफलं विषमसमस्थास् तु पापशुभफलदाः।

४९.२० कैश् चिद् अफलाः प्रदिष्टास् त्रिंशत्परतो -अग्रम् इति यावत्॥

४९.२१ करवीर-उत्पल-गज-मद-घृत-कुङ्कुम-कुन्द-चम्पक-सगन्धः।

४९.२१ शुभदो -अनिष्टो गोमूत्र-पङ्क-मेदः-सदृश-गन्धः॥

४९.२२ कूर्म-वसा-असृक्-क्षार-उपमश् च भय-दुःखदो भवति गन्धः।

४९.२२ वैदूर्य-कनक-विद्युत्-प्रभो जय-आरोग्य-वृद्धिकरः॥

४९.२३अ इदम् औशनसं च शस्त्र-पानं

४९.२३ब् रुधिरेण श्रियम् इच्छतः प्रदीप्ताम्।

४९.२३च् हविषा गुणवत्-सुत-अभिलिप्सोः

४९.२३द् सलिलेन-अक्षयम् इच्छतश् च वित्तम्॥

४९.२४अ वडवा-उष्ट्र-करेणु-दुग्ध-पानं

४९.२४ब् यदि पापेन समीहते -अर्थसिद्धिम्।

४९.२४च् झष-पित्त-मृग-अश्व-बस्त-दुग्धैः

४९.२४द् करि-हस्त-च्छिदये सताल-गर्भैः॥

४९.२५अ आर्कं पयो हुडुविषाण-मषी-समेतं

४९.२५ब् पारावत-आखु-शकृता च *युतः[K.युतं] प्रलेपः।

४९.२५च् शस्त्रस्य तैलमथितस्य ततो -अस्य पानं

४९.२५द् पश्चात्-शितस्य न शिलासु भवेद् विघातः॥

४९.२६अ क्षारे कदल्या मथितेन युक्ते

४९.२६ब् दिन-उषिते पायितम् आयसं यत्।

४९.२६च् सम्यक् शितं च-अश्मनि नैति भङ्गं

४९.२६द् न च-अन्यलोहेष्व् अपि तस्य कौण्ठ्यम्॥

५०.०१अ दैवज्ञेन शुभ-अशुभं दिग्-उदित-स्थान-आहृतान् ईक्षता

५०.०१ब् वाच्यं प्रष्टृ-निज-अपर-अङ्ग-घटनां च-आलोक्य कालं धिया।

५०.०१च् सर्वज्ञो हि चर-अचर-आत्मकतया-असौ सर्वदर्शो विभुश्

५०.०१द् चेष्टा-व्याहृतिभिः शुभ-अशुभ-फलं सन्दर्शयत्य् अर्थिनाम्॥

५०.०२अ स्थानं पुष्प-सुहासि-भूरि-फलभृत्-सुस्निग्ध-कृत्ति-च्छद-

५०.०२ब् असत्पक्षि-च्युत-शस्तसंज्ञित-तरु-च्छाय-उपगूढं समम्।

५०.०२च् देव-ऋषि-द्विज-साधु-सिद्ध-निलयं सत्पुष्प-सस्य-उक्षितम्

५०.०२द् सत्स्वादु-उदक-निर्मलत्व-जनित-आह्लादं च *सच्छाद्वलम्[K.सच्छाङ्वलम्]॥

५०.०३ छिन्न-भिन्न-कृमि-खात-कण्टकि-प्लुष्ट-रूक्ष-कुटिलैर् न सत् कुजैः।

५०.०३ क्रूर-पक्षि-युत-निन्द्यनामभिः शुष्क-शीर्ण-बहु-पर्ण-*चर्मभिः[K.वर्मभिः]॥

५०.०४अ श्मशान-शून्यायतनं चतुष्पथं

५०.०४ब् तथा--अमनोज्ञं विषमं सद-ऊषरम्।

५०.०४च् अवस्कर-अङ्गार-कपाल-भस्मभिश्

५०.०४द् चितं तुषैः शुष्कतृणैर् नशोभनम्॥

५०.०५ प्रव्रजित-नग्न-नापित-रिपु-बन्धन-*सौनिकैस्[K.सूनिकैस्] तथा श्वपचैः।

५०.०५ कितव-यति-पीडितैर् युतम् आयुध-माध्वीक-विक्रयैर् न शुभम्॥

५०.०६अ प्राग्-उत्तर-ईशाश् च दिशः प्रशस्ताः

५०.०६ब् प्रष्टुर् न वाय्व्-अम्बु-यमाग्नि-रक्षः।

५०.०६च् पूर्वाह्नकाले -अस्ति शुभं न रात्रौ

५०.०६द् सन्ध्याद्वये प्रश्नकृतो -अपराह्णे॥

५०.०७अ यात्राविधाने हि शुभ-अशुभं यत्

५०.०७ब् प्रोक्तं निमित्तं तद् इहापि वाच्यम्।

५०.०७च् दृष्ट्वा पुरो वा जनताहृतं वा

५०.०७द् प्रष्टुः स्थितं पाणितले -अथ वस्त्रे॥

५०.०८अ अथ-अङ्गान्य् ऊरू-ओष्ठ-स्तन-वृषण-पादं च दशना

५०.०८ब् भुजौ हस्तौ गण्डौ कच-गल-नख-अङ्गुष्ठम् अपि यत्।

५०.०८च् स-शङ्खं *कक्ष-अंसं श्रवण[K.कषांसश्रवण]-गुद-सन्धि-इति पुरुषे

५०.०८द् स्त्रियां भ्रू-नासा-स्फिग्-वलि-कटि-सुलेखा-अङ्गुलिचयम्॥

५०.०९अ जिह्वा ग्रीवा पिण्डिके पार्ष्णियुग्मं

५०.०९ब् जङ्घे नाभिः कर्णपाली कृकाटी।

५०.०९च् वक्त्रं पृष्ठं जतु-जानु-अस्थि-पार्श्वं

५०.०९द् हृत्-तालु-अक्षी मेहन-उरस्-त्रिकं च॥

५०.१० नपुंसक-आख्यं च शिरो ललाटम् आश्व् आद्य-संज्ञैर् अपरैश् चिरेण।

५०.१० सिद्धिर् भवेज् जातु नपुंसकैर् नो रूक्ष-क्षतैर् भग्न-कृशैश् च पूर्वैः॥

५०.११ स्पृष्टे वा चालिते वा-अपि पाद-अङ्गुष्ठे -अक्षि-रुग् भवेत्।

५०.११ अङ्गुल्यां दुहितुः शोकं शिरोघाते नृपाद् भयम्॥

५०.१२ विप्रयोगम् उरसि स्वगात्रतः कर्पटाहृतिर् अनर्थदा भवेत्।

५०.१२ स्यात् प्रियाप्तिर् अभिगृह्य कर्पटं पृच्छतश् चरणपादयोजितुः॥

५०.१३ पाद-अङ्गुष्ठेन विलिखेद् भूमिं क्षेत्र-उत्थचिन्तया।

५०.१३ हस्तेन पादौ कण्डूयेत् तस्य *दासीमयी[K.दासीमया] च सा॥

५०.१४ ताल-भूर्ज-पट-दर्शने -अंशुकं चिन्तयेत् कच-तुष-अस्थि-भस्मगम्।

५०.१४ व्याधिर् आश्रयति रज्जु-जालकं वल्कलं च समवेक्ष्य बन्धनम्॥

५०.१५ पिप्पली-मरिच-शुण्ठि-वारिदै रोध्र-कुष्ठ-वसन-अम्बु-जीरकैः।

५०.१५ गन्ध-मांसि-शतपुष्पया वदेत् पृच्छतस् तगरकेण *चिन्तयेत्[K.चिन्तनम्]॥

५०.१६ स्त्री-पुरुष-दोष-पीडित-सर्व-*अर्थ[K.अध्व]-सुत-अर्थ-धान्य-तनयानाम्।

५०.१६ द्विचतुष्पद-क्षितीनां विनाशतः कीर्तितैर् दृष्टैः॥

५०.१७ न्यग्रोध-मधुक-तिन्दुक-जम्बू-प्लक्ष-आम्र-*बदर[K.बदरि]-जातिफलैः।

५०.१७ धन-कनक-पुरुष-लोह-अंशुक-रूप्य-*औदुम्बर-आग्निर्[K.उदुम्बराग्निर्] अपि करगैः॥

५०.१८ धान्य-परिपूर्ण-पात्रं कुम्भः पूर्णः कुटुम्ब-वृद्धिकरौ।

५०.१८ गज-गो-शुनां पुरीषं धन-युवति-सुहृद्-विनाशकरम्॥

५०.१९ पशु-हस्ति-महिष-पङ्कज-रजत-व्याघ्रैर् लभेत सन्दृष्टैः।

५०.१९ अवि-धन-निवसन-मलयज-कौशेय-आभरण-सङ्गतम्॥

५०.२० पृच्छा वृद्ध-श्रावक-सुपरिव्राड्-दर्शने नृभिर् विहिता।

५०.२० मित्र-द्यूतार्थ-भवा गणिका-नृप-सूतिका-अर्थकृता॥

५०.२१ शाक्य-उपाध्याय-*अर्हत्[K.आर्हत]-*निर्ग्रन्थि[K.निर्ग्रन्थ]-निमित्त-निगम-कैवर्तैः।

५०.२१ चौर-चमूपति-वणिजां दासी-योध-आपणस्थ-वध्यानाम्॥

५०.२२ तापसे शौण्डिके दृष्टे प्रोषितं पशुपालनम्।

५०.२२ ह्रद्गतं *प्रच्छकस्य[K.पृच्छकस्य] स्याद् उञ्छवृटौ विपन्नता॥

५०.२३ इच्छामि प्रष्टुं भण पश्यत्व् आर्यः समादिश-इत्य् उक्ते॥

५०.२३ संयोग-कुटुम्ब-उत्था लाभ-ऐश्वर्य-उद्गता चिन्ता॥

५०.२४अ निर्दिश-इति गदिते *जय-अध्वजा[K.जयाध्वगा]

५०.२४ब् प्रत्यवेक्ष्य मम चिन्तितं वद।

५०.२४च् आशु सर्वजनमध्यगं त्वया

५०.२४द् दृश्यताम् इति च बन्धु-चौरजा॥

५०.२५अ अन्तःस्थे -अङ्गे स्वजन उदितो बाह्यजे बाह्य *एव[K.एवम्]

५०.२५ब् पाद-अङ्गुष्ठ-अङ्गुलिकलनया दासदासीजनः स्यात्।

५०.२५च् जङ्घे प्रेष्यो भवति भगिनी नाभितो हृत्स्वभार्या

५०.२५द् पाण्यङ्गुष्ठ-अङ्गुलिचय-कृतस्पर्शने पुत्रकन्ये॥

५०.२६ मातरं जठरे मूर्ध्नि गुरुं दक्षिणवामकौ।

५०.२६ बाहू भ्राता-अथ तत्पत्नी स्पृष्ट्वा-एवं चौरम् आदिशेत्॥

५०.२७ अन्तर्-अङ्गम् अवमुच्य बाह्य-ग-स्पर्शनं यदि करोति पृच्छकः।

५०.२७ श्लेष्म-मूत्र-शकृतस् *त्यजन्त्य् अथो[K.त्यजन्नधः] पातयेत् कर-तल-स्थ-वस्तु चेत्॥

५०.२८अ भृशम् अवनामित-अङ्ग-परिमोटनतो -अप्य् अथ वा

५०.२८ब् जन-धृत-रिक्त-भाण्डम् अवलोक्य च चौरजनम्।

५०.२८च् हृत-पतित-क्षत-अस्मृत-विनष्ट-भग्न-गत-

५०.२८द् उन्मुषित-मृत-आद्य्-अनिष्ट-रवतो लभते न हृतम्॥

५०.२९अ निगदितम् इदं यत्-तत् सर्वं तुष-अस्थि-विष-आदिकैः

५०.२९ब् सह मृतिकरं पीडा-अर्तानां समं रुदित-*क्षतैः[K.क्षुतैः]।

५०.२९च् अवयवम् अपि स्पृष्ट्वा-अन्तःस्थं दृढं मरुद् आहरेद्

५०.२९द् अतिबहु तदा भुक्त्वा-अन्नं संस्थितः सुहितो वदेत्॥

५०.३० ललाटस्पर्शनात्-शूकदर्शनात्-शालिजौदनम्।

५०.३० उरःस्पर्शात् षष्टिक-*आख्यं[K.अन्नम्] ग्रीवा-स्पर्शे च यावकम्॥

५०.३१ कुक्षि-कुच-जठर-जानु-स्पर्शे माषाः पयस्-तिल-यवाग्वः।

५०.३१ *आस्वादयते[K.आस्वादयतश्] च-ओष्ठौ लिहते मधुरं रसं ज्ञेयम्॥

५०.३२ *विसृक्के[K.विस्पृक्के] स्फोटयेज् जिह्वाम् आम्ले वक्त्रं विकूणयेत्।

५०.३२ *कटुके -अथ कषाये -अथ[K.कटुतिक्तकषायोष्णैर्] हिक्केत् ष्ठीवेच् च सैन्धवे॥

५०.३३अ श्लेष्मत्यागे शुष्क-तिक्तं तद् अल्पं

५०.३३ब् शुत्वा क्रव्यादं वा प्रेक्ष्य वा मांसमिश्रम्।

५०.३३च् भ्रू-गण्ड-ओष्ठ-स्पर्शने शाकुनं तद्-

५०.३३द् भुक्तं तेन-इत्य् उक्तम् एतन् निमित्तम्॥

५०.३४ मूर्ध-गल-केश-हनु-शङ्ख-कर्ण-जङ्घं वस्तिं च स्पृष्ट्वा।

५०.३४ गज-महिष-मेष-शूकर-गो-शश-मृग-*महिष[K.ओमित्तेद्]-मांसयुग् भुक्तम्॥

५०.३५ दृष्टे शुते -अप्य् अशकुने गोधा-मत्स्य-आमिषं वदेद् भुक्तम्।

५०.३५ गर्भिण्या गर्भस्य च निपतनम् एवं प्रकल्पयेत् प्रश्ने॥

५०.३६ पुं-स्त्री-नपुंसक-आख्ये दृष्टे -अनुमिते पुरःस्थिते स्पृष्टे।

५०.३६ तज्जन्म भवति पान-अन्न-पुष्प-फल-दर्शने च शुभम्॥

५०.३७अ अङ्गुष्ठेन भ्रू-उदरं वा-अङ्गुलिं वा

५०.३७ब् स्पृष्ट्वा पृच्छेद् गर्भ-चिन्ता तदा स्यात्।

५०.३७च् मध्व्-आज्याद्यैर् हेम-रत्न-प्रवालैर्

५०.३७द् अग्रस्थैर् वा मातृ-धात्र्य्-आत्मजैश् च॥

५०.३८अ गर्भयुता जठरे करगे स्याद्

५०.३८ब् दुष्ट-निमित्त-वशात् तदुदासः।

५०.३८च् कर्षति तज्जठरं यदि पीठ-

५०.३८द् उत्पीडनतण् करगे च करे -अपि॥

५०.३९ घ्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत्।

५०.३९ वामे *-अब्दौ[K.द्वौ] कर्ण एवं मा द्विचतुर्ग्रः शुतिस्तने॥

५०.४०अ वेणीमूले त्रीन् सुतान् कन्यके द्वे

५०.४०ब् कर्णे पुत्रान् पञ्च हस्ते त्रयं च।

५०.४०च् अङ्गुष्ठान्ते पञ्चकं चानुपूर्व्या

५०.४०द् पाद-अङ्गुष्ठे पार्ष्णियुग्मे -अपि कन्याम्॥

५०.४१ सव्य-असव्य-ऊरुसम्स्पर्शे सूते कन्या-सुत-द्वयम्।

५०.४१ स्पृष्टे ललाट-मध्य-अन्ते चतुस्-त्रि-तनया भवेत्॥

५०.४२ शिरो-ललाट-भ्रू-कर्ण-गण्डं हनु-रदा गलम्

५०.४२ सव्य-अपसव्य-स्कन्धश् च हस्तौ चिबुक-नालकम्॥

५०.४३अ उरः कुचं दक्षिणम् अप्य् असव्यं

५०.४३ब् हृत्-पार्श्वम् एवं जठरं कटिश् च।

५०.४३च् स्फिक्-पायु-सन्धि-ऊरुयुगं च जानू

५०.४३द् जङ्घे -अथ पादाव् इति कृत्तिका-आदौ॥

५०.४४अ इति निगदितम् एतद् गात्र-संस्पर्श-लक्ष्म

५०.४४ब् प्रकटम् अभिमताप्त्यै वीक्ष्य शास्त्राणि सम्यक्।

५०.४४च् विपुलमतिर् उदारो वेत्ति यः सर्वम् एतन्

५०.४४द् नरपतिजनताभिः पूज्यते -असौ सदैव॥

५१ पिटकलक्षणाध्यायः

५१.०१ सित-रक्त-पीत-कृष्णा विप्रादीनां क्रमेण पिटका ये।

५१.०१ ते क्रमशः प्रोक्तफला वर्णानां *न-अग्रजातानाम्[K.अग्रजादीनाम्]॥

५१.०२अ सुस्निग्ध-व्यक्त-शोभाः शिरसि धनचयं मूर्ध्नि सौभाग्यम् आराद्

५१.०२ब् दौर्भाग्यं भ्रूयुगोत्थाः प्रियजन-घटनाम् आशु दुःशीलतां च।

५१.०२च् तन्मध्योत्थाश् च शोकं नयनपुटगता नेत्रयोर् इष्टदृष्टिं

५१.०२द् प्रव्रज्यां शङ्खदेशे -अशुजलनिपतन-*स्थानगा रान्ति चिन्ताम्[K.स्थानगाश् च अतिचिन्ताम्]॥

५१.०३अ घ्राणा-गण्डे वसनसुतदाश् च-ओष्ठयोर् अन्नलाभं

५१.०३ब् कुर्युस् तद्वच् चिबुकतलगा भूरि वित्तं ललाटे।

५१.०३च् हन्वोर् एवं गलकृतपदा भूषणान्य् अन्नपाने

५१.०३द् श्रोत्रे *षड्भूतण[K.ऊ.तद्भूषण]गणम् अपि ज्ञानम् आत्मस्वरूपम्॥

५१.०४अ शिरः-सन्धि-ग्रीवा-हृदय-कुच-पार्श्व-उरसि गता

५१.०४ब् अयोघातं घातं सुत-तनय-लाभं शुचम् अपि।

५१.०४च् प्रियप्राप्तिं स्कन्धे -अप्य् अटनम् अथ भिक्षार्थम् असकृद्

५१.०४द् विनाशं कक्षोत्था विदधति धनानां *बहुमुखम्[K.बहुसुखम्]॥

५१.०५ दुःख-शतुनिचयस्य *विनाशं[K.विघातं] पृष्ठ-बाहु-युगजा रचयन्ति।

५१.०५ संयमं च मणिबन्धन-जाता भूषण-आद्यम् उपबाहु-युग्-उत्थाः॥

५१.०६अ धनाप्तिं सौभाग्यं शुचम् अपि कर-अङ्गुल्य्-उदरगाः

५१.०६ब् सुपानान्नं नाभौ तदध इह चौरैर् धनहृतिम्।

५१.०६च् धनं धान्यं बस्तौ युवतिम् अथ मेढ्रे सुतनयान्

५१.०६द् धनं सौभाग्यं वा गुद-वृषणजाता विदधति॥

५१.०७ ऊर्वोर् यान-अङ्गना-लाभं जान्वोः शतुजनात् क्षतिम्।

५१.०७ शस्त्रेण जङ्घयोर् गुल्फे -अध्व-बन्ध-क्लेशदायिनः॥

५१.०८ स्फिक्-पार्ष्णि-पाद-जाता धननाश-अगम्यगमनम् अध्वानम्॥

५१.०८ बन्धनम् अङ्गुलिनिचये -अङ्गुष्ठे च ज्ञातिलोकतः पूजाम्॥

५१.०९ उत्पात-गण्ड-पिटका दक्षिणतो वामतस् त्व् अभीघाताः।

५१.०९ धन्या भवन्ति पुंसां तद्-विपरीताश् *च[K.तु] नारीणाम्॥

५१.१०अ इति पिटकविभागः प्रोक्त आमूर्धतो -अयं

५१.१०ब् व्रण-तिलक-विभागो -अप्य् एवम् एव प्रकल्प्यः।

५१.१०च् भवति मशक-लक्ष्म-आवर्तजन्म-अपि तद्वन्

५१.१०द् निगदितफलकारि प्राणिनां देह-संस्थम्॥

५२ वास्तुविद्या

५२.०१ वास्तुज्ञानम् अथ-अतः कमलभवान् मुनिपरम् परायातम्।

५२.०१ क्रियते -अधुना मया-इदम् विदग्ध-सांवत्सर-प्रीत्यै॥

५२.०२ किम् अपि किल भूतम् अभवद् रुन्धानं रोदसी शरीरेण।

५२.०२ तद् अमरगणेन सहसा विनिगृह्य-अधोमुखं न्यस्तम्॥

५२.०३ यत्र च येन गृहीतं विबुधेन-अधिष्ठितः स तत्र-एव।

५२.०३ तद् अमरमयं विधाता वास्तुनरं कल्पयाम् आस॥

५२.०४ उत्तमम् अष्ट-अभ्यधिकं हस्तशतं नृप-गृहं पृथुत्वेन।

५२.०४ अष्ट-अष्ट-ऊनान्य् एवं पञ्च सपादानि दैर्घ्येण॥

५२.०५ षड्भिः षड्भिर् हीना सेनापति-सद्मनां चतुःषष्टिः।

५२.०५ *एवं पञ्च गृहाणि[K.पञ्च एवं विस्तारात्] षड्भाग-समन्विता दैर्घ्यम्॥

५२.०६ षष्टिश् *चतुर्भिर् हीना[K.चतुर्विहीना] वेश्मानि पञ्च सचिवस्य।

५२.०६ स्व-अष्टांश-युतो दैर्घ्यं तदर्धतो राज-महिषीणाम्॥

५२.०७ षड्भिः षड्भिश् च-एवं युवराजस्य-अपवर्जिता-अशीतिः।

५२.०७ त्र्यंशान्विता च दैर्घ्यं पञ्च तदर्धेस् तदनुजनानाम्॥

५२.०८ नृप-सचिव-अन्तरतुल्यं सामन्त-प्रवर-राजपुरुषाणाम्।

५२.०८ नृप-युवराज-विशेषः कञ्चुकि-वेश्या-कलाज्ञानाम्॥

५२.०९ अध्यक्ष-अधिकृतानां *सर्वेषां[K.सर्वेषाम् एव] कोश-रति-तुल्यम्।

५२.०९ युवराज-मन्त्रि-विवरं कर्मान्त-अध्यक्ष-दूतानाम्॥

५२.१० चत्वारिंशद्- धीना चतुश्चतुर्भिस् तु पञ्च यावद् इति।

५२.१० षड्-भाग-युता दैर्घ्यं दैवज्ञ-पुरोधसोर् भिषजः॥

५२.११ वास्तुनि यो विस्तारः स एव च-उच्छ्राय-निश्चयः शुभदः।

५२.११ शाला-एकेषु गृहेष्व् अपि विस्ताराद् द्विगुणितं दैर्घ्यम्॥

५२.१२ चातुर्वर्ण्य-व्यासो द्वात्रिंशत् *सा[K.स्यात्] चतुश्चतुर्हीना।

५२.१२ आषोडशाद् इति परं न्यूनतरम् अतीव हीनानाम्॥

५२.१३ सदशांशं विप्राणां क्षत्रस्य-अष्टांश-संयुतं दैर्घ्यम्।

५२.१३ षड्भाग-युतं वैश्यस्य भवति शूद्रस्य पादयुतम्॥

५२.१४ नृप-सेनापति-गृहयोर् अन्तरमानेन कोश-रति-भवने।

५२.१४ सेनापति-चातुर्वर्ण्य-विवरतो राजपुरुषाणाम्॥

५२.१५ अथ *पारशव[K.पारसव]-आदीनां स्वमान-संयोग-दल-समं भवनम्।

५२.१५ हीन-अधिकं स्वमानाद् अशुभकरं वास्तु सर्वेषाम्॥

५२.१६ पश्व्-आश्रमिणाम् अमितं धान्य-आयुध-वह्नि-रति-गृहाणां च।

५२.१६ न-इच्छन्ति शास्त्रकारा हस्तशताद् उच्छ्रितं परतः॥

५२.१७ सेनापति-नृपतीनां सप्तति-सहिते द्विधा-कृते व्यासे।

५२.१७ शाला चतुर्दश-हृते पञ्चत्रिंशद्-धृते -अलिन्दः॥

५२.१८ हस्त-द्वात्रिंश-आदिषु चतुश्-चतुस्-त्रि-त्रिक-त्रिकाः शालाः।

५२.१८ सप्त-दश-त्रितय-तिथि-त्रयोदश-कृताङ्गुल-अभ्यधिकाः॥

५२.१९ त्रि-त्रि-द्वि-द्वि-द्वि-समाः क्षयक्रमाद् अङ्गुलानि च-एतेषाम्।

५२.१९ व्येका विंशतिर् अष्टौ विंशतिर् अष्टादश त्रितयम्॥

५२.२० शाला-त्रिभाग-तुल्या कर्तव्या वीथिका बहिर्भवनात्।

५२.२० यद्य् अग्रतो भवति सा सोष्णीषं नाम तद्वास्तु॥

५२.२१ सायाश्रयम् इति पश्चात् सावष्टम्भं तु पार्श्वसंस्थितया।

५२.२१ सुस्थितम् इति च समन्तात्-शास्त्रज्ञैः पूजिताः सर्वाः॥

५२.२२ विस्तार-षोडशांशः सचतुर्-हस्तो भवेद् गृह-उच्छ्रायः।

५२.२२ द्वादश-भागेन-ऊनो भूमौ भूमौ समस्तानाम्॥

५२.२३ व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः।

५२.२३ पक्व-इष्टका-आकृतानां दारुकृतानां तु *न विकल्पः[K.सविकल्पः, Kऽस् त्र्. न विकल्पः]॥

५२.२४ एकादश-भाग-युतः ससप्ततिर् नृप-बलेशयोर् व्यासः।

५२.२४ उच्छ्रायो -अङ्गुलतुल्यो द्वारस्यार्धेन विष्कम्भः॥

५२.२५ विप्रादीनां व्यासात् पञ्चांशो -अष्टादश-अङ्गुल-समेतः।

५२.२५ साष्टांशो विष्कम्भो द्वारस्य त्रिगुण उच्छ्रायः॥

५२.२६ उच्छ्राय-हस्त-संख्या-परिमाणान्य् अङ्गुलानि बाहुल्यम्।

५२.२६ शाखाद्वये -अपि कार्यं सार्धं तत् स्याद् उदुम्बरयोः॥

५२.२७ उच्छ्रायात् सप्तगुणाद् अशीतिभागः पृथुत्वम् एतेषाम्।

५२.२७ नवगुणिते -अशीत्यंशः स्तम्भस्य दशांशहीनो -अग्रे॥

५२.२८ *समचतुरस्रो[K.समचतुरश्रो] रुचको वज्रो *-अष्टास्रिर्[K.अष्टाश्रिस्] द्विवज्रको द्विगुणः।

५२.२८ द्वात्रिंशता तु मध्ये प्रलीनको वृत्त इति वृत्तः॥

५२.२९ स्तम्भं विभज्य नवधा वहनं भागो घटो -अस्य भागो -अन्यः।

५२.२९ पद्मं तथा-उत्तरोष्ठं कुर्याद् भागेन भागेन॥

५२.३० स्तम्भसमं बाहुल्यं भारतुलानाम् उपर्य् उपर्य् आसाम्।

५२.३० भवति तुला-उपतुलानाम् ऊनं पादेन पादेन॥

५२.३१ अप्रतिषिद्ध-अलिन्दं समन्ततो वास्तु सर्वतोभद्रम्।

५२.३१ नृप-विबुध-समूहानां कार्यं द्वारैश् चतुर्भिर् अपि॥

५२.३२ नन्द्यावर्तम् अलिन्दैः शालाकुड्यात् प्रदक्षिण-अन्तगतैः।

५२.३२ द्वारं पश्चिमम् अस्मिन् विहाय शेषाणि कार्याणि॥

५२.३३ द्वारालिन्दो -अन्तगतः प्रदक्षिणो -अन्यः शुभस् ततश् चान्यः।

५२.३३ *तस्मिंश्[K.तद्वद्] च वर्धमाने द्वारं तु न दक्षिणं कार्यम्॥

५२.३४ अपरो -अन्तगतो -अलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ।

५२.३४ तदवधि-*विधृतश्[K.विवृतश्, Kऽस् त्र्. विधृत] चान्यः प्राग्द्वारं स्वस्तिके *शुभदम्[K.-अशुभदम्, Kऽस् त्र्. शुभम्]॥

५२.३५ प्राक्-पश्चिम-अवलिन्दाव् अन्तगतौ तद् अवधिस्थितौ शेषौ।

५२.३५ रुचके द्वारं न शुभदम् उत्तरतो -अन्यानि शस्तानि॥

५२.३६ श्रेष्ठं नन्द्यावर्तं सर्वेषां वर्धमान-संज्ञं च।

५२.३६ स्वस्तिक-रुचके मध्ये शेषं शुभदं नृप-आदीनाम्॥

५२.३७ उत्तरशाला-हीनं हिरण्यनाभं त्रिशालकं धन्यम्।

५२.३७ प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु॥

५२.३८ याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरम् एतत्।

५२.३८ पक्षघ्नम् अपरया वर्जितं सुत-ध्वंस-वैर-करम्॥

५२.३९ सिद्धार्थम् अपरयाम्ये यमसूर्यं पश्चिमोत्तरे शाले।

५२.३९ दण्डाख्यम् उदक्पूर्वे वात-आख्यं प्राग्युता याम्या॥

५२.४० पूर्वापरे तु शाले गृहचुल्ली दक्षिणोत्तरे काचम्।

५२.४० सिद्धार्थे -अर्थावाप्तिर् यमसूर्ये गृहपतेर् मृत्युः॥

५२.४१ दण्डवधो दण्डाख्ये कलह-उद्वेगः सदैव वात-बाख्ये।

५२.४१ वित्तविनाशश् चुल्ल्यां ज्ञातिविरोधः स्मृतः काचे॥

५२.४२ एकाशीतिविभागे दश दश पूर्वोत्तरायता रेखाः।

५२.४२ अन्तस् त्रयोदश सुरा द्वात्रिंशद्-बाह्य-कोष्ठस्थाः॥

५२.४३ शिखि-पर्जन्य-जयन्त-इन्द्र-सूर्य-सत्या भृशो -अन्तरिक्षश् च।

५२.४३ *ऐशान्यादि[K.ऐशान्याद्याः]-क्रमशो दक्षिणपूर्वे -अनिलः कोणे॥

५२.४४ पूषा वितथ-बृहत्क्षत-यम-गन्धर्व-आख्य-भृङ्गराज-मृगाः।

५२.४४ पितृ-दौवारिक-सुग्रीव-कुसुमदन्त-अम्बुपत्य्-असुराः॥

५२.४५ शोषो -अथ पापयक्ष्मा रोगः कोणे ततो -अहि-मुख्यौ च।

५२.४५ भल्लाट-सोम-भुजगास् ततो -अदितिर् दितिर् इति क्रमशः॥

५२.४६ मध्ये ब्रह्मा नवकोष्ठकाधिपो -अस्य-अर्यमा स्थितः प्राच्याम्।

५२.४६ एकान्तरात् प्रदक्षिणम् अस्मात् सविता विवस्वांश् च॥

५२.४७ विबुध-अधिपतिस् तस्मान् मित्रो -अन्यो राज-यक्ष्म-नामा च।

५२.४७ *पृथिवी[K.पृथ्वी]धरापवत्साव् इत्य् एते ब्रह्मणः परिधौ॥

५२.४८ आपो नाम-ऐशाने कोणे हौताशने च सावित्रः।

५२.४८ जय इति च नैर्ऋते रुद्र आनिले -अभ्यन्तरपदेषु॥

५२.४९ आपस् तथा-अपवत्सः पर्जन्यो -अग्निर् दितिश् च वर्गो -अयम्।

५२.४९ एवं कोणे कोणे पदिकाः स्युः पञ्च पञ्च सुराः॥

५२.५० बाह्या द्विपदाः शेषास् ते विबुधा विंशति समाख्याताः।

५२.५० शेषाश् चत्वारो -अन्ये त्रिपदा दिक्ष्व् अर्यमाद्यास् ते॥

५२.५१ पूर्वोत्तरदिग्-मूर्धा पुरुषो -अयम् अवाङ्-मुखो -अस्य शिरसि शिखी।

५२.५१ आपो मुखे स्तने -अस्यार्यमा ह्य् उरस्य् आपवत्सश् च॥

५२.५२ पर्जन्याद्या बाह्या दृक्श्रवण-उरःस्थलांसगा देवाः।

५२.५२ सत्याद्याः पञ्च भुजे हस्ते सविता *च सावित्रः[K.ससावित्रः]॥

५२.५३ वितथो बृहत्क्षतयुतः पार्श्वे जठरे स्थितो विवस्वांश् च।

५२.५३ ऊरू जानु च जङ्घे स्फिग् इति यमाद्यैः परिगृहीताः॥

५२.५४ एते दक्षिणपार्श्वे स्थानेष्व् एवं च वामपार्श्वस्थाः।

५२.५४ मेढ्रे शक्र-जयन्तौ हृदये ब्रह्मा पिता-*अङ्घ्रिगतः[K.अङ्घ्रिगतः]॥

५२.५५ अष्ट-अष्टकपदम् अथ वा कृत्वा रेखाश् च कोणगास् तिर्यक्।

५२.५५ ब्रह्मा चतुष्पदो -अस्मिन्न् अर्धपदा ब्रह्मकोणस्थाः॥

५२.५६ अष्टौ च बहिष्कोणेष्व् अर्धपदास् तद्-उभय-स्थिताः स-अर्धाः।

५२.५६ उक्तेभ्यो ये शेषास् ते द्विपदा विंशतिस् ते *हि[K.च]॥

५२.५७ सम्पाता वंशानां मध्यानि समानि यानि च पदानाम्।

५२.५७ मर्माणि तानि *विन्द्यान् न तानि परिपीडयेत्[K.विन्द्यान्न् अपरिपीडयेत्] प्राज्ञः॥

५२.५८ तान्य् अशुचिभाण्ड-कील-स्तम्भ-आद्यैः पीडितानि शल्यैश् च।

५२.५८ गृहभर्तुस् तत्तुल्ये पीडाम् अङ्गे प्रयच्छन्ति॥

५२.५९ कण्डूयते यद् अङ्गं *गृहभर्तुर्[K.गृहपतिना] यत्र वा-अमराहुत्याम्।

५२.५९ अशुभं भवेन् निमित्तं विकृतेर् वा अग्रेः सशल्यं तत्॥

५२.६० धनहानिर् दारुमये पशुपीडा रुग्भयानि चास्थिकृते।

[K.त्wओ वेर्सेस् इन्सेर्तेद्

K. ५३.६० लोहमये शस्त्र-भयं कपालकेशेषु मृत्युः स्यात्॥

K. ५३.६१ अङ्गारे स्तेनभयं भस्मनि च विनिर्दिशेत् सदाग्निभयम्।

K. ५३.६१ शल्यं हि मर्मसंस्थं सुवर्ण-रजत-आदृते -अत्यशुभम्॥

K. ५३.६२ मर्मण्यमर्मगो वा रुणद्ध्य् अर्थागमं तुषसमूहः]।

५२.६० अपि नागदन्तको मर्म-संस्थितो दोषकृद् भवति॥

५२.६१ रोगाद् वायुं पितृतो हुताशनं शोषसूत्रम् अपि वितथात्।

५२.६१ मुख्याद् भृशं जयन्ताच् च भृङ्गम् अदितेश् च सुग्रीवम्॥

५२.६२ तत्सम्पाता नव ये तान्य् अतिमर्माणि सम्प्रदिष्टानि।

५२.६२ यश् च पदस्य-अष्टांशस् तत् प्रोक्तं मर्म-परिमाणम्॥

५२.६३ पदहस्त-संख्यया सम्मितानि वंशो -अङ्गुलानि विस्तीर्णः।

५२.६३ वंशव्यासो -अध्यर्धः शिराप्रमाणं विनिर्दिष्टम्॥

५२.६४ सुखम् इच्छन् ब्रह्माणं यत्नाद् रक्षेद् गृही *गृहान्तःस्थम्[K.गृतान्तस्थम्]।

५२.६४ उच्छिष्ट-आद्य्-उपघाताद् गृहपतिर् उपतप्यते तस्मिन्॥

५२.६५ दक्षिणभुजेन हीने वास्तुनरे -अर्थक्षयो *-अङ्गनादादोषाः[K.अङ्गनादोषाः]।

५२.६५ वामे -अर्थधान्यहानिः शिरसि गुणैर् हीयते सर्वैः॥

५२.६६ स्त्रीदोषाः सुतमरणं प्रेष्यत्वं च-अपि चरणवैकल्ये।

५२.६६ अविकल-पुरुषे वसतां मान-अर्थ-युतानि सौख्यानि॥

५२.६७ गृह-नगर-ग्रामेषु च सर्वत्र-एवं प्रतिष्ठिता देवाः।

५२.६७ तेषु च यथ-अनुरूपं वर्णा विप्रादयो वास्याः।

५२.६८ वासगृहाणि च विन्द्याद् विप्र-आदीनाम् उदग्दिगाद्यानि।

५२.६८ विशतां च यथा भवनं भवन्ति तान्य् एव दक्षिणतः॥

५२.६९ नव-गुण-सूत्र-विभक्तान्य् अष्ट-गुणेन-अथ वा चतुःषष्टेः।

५२.६९ द्वाराणि यानि तेषाम् अनल-आदीनां फल-उपनयः॥

५२.७० *अनिलभयं[K.अनलभयं] *स्त्रीजननं[K.स्त्रीजन्म] प्रभूतधनता नरेन्द्र-वाल्लभ्यम्।

५२.७० क्रोधपरता-अनृतत्वं क्रौर्यं चौर्यं च पूर्वेण॥

५२.७१ अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्य-पान-सुत-वृद्धिः।

५२.७१ रौद्रं कृतघ्नम् अधनं सुत-वीर्य-घ्नं च याम्येन॥

५२.७२ सुत-पीडा रिपु-वृद्धिर् न सुत-धन-आप्तिः[K.धनस्ताप्तिः] सुत-अर्थ-फल-सम्पत्।

५२.७२ धनसम्पन् नृपति-भयं धन-क्षयो रोग इत्य् अपरे॥
५२.७३ वध-बन्धो रिपु-वृद्धिः सुतधनलाभः[K.धनसुतलाभः] समस्तगुणसम्पत्।

५२.७३ पुत्रधनाप्तिर् वैरं सुतेन दोषाः स्त्रिया नैःस्वम्॥

५२.७४ मार्ग-तरु-कोण-कूप-स्तम्भ-भ्रम-विद्धम् अशुब्भदं द्वारम्।

५२.७४ उच्छ्रायाद् द्विगुणमितां त्यक्त्वा भूमिं न दोषाय॥

५२.७५ रथ्या-आविद्धं द्वारं नाशाय कुमार-दोषदं तरुणा।

५२.७५ पङ्कद्वारे शोको व्ययो -अम्बुनिःस्राविणि[K.अम्बुनि श्राविणि] प्रोक्तः॥

५२.७६ कूपेन-अपस्मारो भवति विनाशश् च देवता-आविद्धे।

५२.७६ स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणाभिमुखे[K.ब्राह्मणो -अभिमुखे]॥

५२.७७ उन्मादः स्वयम् उद्घाटिते -अथ पिहिते स्वयं कुलविनाशः।

५२.७७ मानाधिके नृप-भयं दस्युभयं *व्यसनम् एव नीचे च[K.व्यसनदं नीचम्]॥

५२.७८ द्वारं द्वारस्य-उपरि यत् तन् न शिवाय सङ्कटं यच् च।

५२.७८ आव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति॥

५२.७९ पीडाकरम् अतिपीडितम् अन्तर्विनतं भवेद् अभावाय।

५२.७९ बाह्यविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा॥

५२.८० मूलद्वारं नान्यैर् द्वारैर् अभिसन्दधीत रूप-ऋद्ध्या।

५२.८० घट-फल-पत्र-प्रमथा-आदिभिश् च तन्-मङ्गलैश् चिनुयात्॥

५२.८१ ऐशान्यादिषु कोणेषु संस्थिता बाह्यतो गृहस्यैताः।

५२.८१ चरकी विदारिनामा-अथ पूतना राक्षसी च-इति॥

५२.८२ पुरभवनग्रामाणां ये कोणास् तेषु निवसतां दोषाः।

५२.८२ श्वपचादयो -अन्त्यजात्यास् तेष्व् एव विवृद्धिम् आयान्ति॥

५२.८३ याम्यादिष्व् अशुभफला जातास् तरवः प्रदक्षिणेनैते।

५२.८३ उदगादिषु प्रशस्ताः प्लक्ष-वट-उदुम्बर-अश्वत्था[K.उदुम्बराश्वत्थाः]॥

५२.८४ आसन्नाः कण्ठकिनो रिपुभयदाः क्षीरिणो -अर्थनाशाय।

५२.८४ फलिनः प्रजाक्षयकरा दारूण्य् अपि वर्जयेद् एषाम्॥

५२.८५ छिन्द्याद् यदि न तरूंश् तान् तदन्तरे पूजितान् वपेद् अन्यत्[K.अन्यान्]।

५२.८५ पुन्नाग-अशोक-अरिष्ट-बकुल-पनसान् शमी-शालौ॥

५२.८६अ शस्तौषधिद्रुमलता मधुरा सुगन्धा

५२.८६ब् स्निग्धा समा न सुषिरा च मही नराणाम्।

५२.८६च् अप्यध्वनि श्रमविनोदम् उपागतानां

५२.८६द् धत्ते श्रियं किम् उत शाश्वतमन्दिरेषु॥

५२.८७ सचिवालये -अर्थनाशो धूर्तगृहे सुतवधः समीपस्थे।

५२.८७ उद्वेगो देवकुले चतुष्पदे[K.ऊ.चतुष्पथे] भवति चाकीर्तिः॥

५२.८८ चैत्ये भयं ग्रहकृतं वल्मीकश्वभ्रसङ्कुले विपदः।

५२.८८ गर्तायां तु पिपासा कूर्म-आकारे धनविनाशः॥

५२.८९ उदगादिप्लवम् इष्टं विप्रादीनां प्रदक्षिणेनैव।

५२.८९ विप्रः सर्वत्र वसेद् अनुवर्णम् अथ-इष्टम् अन्येषाम्॥

५२.९० गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्।

५२.९० यद्‌य्‌ ऊनम्‌ अनिष्टं तत्‌ समे समं धन्यम्‌ अधिकं यत्‌॥

५२.९१ श्वभ्रम्‌ अथ वा-अम्बुपूर्णं पदशतम्‌ इत्वा-आगतस्य यदि न-ऊनम्‌।

५२.९१ तद्‌ धन्यं यच्‌ च भवेत्‌ पलान्य्‌ अपाम्‌ आढकं चतुःषष्टिः॥

५२.९२ आमे वा मृत्पात्रे श्वभ्रस्थे दीपवर्तिर्‌ अभ्यधिकम्‌।

५२.९२ ज्वलति दिशि यस्य शस्ता सा भूमिस्‌ तस्य वर्णस्य॥

५२.९३ श्वभ्रोषितं न कुसुमं यस्य[K.यस्मिन्‌] प्रम्लायते -अनुवर्णसमम्‌।

५२.९३ तत्तस्य भवति शुभदं यस्य च यस्मिन्‌ मनो रमते॥

५२.९४ सित-रक्त-पीत-कृष्णा विप्रादीनां प्रशस्यते भूमिः।

५२.९४ गन्धश्‌ च भवति यस्यां[K.यस्या] घृतरुधिरान्नाद्यमद्यसमः॥

५२.९५ कुश-युक्ता शर-बहुला दूर्वा-काश-आवृता क्रेमेण मही।

५२.९५ *ह्य्‌ अनुवर्ण[K.अनुवर्णम्‌] वृद्धिकरी मधुर-कषाय-अम्ल-कटुका च॥

५२.९६ कृष्टां प्ररूढबीजां गो -अध्युषितां ब्राह्मणैः प्रशस्तां च।

५२.९६ गत्वा महीं गृहपतिः काले साम्वत्सरोद्दिष्टे॥

५२.९७ भक्ष्यैर्‌ नानाकारैर्‌ दध्य्‌-अक्षत-सुरभि-कुसुम-धूपैश्‌ च।

५२.९७ दैवतपूजां कृत्वा स्थपतीन्‌ अभ्यर्च्य विप्रांश्‌ च॥

५२.९८ विप्रः स्पृष्ट्वा शीर्ष वक्षश्‌ च क्षत्रियो विशाश्‌ च-ऊरू।

५२.९८ शूद्रः पादौ स्पृष्ट्वा कुर्याद्‌ रेखां गृहारम्भे॥

५२.९९ अङ्गुष्ठकेन कुर्यान्‌ मध्याङ्गुल्या -अथ वा प्रदेशिन्या।

५२.९९ कनकमणिरजतमुक्ताद्‌ अधिक-फल-कुसुम-अक्षतैश्‌ च शुभम्‌॥

५२.१०० शस्त्रेण शस्त्र-मृत्युर्‌ बन्धो लोहेन भस्मना-अग्निभयम्‌।

५२.१०० तस्कर-भयं तृणेन च काष्ठ-उल्लिखिता च राजभयम्‌॥

५२.१०१ वक्रा पादालिखिता शत्रुभयक्लेशदा विरूपा च।

५२.१०१ चर्माङ्गारास्थिकृता दन्तेन च भर्तुर्[K.कर्तुर्] अशिवाय॥

५२.१०२ वैरम् अपसव्यलिखिता प्रदक्षिणं सम्पदो विनिर्देश्याः।

५२.१०२ वाचः परुषा निष्ठीवितं क्षुतं चाशुभं कथितम्॥

५२.१०३ अर्धनिचितं कृतं वा प्रविशन् स्थपतिर् गृहे निमित्तानि।

५२.१०३ अवलोकयेद् गृहपतिः क्व संस्थितः स्पृशति किं चाङ्गम्॥

५२.१०४ रविदीप्ते यदि शकुनिस् तस्मिन् काले विरौति परुषरवम्[K.परुषरवः]।

५२.१०४ संस्पृष्टाङ्गसमानं तस्मिन् देशे -अस्थि निर्देश्यम्॥

५२.१०५ शकुन-समये -अथ्वा -अन्ये हस्त्य्-अश्व-श्वादयो -अनुवाशन्ते।

५२.१०५ तत्प्रभवम् अस्थि तस्मिंस् तदङ्गसम्भूतम् एव-इति॥

५२.१०६ सूत्रे प्रसार्यमाणे गर्दभ-रावो -अस्थिशल्यम् आचष्टे।

५२.१०६ श्व-शृगाल-लङ्घिते वा सूत्रे शल्यं विनिर्देश्यम्॥

५२.१०७ दिशि शान्तायां शकुनिर्[K.शकुनो] मधुरविरावी यदा तदा वाच्यः।

५२.१०७ अर्थस् तस्मिन् स्थाने गृहेश्वराधिष्ठिते -अङ्गे वा॥

५२.१०८ सूत्रच्छेदे मृत्युः कीले च-अवाङ्मुखे महगः[K.महान् रोगः]।

५२.१०८ गृहनाथस्थपतीनां स्मृति-लोपे मृत्युर् आदेश्यः॥

५२.१०९ स्कन्धाच् च्युते शिरोरुक् कुलोपसर्गो -अपवर्जिते कुम्भे।

५२.१०९ भग्ने -अपि च कर्मिवधश् च्युते कराद् गृहपतेर् मृत्युः॥

५२.११० दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमम्[K.प्रथमाम्]।

५२.११० शेषाः प्रदक्षिणेन स्तम्भाश् च-एवं समुत्थाप्य[K.समुत्थाप्याः]॥

५२.१११ छत्र-स्रग्-अम्बर-युतः कृत-धूप-विलेपनः समुत्थाप्यः।

५२.१११ स्तम्भस् तथ-एव कार्यो द्वार-उच्छ्रायः प्रयत्नेन॥

५२.११२ विहग-आदिभिर् अवलीनैर् आकम्पित-पतित-दुःस्थितैश् च तथा[K.फलम्]।

५२.११२ शक्रध्वज-*सदृशफलं तद् एव तस्मिन्[K.सदृशं तस्मिंश् च शुभं] विनिर्दिष्टम्॥

५२.११३ प्रागुत्तर-उन्नते धनसुतक्षयः सुतवधश् च दुर्गन्धे।

५२.११३ वक्रे बन्धुविनाशो न सन्ति गर्भाश् च दिन्-मूढे॥

५२.११४ इच्छेद् यदि गृह-वृद्धिं ततः समन्ताद् विवर्धयेत् तुल्यम्।

५२.११४ एक-उद्देशे दोषः प्राग् अथ वा -अप्य् उत्तरे कुर्यात्॥

५२.११५ प्राग् भवति मित्रवैरं मृत्युभयं दक्षिणेन यदि वृद्धिः।

५२.११५ अर्थविनाशः पश्चाद् उदग्-विवृद्धिर्[K.उदग्-विवृद्धौ] मनस्तापः॥

५२.११६ ऐशान्यां देवगृहं महानसं यदि च-अपि कार्यम् आग्नेय्याम्।

५२.११६ नैरृत्यां भाण्ड-उपस्करो -अर्थधान्यानि मारुत्याम्॥

५२.११७ प्राच्यादिस्थे सलिले सुतहानिः शिखि-भयं रिपुभयं च।

५२.११७ स्त्रीकलहः स्त्रीदौष्ट्यं नैःस्व्यं वित्तात्मज-विवृद्धिः॥

५२.११८ खग-निलय-भग्न-संशुष्क-दग्ध-देवालय-श्मशान-स्थान्।

५२.११८ क्षीरतरु-धव-विभीतक-निम्ब-अरणि-*वर्जितान् छिन्द्यात्[K.वर्जितांश् च्छिन्द्यात्]॥

५२.११९ रात्रौ कृतबलिपूजं प्रदक्षिणं छेदयेद् दिवा वृक्षम्।

५२.११९ धन्यम् उदक्प्राक्पततं न ग्राह्यो -अतो -अन्यथा पतितः॥

५२.१२० छेदो यद्य् अविकारी ततः शुभं दारु तद्-गृहौपयिकम्।

५२.१२० पीते तु मण्डले निर्दिशेत् तरोर् मध्यगां गोधाम्॥

५२.१२१ मञ्जिष्ठाभे भेको नीले सर्पस् तथा-अरुणे सरटः।

५२.१२१ मुद्गाभे -अश्मा कपिले तु मूषको -अम्भश् च खड्गाभे॥

५२.१२२ धान्य-गो-गुरु-हुताश-सुराणां न स्वपेद् उपरि नाप्य् अनुवंशम्।

५२.१२२ न-उत्तरापरशिरा न च नग्नो नैव चार्द्रचरणः श्रियम् इच्छन्॥

५२.१२३ भूरिपुष्प-विकरं[K.निकरं] सतोरणं तोयपूर्णकलश-उपशोभितम्।

५२.१२३ धूपगन्ध-बलिपूजितामरं ब्राह्मणध्वनियुतं विशेद् गृहम्॥

५३ दकार्गलाध्यायः

५३.०१ धर्म्यं यशस्यं च वदाम्य् अतो -अहं दकार्गलं[K.दगार्गलं] येन जल-उपलब्धिः।

५३.०१ पुंसां यथा-अङ्गेषु शिरास् तथ-एव क्षितावृ अपि प्रोन्नत-निम्न-संस्थाः॥

५३.०२ एकेन वर्णेन रसेन च-अम्भश् च्युतं नभस्तो वसुधा-विशेषात्।

५३.०२ नानारसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षिति-तुल्यम् एव॥

५३.०३ पुरुहूत-अनल-यम-निरृति-वरुण-पवन-इन्दु-शङ्करा देवाः।

५३.०३ विज्ञातव्याः क्रमशः प्राच्य-आद्यानां दिशां पतयः॥

५३.०४ दिक्पतिसंज्ञा च शिरा नवमी मध्ये महाशिरानाम्नी।

५३.०४ एताभ्यो -अन्याः शतशो विनिःसृता नामभिः प्रथिताः॥

५३.०५ पातालाद् *ऊर्ध्वशिरा शुभा[K.ऊर्ध्वशिराः शुभाश्] चतुर्दिक्षु संस्थिता याश् च।

५३.०५ कोणदिगुत्था न शुभाः शिरानिमित्तान्य् अतो वक्ष्ये॥

५३.०६ यदि वेतसो -अम्बुरहिते देशे हस्तैस् त्रिभिस् ततः पश्चात्।

५३.०६ सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र॥

५३.०७ चिह्नम् अपि च-अर्धपुरुषे मण्डूकः पाण्डुरो -अथ मृत् पीता।

५३.०७ पुटभेदकश् च तस्मिन् पाषाणो भवति तोयम् अधः॥

५३.०८ जम्ब्वाश् च-उदग् धस्तैस् त्रिभिः शिरा-अधो नरद्वये पूर्वा।

५३.०८ मृल्लोहगन्धिका पाण्डुरा च[K.अथ] पुरुषे -अत्र मण्डूकः॥

५३.०९ जम्बूवृक्षस्य प्राग् वल्मीको यदि भवेत् समीपस्थः।

५३.०९ तस्माद् दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु॥

५३.१० अर्धपुरुषे च मत्स्यः पारावत-सन्निभश् च पाषाणः।

५३.१० मृद् भवति च-अत्र नीला दीर्घं कालं च बहु तोयम्॥

५३.११ पश्चाद् उदुम्बरस्य त्रिभिर् एव करैर् नरद्वये सार्धे।

५३.११ पुरुषे सितो -अहिर् अश्म-अञ्जन-उपमो -अधः शिरा सुजला॥

५३.१२ उदग् अर्जुनस्य दृश्यो वल्मीको यदि ततो -अर्जुनाद् धस्तैः।

५३.१२ त्रिभिर् अम्बु भवति पुरुषैस् त्रिभिर् अर्ध-समन्वितैः पश्चात्॥

५३.१३ श्वेता गोधा-अर्धनरे पुरुषे मृद् धूसरा ततः कृष्णा।

५३.१३ पीता सिता ससिकता ततो जलं निर्दिशेद् अमितम्॥

५३.१४ वल्मीक-उपचितायां निर्गुण्ड्यां दक्षिणेन कथितकरैः।

५३.१४ पुरुषद्वये सपादे स्वादु जलं भवति च-अशोष्यम्॥

५३.१५ रोहित-मत्स्यो -अर्धनरे मृत् कपिला पाण्डुरा ततः परतः।

५३.१५ सिकता सशर्करा -अथ क्रमेण परतो भवत्य् अम्भः॥

५३.१६ पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात्।

५३.१६ पुरुषैस् त्रिभिर् आदेश्यं श्वेता गृहगोधिका-अर्धनरे॥

५३.१७ सपलाशा बदरी चेद् दिश्य् अपरस्यां ततो जलं भवति।

५३.१७ पुरुषत्रये सपादे पुरुषे -अत्र च दुण्डुभश्[K.दुण्डुभिश्] चिह्नम्॥

५३.१८ विल्व[K.बिल्व]-उदुम्बरयोगे विहाय हस्तत्रयं तु याम्येन।

५३.१८ पुरुषैस् त्रिभिर् अम्बु भवेत् कृष्णो -अर्धनरे च मण्डूकः॥

५३.१९ काकोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन्।

५३.१९ पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च॥

५३.२० आपाण्डुपीतिका मृद् गोरसवर्णश् च भवति पाषाणः।

५३.२० पुरुषार्धे कुमुदनिभो दृष्टिपथं मूषको याति॥

५३.२१ जलपरिहीने देशे वृक्षः कम्पिल्लको यदा दृश्यः।

५३.२१ प्राच्यां हस्तत्रितये वहति शिरा दक्षिणा प्रथमम्॥

५३.२२ मृन्-नीलोत्पल-वर्णा कापोता *दृश्यते ततस्[K.च-एव दृश्यते] तस्मिन्।

५३.२२ हस्ते *-अजगन्धको मत्स्यकः[K.-अजगन्धिमत्स्यो भवति] पयो -अल्पं च सक्षारम्॥

५३.२३ शोणाकतरोर् अपरोत्तरे शिरा द्वौ कराव् अतिक्रम्य।

५३.२३ कुमुदा नाम शिरा सा पुरुषत्रयवाहिनी भवति॥

५३.२४ आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि।

५३.२४ अध्यर्धे भवति[K.तस्य] शिरा पुरुषे ज्ञेया दिशि प्राच्याम्॥

५३.२५ तस्य-एव पश्चिमायां दिशि वल्मीको यदा भवेद् धस्ते।

५३.२५ तत्र-उदग् भवति शिरा चतुर्भिर् अर्धाधिकैः पुरुषैः॥

५३.२६ श्वेतो विश्वम्भरकः प्रथमे पुरुषे तु कुङ्कुमाभो -अश्मा।

५३.२६ अपरस्यां दिशि च शिरा नश्यति वर्षत्रये -अतीते॥

५३.२७ *सकुशः सित[K.सकुशासित] ऐशान्यां वल्मीको यत्र कोविदारस्य।

५३.२७ मध्ये तयोर् नरैर् अर्धपञ्चमैस् तोयम् अक्षोभ्यम्॥

५३.२८ प्रथमे पुरुषे भुजगः कमलोदरसन्निभो मही रक्ता।

५३.२८ कुरुविन्दः पाषाणश् चिह्नान्य् एतानि वाच्यानि॥

५३.२९ यदि भवति सप्तपर्णो वल्मीकवृतस् तदुत्तरे तोयम्।

५३.२९ वाच्यं पुरुषैः पञ्चभिर् अत्रापि भवन्ति चिह्नानि॥

५३.३० पुरुष-अर्धे मण्डूको हरितो हरिताल-सन्निभा भूश् च।

५३.३० पाषाणो -अभ्रनिकाशः सौम्या च शिरा शुभ-अम्बुवहा॥

५३.३१ सर्वेषां वृक्षाणाम् अधः स्थितो दर्दुरो यदा दृश्यः।

५३.३१ तस्माद् धस्ते तोयं चतुर्भिर् अर्ध-अधिकैः पुरुषैः॥

५३.३२ पुरुषे तु भवति नकुलो नीलो मृत् पीतिका ततः श्वेता।

५३.३२ दर्दुर-समान-रूपः पाषाणो दृश्यते च-अत्र॥

५३.३३ यद्य् अहिनिलयो दृश्यो दक्षिणतः संस्थितः करञ्जस्य।

५३.३३ हस्तद्वये तु याम्ये पुरुषत्रितये शिरा सार्धे॥

५३.३४ कच्छपकः पुरुष-अर्धे प्रथमं च-उद्भिद्यते शिरा पूर्वा।

५३.३४ उदग् अन्या स्वादुजला हरितो -अश्माधस् ततस् तोयम्॥

५३.३५ उत्तरतश् च मधूकाद् अहिनिलयः पश्चिमे तरोस् तोयम्।

५३.३५ परिहृत्य पञ्च हस्तान् अर्ध-अष्टम-पौरुषान्[K.पौरुषे] प्रथमम्॥

५३.३६ अहिराजः पुरुषे -अस्मिन् धूम्रा धात्री कुलुत्थ[K.कुलत्थ]वर्णो -अश्मा।

५३.३६ माहेन्द्री भवति शिरा वहति सफेनं सदा तोयम्॥

५३.३७ वल्मीकः स्निग्धो दक्षिणेन तिलकस्य सकुश-दूर्वश् चेत्।

५३.३७ पुरुषैः पञ्चभिर् अम्भो दिशि वारुण्यां शिरा पूर्वा॥

५३.३८ सर्प-आवासः पश्चाद् यदा कदम्बस्य दक्षिणेन जलम्।

५३.३८ परतो हस्तत्रितयात् षड्भिः पुरुषैस् तुरीय-ऊनैः॥

५३.३९ कौबेरी च-अत्र शिरा वहति जलं लोहगन्धि च-अक्षोभ्यम्।
५३.३९ कनक-निभो मण्डूको नरमात्रे मृत्तिका पीता॥

५३.४० वल्मीकसंवृतो यदि तालो वा भवति नालिकेरो वा।

५३.४० पश्चात् षड्भिर् हस्तैर् नरैश् चतुर्भिः शिरा याम्या॥

५३.४१ याम्येन कपित्थस्य-अहिसंश्रयश् चेद् उदग् जलं वाच्यम्।

५३.४१ सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पञ्च॥

५३.४२ कर्बुरको -अहिः पुरुषे कृष्णा मृत् पुटभिद् अपि च पाषाणः।

५३.४२ श्वेता मृत् पश्चिमतः शिरा ततश् च-उत्तरा भवति॥

५३.४३ अश्मन्तकस्य वामे बदरी वा दृश्यते -अहिनिलयो वा।

५३.४३ षड्भिर् उदक् तस्य करैः सार्धे पुरुषत्रये तोयम्।

५३.४४ कूर्मः प्रथमे पुरुषे पाषाणो धूसरः ससिकता मृत्।

५३.४४ आदौ *च शिरा[K.शिरा च] याम्या पूर्वोत्तरतो द्वितीया च॥

५३.४५ वामेन हरिद्रतरोर् वल्मीकश् *चेज् जलं भवति पूर्वे[K.चेत् ततो जलं]।

५३.४५ हस्तत्रितये *सत्र्यंशैः पुम्भिः[K.पुरुषैः सत्र्यंशैः] पञ्चभिर् भवति॥

५३.४६ नीलो भुजगः पुरुषे मृत् पीता मरकत-उपमश् च-अश्मा।

५३.४६ कृष्णा भूः प्रथमं वारुणी शिरा दक्षिणेन-अन्या॥

५३.४७ जलपरिहीने देशे दृश्यन्ते -अनूपजानि *चेन् निमितानि[K.चिह्नानि]।

५३.४७ वीरण-दूर्वा मृदवश् च यत्र तस्मिन् जलं पुरुषे॥

५३.४८ भार्ङ्गी त्रिवृता दन्ती सूकरपादी च लक्ष्मणा च-एव।

५३.४८ नवमालिका च हस्तद्वये -अम्बु याम्ये त्रिभिः पुरुषैः॥

५३.४९ स्निग्धाः प्रलम्ब-शाखा वामन-विकट[K.विट]द्रुमाः समीपजलाः।

५३.४९ सुषिरा जर्जर-पत्रा रूक्षाश् च जलेन सन्त्यक्ताः॥

५३.५० तिलक-आम्रातक-वरुणक-भल्लातक-विल्व[K.बिल्व]-तिन्दुक-अङ्कोलाः[K.अङ्कोल्लाः]।

५३.५० पिण्डार-शिरीष-अञ्जन-परूषका *वञ्जुलो -अतिबला[K.वञ्जुरातिबला]॥

५३.५१ एते यदि सुस्निग्धा वल्मीकैः परिवृतास् ततस् तोयम्।

५३.५१ हस्तैस् त्रिभिर् उत्तरतश् चतुर्भिर् अर्धेन च नरेण[K.नरस्य]॥

५३.५२ अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र।

५३.५२ तस्मिन् शिरा प्रदिष्टा वक्तव्यं वा धनं च-अस्मिन्॥

५३.५३ कण्टक्य् अकण्टकानां व्यत्यासे -अम्भस् त्रिभिः करैः पश्चात्।

५३.५३ खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात्॥

५३.५४ नदति मही गम्भीरं यस्मिंश् चरणाहता जलं तस्मिन्।

५३.५४ सार्धैस् त्रिभिर् मनुष्यैः कौबेरी तत्र च शिरा स्यात्॥

५३.५५ वृक्षस्य-एका शाखा यदि विनता भवति पाण्डुरा वा स्यात्।

५३.५५ विज्ञातव्यं शाखातले जलं त्रिपुरुषं खात्वा॥

५३.५६ फल-कुसुम-विकारो यस्य तस्य पूर्वे शिरा त्रिभिर् हस्तैः।

५३.५६ भवति पुरुषैश् चतुर्भिः पाषाणो -अधः क्षितिः पीता॥

५३.५७ यदि कण्टकारिका कण्टकैर् विना दृश्यते सितैः कुसुमैः।

५३.५७ तस्यास् तले -अम्बु वाच्यं त्रिभिर् नरैर् अर्धपुरुषे च॥

५३.५८ खर्जूरी द्विशिरस्का यत्र भवेज् जलविवर्जिते देशे।

५३.५८ तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषैर्[K.त्रिपुरुषे] वारि॥

५३.५९ यदि भवति कर्णिकारः सितकुसुमः स्यात् पलाशवृक्षो वा।

५३.५९ सव्येन तत्र हस्तद्वये -अम्बु पुरुषद्वये[K.पुरुषत्रये] भवति॥

५३.६० *यस्याम् ऊष्मा[K.ऊष्मा यस्याम्] धात्र्यां धूमो वा तत्र वारि नरयुगले[K.नरयुग्मे]।

५३.६० निर्देष्टव्या च शिरा महता तोय-प्रवाहेण॥

५३.६१ यस्मिन् क्षेत्रोद्देशे जातं सस्यं विनाशम् उपयाति।

५३.६१ स्निग्धम् अतिपाण्डुरं वा महाशिरा नरयुगे तत्र॥

५३.६२ मरुदेशे भवति शिरा यथा तथा-अतः परं प्रवक्ष्यामि।

५३.६२ ग्रीवा करभाणाम् इव भूतल-संस्थाः शिरा यान्ति॥

५३.६३ पूर्वोत्तरेण पीलोर् यदि वल्मीको जलं भवति पश्चात्।

५३.६३ उत्तरगमना च शिरा विज्ञेया पञ्चभिः पुरुषैः॥

५३.६४ चिह्नं दर्दुर आदौ *मृत् कपिला तत्परं[K.मृत्कपिलातः परं] भवेद् धरिता।

५३.६४ भवति च पुरुषे अधो -अश्मा तस्य तले *-अम्भो विनिर्देष्यम्[K.वारि निर्देच्यम्]॥

५३.६५ पीलोर् एव प्राच्यां वल्मीको -अतो -अर्धपञ्चमैर् हस्तैः।

५३.६५ दिशि याम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः॥

५३.६६ प्रथमे पुरुषे भुजगः सितासितो हस्तमात्रमूर्तिश् च।

५३.६६ दक्षिणतो वहति शिरा सक्षारं भूरि पानीयम्॥

५३.६७ उत्तरतश् च करीरस्य-अहिगृहं[K.करीराद् अहिनिलये] दक्षिणे जलं स्वादु।

५३.६७ दशभिः पुरुषैर् ज्ञेयम् पुर्षे पीतो -अत्र मण्डूकः॥

५३.६८ रोहीतकस्य पश्चाद् अहिवासश् चेत् त्रिभिः करैर् याम्ये।

५३.६८ द्वादश पुरुषान् खात्वा सक्षारा पश्चिमेन शिरा॥

५३.६९ इन्द्रतरोर् वल्मीकः प्राग् दृश्यः पश्चिमे शिरा हस्ते।

५३.६९ खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे॥

५३.७० यदि वा सुवर्ण-नाम्नस् तरोर् भवेद् वामतो भुजङ्ग-गृहम्।

५३.७० हस्त-द्वये तु याम्ये पञ्चदश-नर-अवसाने -अम्बु॥

५३.७१ क्षारं पयो -अत्र नकुलो -अर्ध-मानवे ताम्र-सन्निभश् च-अश्मा।

५३.७१ रक्ता च भवति वसुधा वहति शिरा दक्षिणा तत्र॥

५३.७२ बदरी-रोहित-वृक्षौ सम्पृक्तौ चेद् विनापि वल्मीकम्।

५३.७२ हस्त-त्रये -अम्बु पश्चात् षोडशभिर् मानवैर् भवति॥

५३.७३ सुरसं जलम् आदौ दक्षिणा शिरा वहति च-उत्तनेण-अन्या।

५३.७३ पिष्टनिभः पाषाणो मृत् श्वेता वृश्चिको -अर्ध-नरे॥

५३.७४ सकरीरा चेद् वदरी त्रिभिः करैः पश्चिमेन तत्र-अम्भः।

५३.७४ अष्टादशभिः पुरुषैर् ऐशानी बहु-जला च शिरा॥

५३.७५ पीलु-समेता बदरी हस्त-त्रय-सम्मिते दिशि प्राच्याम्॥

५३.७५ विंशत्या पुरुषाणाम् अशोष्यम् अम्भो -अत्र सक्षारम्॥

५३.७६ ककुभ-करीराव् एकत्र संयुतौ यत्र ककुभ-विल्वौ[K.बिल्बौ] वा।

५३.७६ हस्त-द्वये -अम्बु पश्चान् नरैर् भवेत् पञ्चविंशत्या॥

५३.७७ वल्मीक-मूर्धनि यदा दूर्वा च कुशाश् च पाण्डुराः सन्ति।

५३.७७ कूपो मध्ये देयो जलम् अत्र नर-एकविंशत्या॥

५३.७८ भूमिः कदम्बक[K.भूमी कदम्बक, Kऽस् त्र्. भूमीकदम्बक]-युता वल्मीके यत्र दृश्यते दूर्वा।

५३.७८ हस्त-द्वयेन[K.हस्तत्रयेन] याम्ये नरैर् जलं पञ्चविंशत्या॥

५३.७९ वल्मीक-त्रय-मध्ये रोहीतक-पादपो यदा भवति।

५३.७९ नाना-वृक्षैः सहितस् त्रिभिर् जलं तत्र वक्तव्यम्॥

५३.८० हस्त-चतुष्के मध्यात् षोडशभिश् च-अङ्गुलैर् उदग् वारि।

५३.८० चत्वारिंशत् पुरुषान् खात्वा *-अश्मा -अधः[K.अश्मातः] शिरा भवति॥

५३.८१ ग्रन्थि-प्रचुरा यस्मिन् शमी भवेद् उत्तरेण वल्मीकः।

५३.८१ पश्चात् पञ्च-कर-अन्ते शत-अर्ध-संख्यैर् नरैः सलिलम्॥

५३.८२ एकस्थाः पञ्च यदा वल्मीका मध्यमो भवेत्-श्वेतः।

५३.८२ तस्मिन् शिरा प्रदिष्टा नर-षष्ट्या पञ्च-वर्जितया॥

५३.८३ स-पलाशा यत्र शमी पश्चिमभागे -अम्बु मानवैः षष्ट्या।

५३.८३ अर्ध्-अनरे -अहिः प्रथमं सवालुका पीतमृत् परतः॥

५३.८४ वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद् यस्मिन्।

५३.८४ पूर्वेण हस्त-मात्रे सप्तत्या मानवैर् अम्बु॥

५३.८५ श्वेता कण्टक-बहुला यत्र शमी दक्षिणेन तत्र पयः।

५३.८५ नर-पञ्चक-संयुतया सप्तत्या-अहिर् नर-अर्धे च॥

५३.८६ मरुदेशे यच् चिह्नं न जाङ्गले तैर् जलं विनिर्देश्यम्।

५३.८६ जम्बू-वेतस-*पूर्वैर्[K.पूर्वे] ये पुरुषास् ते मरौ द्विगुणाः॥

५३.८७ जम्बूस् त्रिवृता मौर्वी[K.मूर्वा] शिशुमारी सारिवा शिवा श्यामा।

५३.८७ वीरुधयो वाराही ज्योतिष्मती *गरुडवेगा च[K.च गरुडवेगा]॥

५३.८८ सूकरिक-माषपर्णी-व्याघ्रपदाश् च-इति यद्य् अहेर् निलये।

५३.८८ वल्मीकाद् उत्तरतस् त्रिभिः करैस् त्रि-पुरुषे तोयम्॥

५३.८९ एतद् अनूपे वाच्यं जाङ्गल-भूमौ तु पञ्चभिः पुरुषैः।

५३.८९ एतैर् एव निमित्तैर् मरुदेशे सप्तभिः कथयेत्॥

५३.९० एकनिभा यत्र मही तृण-तरु-वल्मीक-गुल्म-परिहीना।

५३.९० तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र॥

५३.९१ यत्र स्निग्धा निम्ना सवालुका स-अनुनादिनी वा स्यात्।

५३.९१ तत्र अर्धपञ्चकैर्[K.अर्धपञ्चमैर्] वारि मानवैः पञ्चभिर् यदि वा॥

५३.९२ स्निग्ध-तरूणां याम्ये नरैश् चतुर्भिर् जलं प्रभूतं च।

५३.९२ तरु-गहने -अपि हि विकृतो यस् तस्मात् तद्वद् एव वदेत्॥

५३.९३ नमते यत्र धरित्री स-अर्धे पुरुषे -अम्बु जाङ्गल-अनूपे।

५३.९३ कीटा वा यत्र विना-आलयेन बहवो -अम्बु तत्र-अपि॥

५३.९४ उष्णा शीता च मही शीत-उष्ण-अम्भस् त्रिभिर् नरैः स-अर्धैः।

५३.९४ इन्द्रधनुर् मत्स्यो वा वल्मीको वा चतुर्-हस्तात्॥

५३.९५ वल्मीकानां पङ्क्त्यां यद्‌य् एको -अभ्युच्छ्रितः शिरा तद्‌-अधः।

५३.९५ शुष्यति न रोहते वा सस्यं यस्यां च तत्र-अम्भः॥

५३.९६ न्यग्रोध-पलाश-उदुम्बरैः समेतैस् त्रिभिर् जलं तद्‌-अधः।

५३.९६ वट-पिप्पल-समवाये तद्वद् वाच्यं शिरा च-उदक्॥

५३.९७ आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवेत्[K.भवति] कूपः।

५३.९७ नित्यं स करोति भयं दाहं च समानुषं प्रायः॥

५३.९८ नैरृत-कोणे बाल-क्षयं *च वनिता-भयं[K.वनिताभयं] च वायव्ये।

५३.९८ दिक्-त्रयम् एतत् त्यक्त्वा शेषासु शुभ-आवहाः कूपाः॥

५३.९९ सारस्वतेन मुनिना दकार्गलं[K.दगार्गलं] यत् क्तं तद् अवलोक्य।

५३.९९ आर्याभिः कृतम् एतद् वृत्तैर् अपि मानवं वक्ष्ये॥

५३.१००अ स्निग्धा यतः पादप-गुल्म-वल्ल्यो

५३.१००ब् निश्छिद्र-पत्राश् च ततः शिरा-अस्ति।

५३.१००च् पद्म-क्षुर-उशीर-कुलाः सगुण्ड्राः

५३.१००द् काशाः कुशा वा नलिका नलो वा॥

५३.१०१अ खर्जूर-जम्बू-अर्जुन-वेतसाः स्युः

५३.१०१ब् क्षीर-अन्विता वा द्रुम-गुल्म-वल्ल्यः।

५३.१०१च् छत्र-इभ-नागाः शतपत्र-नीपाः

५३.१०१द् स्युर् नक्तमालाश् च स-सिन्दुवाराः॥

५३.१०२अ विभीतको वा मदयन्तिका वा

५३.१०२ब् यत्र-अस्ति तस्मिन् पुरुष-त्रये -अम्भः।

५३.१०२च् स्यात् पर्वतस्य-उपरि पर्वतो -अन्यस्

५३.१०२द् तत्र-अपि मूले पुरुष-त्रये -अम्भः॥

५३.१०३अ या मौञ्जिकैः[K.मौञ्जकैः] काश-कुशैश् च युक्ता

५३.१०३ब् नीला च मृद् यत्र सशर्करा च।

५३.१०३च् तस्यां प्रभूतं सुरसं च तोयं

५३.१०३द् कृष्ण-अथ वा यत्र च रक्तमृद् वा॥

५३.१०४अ सशर्करा ताम्र-मही कषायं

५३.१०४ब् क्षारं धरित्री कपिला करोति।

५३.१०४च् आपाण्डुरायां लवणं प्रदिष्टं

५३.१०४द् मृष्टं[K.मिष्टम्] पयो नील-वसुन्धरायाम्॥

५३.१०५अ शाक-अश्वकर्ण-अर्जुन-विल्व[K.बिल्व]-सर्जाः

५३.१०५ब् श्रीपर्ण्य्-अरिष्टा-धव-शिंशपाश् च।

५३.१०५च् छिद्रैश् च पत्रैर्[K.पर्णैर्] द्रुम-गुल्म-वल्ल्यो

५३.१०५द् रूक्षाश् च दूरे -अम्बु निवेदयन्ति॥

५३.१०६अ सूर्य-अग्नि-भस्म-उष्ट्र-खर-अनुवर्णा

५३.१०६ब् या निर्जला सा वसुधा प्रदिष्टा।

५३.१०६च् रक्त-अङ्कुराः क्षीर-युताः करीरा

५३.१०६द् रक्ता धरा चेज् जलम् अश्मनो -अधः॥

५३.१०७अ वैदूर्य-मुद्ग[K.वैडूर्यमुङ्ग]-अम्बुद-मेचक-आभा

५३.१०७ब् पाक-उन्मुख-उदुम्बर-सन्निभा वा।

५३.१०७च् भङ्ग[K.भृङ्ग]-अञ्जन-आभा कपिला-अथ वा या

५३.१०७द् ज्ञेया शिला भूरि-समीप-तोया॥

५३.१०८अ पारावत[K.परावत]-क्षौद्र-घृत-उपमा या[K.वा]

५३.१०८ब् क्षौमस्य वस्त्रस्य च तुल्य-वर्णा।

५३.१०८च् या सोमवल्ल्याश् च समान-रूपा

५३.१०८द् साप्य् आशु तोयं कुरुते -अक्षयं च॥

५३.१०९अ ताम्रैः समेता पृषतैर् विचित्रैर्

५३.१०९ब् आपाण्डु-भस्म-उष्ट्र-खर-अनुरूपा।

५३.१०९च् भृङ्ग-उपम-अङ्गुष्ठिक-पुष्पिका वा

५३.१०९द् सूर्य-अग्नि-वर्णा च शिला वितोया॥

५३.११०अ चन्द्र-आतप-स्फटिक-मौक्तिक-हेम-रूपा

५३.११०ब् याश् च-इन्द्रनील-मणि-हिङ्गुलुक-अञ्जन-आभाः।

५३.११०च् सूर्य-उदय-अंशु-हरिताल-निभाश् च याः स्युस्

५३.११०द् ताः शोभना मुनिवचो -अत्र च वृत्तम् एतत्॥

५३.१११अ एता ह्य् अभेद्याश् च शिलाः शिवाश् च

५३.१११ब् यक्षैश् च नागैश् च सदा-अभिजुष्टाः।

५३.१११च् येषां च राष्ट्रेषु भवन्ति राज्ञां

५३.१११द् तेषाम् अवृष्टिर् न भवेत् कदा चित्॥

५३.११२अ भेदं यदा नैति शिला तदानीं

५३.११२ब् पलाश-काष्ठैः सह तिन्दुकानाम्।

५३.११२च् प्रज्वालयित्वा-अनलम् अग्निवर्णा

५३.११२द् सुधा-अम्बु-सिक्ता प्रविदारम् एति॥

५३.११३अ तोयं श्रितं[K.शृतम्] मोक्षक-भस्मना वा

५३.११३ब् यत् सप्तकृत्वः परिषेचनं तत्।

५३.११३च् कार्यं शर-क्षार-युतं शिलायाः

५३.११३द् प्रस्फोटनं वह्नि-वितापितायाः॥

५३.११४अ तक्र-काञ्जिक-सुराः सकुलत्था

५३.११४ब् योजितानि बदराणि च तस्मिन्।

५३.११४च् सप्तरात्रम् उषितान्य् अभितप्तां

५३.११४द् दारयन्ति हि शिलां परिषेकैः॥

५३.११५अ नैम्बं पत्रं त्वक् च नालं तिलानां

५३.११५ब् स-अपामार्गं तिन्दुकं स्याद् गुडूची।

५३.११५च् गोमूत्रेण स्रावितः क्षार एषां
५३.११५द् षट्-कृत्वो -अतस् तापितो भिद्यते -अश्मा॥

५३.११६अ आर्कं पयो हुडु-विषाण-मषी-समेतं

५३.११६ब् पारावत-आखु-शकृता च युतः प्रलेपः।

५३.११६च् टङ्कस्य तैल-मथितस्य ततो -अस्य पानं

५३.११६द् पश्चात्-शितस्य न शिलासु भवेद् विघातः॥

५३.११७अ क्षारे कदल्या मथितेन युक्ते[K.यक्ते]

५३.११७ब् दिन-उषिते पायितम् आयसं यत्।

५३.११७च् सम्यक् शितं[K.छितं] च-अश्मनि न-एति भङ्गं

५३.११७द् न च-अन्यलोहेष्व् अपि तस्य कौण्ठ्यम्॥

५३.११८अ पाली प्राग्-अपर-आयता-अम्बु सुचिरं धत्ते न याम्योत्तरा

५३.११८ब् कल्लोलैर् अवदारम् एति मरुता सा प्रायशः प्रेरितैः।

५३.११८च् तां चेद् इच्छति सार-दारुभिर् अपां सम्पातम् आवारयेत्

५३.११८द् पाषाण-आदिभिर् एव वा प्रतिचयं क्षुण्णं[K.क्षुन्नं] द्विप-अश्व-आदिभिः॥

५३.११९ ककुभ-वट-आम्र-प्लक्ष-कदम्बैः स-निचुल-जम्बू-वेतस-नीपैः।

५३.११९ कुरबक[K.कुरवक]-ताल-अशोक-मधूकैर् बकुल-विमिश्रैश् च-आवृत-तीराम्॥

५३.१२०अ द्वारं च नैर्वाहिकम् एकदेशे

५३.१२०ब् कार्यं शिला-सञ्चित-वारिमार्गम्।

५३.१२०च् कोश-स्थितं निर्विवरं कपाटं

५३.१२०द् कृत्वा ततः पांशुभिर् आवपेत् तम्॥

५३.१२१ अञ्जन-मुस्ता-उशीरैः स-राजकोशातक-आमलक-चूर्णैः।

५३.१२१ कतकफल-समायुक्तैर् योगः कूपे प्रदातव्यः॥

५३.१२२अ कलुषं कटुकं लवणं विरसं

५३.१२२ब् सलिलं यदि वा शुभगन्धि[U - अशुभगन्धि] भवेत्।

५३.१२२च् तद् अनेन भवत्य् अमलं सुरसं

५३.१२२द् सुसुगन्धि गुणैर् अपरैश् च युतम्॥

५३.१२३ हस्तो मघा-अनुराधा-पुष्य-धनिष्ठा-उत्तराणि रोहिण्यः।

५३.१२३ शतभिषग् इत्य् आरम्भे कूपानां शस्यते भगणः॥

५३.१२४ कृत्वा वरुणस्य बलिं वट-वेतस-कीलकं शिरा-स्थाने।

५३.१२४ कुसुमैर् गन्धैर् धूपैः सम्पूज्य निधापयेत् प्रथमम्॥

[K.५४.१२५ मेघोद्भवं प्रथमम् एव मया प्रदिष्टं ज्येष्ठाम् अतीत्य बलदेवमतादि दृष्ट्वा।

K.५४.१२५ भौमं दगार्गलम् इदं कथितं द्वितीयं सम्यग् वराहमिहिरेण मुनिप्रसादात्॥]

५४ वृक्षायुर्वेदाध्यायः

५४.०१ प्रान्त-च्छाया-विनिर्मुक्ता न मनोज्ञा जलाशयाः।

५४.०१ यस्माद् अतो जल-प्रान्तेष्व् आरामान् विनिवेशयेत्॥

५४.०२ मृद्वी भूः सर्ववृक्षाणां हिता तस्याम् तिलान् वपेत्।

५४.०२ पुष्पितांस् तांश् च मृद्नीयात्[K.गृह्णीयात्] कर्म-एतत् प्रथमं भुवः[K.भुवि]॥

५४.०३ अरिष्ट-अशोक-पुन्नाग-शिरीषाः सप्रियङ्गवः।

५४.०३ मङ्गल्याः पूर्वम् आरामे रोपणीया गृहेषु वा॥

५४.०४ पनस-अशोक-कदली-जम्बू-लकुच-दाडिमाः।

५४.०४ द्राक्षा-पालीवताश् च-एव बीजपूर-अतिमुक्तकाः॥

५४.०५ एते द्रुमाः काण्डरोप्या[K.काण्डारोप्या] गोमयेन प्रलेपिताः।

५४.०५ मूलोच्छेदे -अथ वा स्कन्धे रोपणीयाः *परं ततः[K.प्रयत्नतः]॥

५४.०६ अजातशाखान् शिशिरे जातशाखान् हिमागमे।

५४.०६ वर्षागमे च सुस्कन्धान् *यथादिक्स्थान् प्ररोपयेत्[K.यथादिक् प्रतिरोपयेत्]॥

५४.०७ घृत-उशीर-तिल-क्षौद्र-विडङ्ग-क्षीर-गोमयैः।

५४.०७ आमूल-स्कन्ध-लिप्तानां संक्रामण-विरोपणम्॥

५४.०८ शुचिर् भूत्वा तरोः पूजां कृत्वा स्नान-अनुलेपनैः।

५४.०८ रोपयेद् रोपितश् च-एव पत्रैस् तैर् एव जायते॥

५४.०९ सायं प्रातश् च घर्म-ऋतौ[K.घर्मान्ते] शीतकाले दिन-अन्तरे।

५४.०९ वर्षासु च भुवः शोषे सेक्तव्या रोपिता द्रुमाः॥

५४.१० जम्बू-वेतस-वानीर-कदम्ब-उदुम्बर-अर्जुनाः।

५४.१० बीजपूरक-मृद्वीका-लकुचाश् च सदाडिमाः॥

५४.११ वञ्जुलो नक्तमालश् च तिलकः पनसस् तथा।

५४.११ तिमिरो -अम्रातकश् च-इति[K.च-एव] षोडश-अनूपजाः स्मृताः॥

५४.१२ उत्तमं विंशतिर् हस्ता मध्यमं षोडशान्तरम्।

५४.१२ स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादश-अवरम्॥

५४.१३ अभ्यासजातास् तरवः सम्स्पृशन्तः परस्परम्।

५४.१३ मिश्रैर् मूलैश् च न फलं सम्यग् यच्छन्ति पीडिताः॥

५४.१४ शीत-वात-आतपै रोगो जायते पाण्डु-पत्रता।

५४.१४ अवृद्धिश् च प्रवालानां[U - प्रबालानाम्] शाखाशोषो रससुतिः॥

५४.१५ चिकित्सितम् अथ-एतेषां शस्त्रेण-आदौ विशोधनम्।

५४.१५ विडङ्ग-घृत-पङ्क-अक्तान् सेचयेत् क्षीरवारिणा॥

५४.१६ फल-नाशे कुलत्थैश् च माषैर् मुद्गैस् तिलैर् यवैः।

५४.१६ शृत-शीत-पयः-सेकः फल-पुष्प-समृद्धये[K.अभिवृद्धये]॥

५४.१७ अविका-अज-शकृच्-चूर्णस्य-आढके द्वे तिल-आढकम्।

५४.१७ सक्तु-प्रस्थो जल-द्रोणो गोमांस-तुलया सह॥

५४.१८ सप्त-रात्र-उषितैर् एतैः सेकः कार्यो वनस्पतेः।

५४.१८ वल्मी-गुल्म-लतानां च फल-पुष्पाय सर्वदा॥

५४.१९अ वासराणि दश दुग्ध-भावितं

५४.१९ब् बीजम् आज्य-युत-हस्त-योजितम्।

५४.१९च् गोमयेन बहुशो विरूक्षितं

५४.१९द् क्रौड-मार्ग-पिशितैश् च धूपितम्॥

५४.२० मांस[K.मत्स्य]-सूकर-वसा-समन्वितं रोपितं च परिकर्मित-अवनौ।

५४.२० क्षीर-संयुत-जल-अवसेचितं जायते कुसुम-युक्तम् एव तत्॥

५४.२१ तिन्तिडी-इत्य् अपि करोति वल्लरीं व्रीहि-माष-तिल-चूर्ण-सक्तुभिः।

५४.२१ पूतिमांस-सहितैश् च सेचिता धूपिता च सततं हरिद्रया॥

५४.२२अ कपित्थ-वल्ली-करणाय मूलान्य्

५४.२२ब् आस्फोत-धात्री-धव-वासिकानाम्।

५४.२२च् पलाशिनी वेतस-सूर्यबल्ली[K.ऊ.वल्ली]

५४.२२द् श्याम-अतिमुक्तैः सहित-अष्टमूली॥

५४.२३अ क्षीरे शृते च-अप्य् अनया सुशीते

५४.२३ब् ताला[K.नाला] शतं स्थाप्य कपित्थबीजम्।

५४.२३च् दिने दिने शोषितम् अर्कपादैर्

५४.२३द् मासं विधिस् त्व् एष ततो -अधिरोप्यम्॥

५४.२४अ हस्त-आयतं तद्द्विगुणं गभीरं

५४.२४ब् खात्वा-अवटं प्रोक्त-जल-अवपूर्णम्।

५४.२४च् शुष्कं प्रदग्धं मधु-सर्पिषा तत्

५४.२४द् प्रलेपयेद् भस्म-समन्वितन[K.ऊ.समन्वितेन]॥

५४.२५अ चूर्णीकृतैर् माष-तिलैर् यवैश् च

५४.२५ब् प्रपूरयेद् मृत्तिकया-अन्तरस्थैः।

५४.२५च् मत्स्यामिष-अम्भस्[K.अम्भः]-सहितं च हन्याद्

५४.२५द् यावद् घनत्वं समुपागतं तत्॥

५४.२६अ उप्तं च बीजं चतुर्-अङ्गुल-अधो

५४.२६ब् मत्स्य-अम्भसा मांस-जलैश् च सिक्तम्।

५४.२६च् वल्ली भवत्य् आशु शुभ-प्रवाला

५४.२६द् विस्मापनी मण्डपम् आवृणोति॥

५४.२७ शतशो -अङ्कोल[K.अङ्कोल्ल]-सम्भूत-फल-कल्केन भावितम्।

५४.२७ एतत् तैलेन वा बीजं श्लैष्मातक[K.ऊ.श्लेष्मातक]-फलेन वा॥

५४.२८ वापितं करक-उन्मिश्र-मृदि तत्क्षण-जन्मकम् ।

५४.२८ फल-भार-अन्विता शाखा भवति-इति किम् अद्भुतम्॥

५४.२९ श्लेष्मातकस्य बीजानि निष्कुली-कृत्य भावयेत् प्राज्ञः ।

५४.२९ अङ्कोल[K.अङ्कोल्ल]-विञ्जला-अब्भिश् छायायां सप्तकृत्व[K.सप्तकृत्व्]-एवम्॥

५४.३० माहिष-गोमय-घृष्टान्य् अस्य करीषे च तानि निक्षिप्य ।

५४.३० करका-जल-मृद्-योगे न्युप्तान्य् अह्ना फल-कराणि॥

५४.३१ ध्रुव-मृदु-मूल-विशाखा गुरुभं श्रवणस् तथा-अश्विनी हस्तः[K.हस्तं] ।

५४.३१ उक्तानि दिव्य-दृग्भिः पादप-संरोपणे भानि॥

५५ प्रासादलक्षणाध्यायः

५५.०१ कृत्वा प्रभूतं सलिलम् आरामान् विनिवेश्य च ।

५५.०१ देवता-आयतनं कुर्याद् यशो-धर्म-अभिवृद्धये॥

५५.०२ इष्टा-पूर्तेन लभ्यन्ते ये लोकास् तान् बुभूषता ।

५५.०२ देवानाम् आलयः कार्यो द्वयम् अपि अत्र दृश्यते॥

५५.०३ सलिल-उद्यान-युक्तेषु कृतेष्व् अकृतेषु च ।

५५.०३ स्थानेष्व् एतेषु सान्निध्यम् उपगच्छन्ति देवताः॥

५५.०४ सरःसु नलिनी-छत्र-निरस्त-रविरश्मिषु ।

५५.०४ हंस-अंस-आक्षिप्त-कह्लार-वीथी[K.वीची, Kऽस् त्र्. वीथी]-विमल-वारिषु॥

५५.०५ हंस-कारण्डव-क्रौञ्च-चक्रवाक-विराविषु ।

५५.०५ पर्यन्त-निचुल-च्छाया-विश्रान्त-जलचारिषु॥

५५.०६ क्रौञ्च-काञ्चीकलापाश् च कलहंस-कल-स्वराः[K.स्वनाः]।

५५.०६ नद्यस् तोय-अंशुका यत्र शफरी-कृत-मेखलाः॥

५५.०७ फुल्ल-तीर-द्रुम-उत्तंसाः सङ्गम-श्रोणि-मण्डलाः।

५५.०७ पुलिन-अभ्युन्नत-उरस्या हंस-वासाश्[K.हंसहासाश्] च निम्नगाः॥

५५.०८ वन-उपान्त-नदी-शैल-निर्झर-उपान्त-भूमिषु।

५५.०८ रमन्ते देवता नित्यं पुरेषु-उद्यानवत्सु च॥

५५.०९ भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि।

५५.०९ ता एव तेषां शस्यन्ते देवता-आयतनेष्व् अपि॥

५५.१० चतुःषष्टि-पदं कार्यं देवता-आयतनं सदा।

५५.१० द्वारं च मध्यमं तस्मिन्[K.तत्र] समदिक्स्थं प्रशस्यते॥

५५.११ यो विस्तारो भवेद् यस्य द्विगुणा तत्समुन्नतिः।

५५.११ उच्छ्रायाद् यस् तृतीयांशस् तेन तुल्या *कटिः स्मृता[K.कटिर् भवेत्]॥

५५.१२ विस्तार-अर्धं भवेद् गर्भो भित्तयो -अन्याः समन्ततः।

५५.१२ गर्भ-पादेन विस्तीर्णं द्वारं द्विगुणम् उच्छ्रितम्॥

५५.१३ उच्छ्रायात् पाद-विस्तीर्णा शाखा तद्वद् उदुम्बरः।

५५.१३ विस्तार-पाद-प्रतिमं बाहुल्यं शाखयोः स्मृतम्॥

५५.१४ त्रि-पञ्च-सप्त-नवभिः शाखाभिस् तत् प्रशस्यते।

५५.१४ अधः शाखा-चतुर्भागे प्रतीहारौ निवेशयेत्॥।

५५.१५ शेषं मङ्गल्य-विहगैः *श्रीवृक्षैः स्वस्तिकैर्[K.श्रीवृक्षस्वस्तिकैर्] घटैः।

५५.१५ मिथुनैः पत्र-वल्लीभिः प्रमथैश् च-उपशोभयेत्॥

५५.१६ द्वार-मान-अष्ट-भाग-ऊना प्रतिमा स्यात् सपिण्डिका।

५५.१६ द्वौ भागौ प्रतिमा तत्र तृतीयांशश् च पिण्डिका॥

५५.१७ मेरु-मन्दर-कैलास-विमानच्छन्द-नन्दनाः।

५५.१७ समुद्ग-पद्म-गरुड-नन्दिवर्धन-कुञ्जराः॥

५५.१८ गुहराजो वृषो हंसः सर्वतोभद्रको घटः।

५५.१८ सिंहो वृत्तश् चतुष्कोणः षोडश-अष्टाश्रयस् तथा॥

५५.१९ इत्य् एते विंशतिः प्रोक्ताः प्रासादाः संज्ञया मया।

५५.१९ यथोक्त-अनुक्रमेण-एव लक्षणानि वदाम्य् अतः॥

५५.२० तत्र षडश्रिर् मेरुर् द्वादश-भौमो विचित्र-कुहरश् च।

५५.२० द्वारैर् युतश् चतुर्भिर् द्वात्रिंशद्-धस्त-विस्तीर्णः॥

५५.२१ त्रिंशद्-धस्त-आयामो दश-भौमो मन्दरः शिखर-युक्तः।

५५.२१ कैलासो -अपि शिखरवान् अष्टाविंशो -अष्ट-भौमश् च॥

५५.२२ जाल-गवाक्षक-युक्तो विमानसंज्ञस् त्रि-सप्तक-आयामः।

५५.२२ नन्दन इति षड्-भौमो द्वात्रिंशः षोडश-अण्ड-युक्तः॥

५५.२३ वृत्तः समुद्ग-नामा पद्मः पद्म-आकृतिः शया अष्टौ[K.शयानाष्टौ]।

५५.२३ शृङ्गेण-एकेन भवेद् एक-एव च भूमिका तस्य॥

५५.२४ गरुड-आकृतिश् च गरुडो नन्दी-इति च षट्चतुष्क-विस्तीर्णः।

५५.२४ कार्यस् तु[K.च] सप्त-भौमो विभूषितो -अण्डैस् तु[K.च] विंशत्या॥

५५.२५ कुञ्जर इति गज-पृष्ठः षोडशहस्तः समन्ततो मूलात्।

५५.२५ गुहराजः षोडशकस् त्रि-चन्द्रशाला भवेद् वलभी॥

५५.२६ वृष एक-भूमि-शृङ्गो द्वादशहस्तः समन्ततो वृत्तः।

५५.२६ हंसो हंस-आकारो घटो -अष्टहस्तः कलश-रूपः॥

५५.२७ द्वारैर् युतश् चतुर्भिर् बहु-शिखरो भवति सर्वतोभद्रः।

५५.२७ बहु-रुचिर-चन्द्रशालः षड्विंशः पञ्च-भौमश् च॥

५५.२८ सिंहः सिंह-आक्रान्तो द्वादशकोणो -अष्टहस्त-विस्तीर्णः।

५५.२८ चत्वारो -अञ्जन-रूपाः पञ्च-अण्ड-युतस् तु चतुरस्रः[K.चतुरश्रः]॥

५५.२९ भूमिका-अङ्गुल-मानेन मयस्य-अष्टोत्तरं शतम्।

५५.२९ सार्धं हस्तत्रयं च-एव कथितं विश्वकर्मणा॥

५५.३० प्राहुः स्थपतयश् च-अत्र मतम् एकं विपश्चितः।

५५.३० कपोतपालि-संयुक्ता न्यूना गच्छन्ति तुल्यताम्॥

५५.३१अ प्रासादलक्षणम् इदम् कथितं समासाद्

५५.३१ब् गर्गेण यद् विरचितं तद् इह-अस्ति सर्वम्।

५५.३१च् मनु-आदिभिर् विरचितानि पृथूनि यानि

५५.३१द् तत्संस्पृशन्[K.तत्संस्मृतिं] प्रति मया-अत्र कृतो -अधिकारः॥

५६ वज्रलेपलक्षणाध्यायः

५६.०१ आमं तिन्दुकम् आमं कपित्थकं पुष्पम् अपि च शाल्मल्याः।

५६.०१ बीजानि शल्लकीनां धन्वन-वल्को वचा च-इति॥

५६.०२ एतैः सलिलद्रोणः क्काथयितव्यो -अष्टभागशेषश् च।

५६.०२ अवतार्यो -अस्य च कल्को द्रव्यैर् एतैः समनुयोज्यः॥

५६.०३ श्रीवासक-रस-गुग्गुलु-भल्लातक-कुन्दुरूक-सर्जरसैः।

५६.०३ अतसी-बिल्वैश् च युतः कल्को -अयं वज्रलेप-आख्यः॥
५६.०४ प्रासाद-हर्म्य-वलभी-लिङ्ग-प्रतिमासु कुड्य-कूपेषु।

५६.०४ सन्तप्तो दातव्यो वर्ष-सहस्रायुत-स्थायी॥

५६.०५ लाक्षा-कुन्दुरु-गुग्गुलु-गृहधूम-कपित्थ-बिल्व-मध्यानि।

५६.०५ नाग*फल-निम्ब[K.बलाफल]-तिन्दुक-मदन-फल-मधूक-मञ्जिष्ठाः॥

५६.०६ सर्जरस-रस-आमलकानि च-इति कल्कः कृतो द्वितीयो -अयम्।

५६.०६ वज्राख्यः प्रथमगुणैर् अयम् अपि तेष्व् एव कार्येषु॥

५६.०७ गो-महिष-अज-विषाणैः खररोम्णा महिषचर्म-गव्यैश् च।

५६.०७ निम्ब-कपित्थ-रसैः सह वज्रतलो[K.वज्रतरो] नाम कल्को -अन्यः॥

५६.०८ अष्टौ सीसक-भागाः कांसस्य द्वौ तु रीतिका-भागः।

५६.०८ मय-कथितो योगो -अयं विज्ञेयो वज्रसङ्घातः॥

५७ प्रतिमालक्षणाध्यायः।

५७.०१ जाल-अन्तरगे भानौ यद् अणुतरं दर्शनं रजो याति।

५७.०१ तद् विन्द्यात् परमाणुं प्रथमं तद्धि प्रमाणानाम्॥

५७.०२ परमाणु-रजो बालाग्र[K.वालाग्र]-लिक्ष-यूकं[K.यूका] यवो -अङ्गुलं च-इति।

५७.०२ अष्टगुणानि यथोत्तरम् अङ्गुलम् एकं भवति संख्या[K.मात्रा]॥

५७.०३ देवागार-द्वारस्य-अष्ट-अम्श-ऊनस्य यस् तृतीयो -अंशः।

५७.०३ तत्-पिण्डिका-प्रमाणं प्रतिमा तद्-द्विगुण-परिमाणा॥

५७.०४ स्वैर् अङ्गुल-प्रमाणैर् द्वादश वीस्तीर्णम्[U - विस्तीर्णम्] आयतं च मुखम्।

५७.०४ नग्नजिता तु चतुर्दश दैर्घ्येण द्राविडं कथितम्॥

५७.०५ नासा-ललाट-चिबुक-ग्रीवाश् चतुर-अङ्गुलास् तथा कर्णौ।

५७.०५ द्वे अङ्गुले च हनुनी[K.हनुके] चिबुकं च द्व्यङ्गुलं विततम्[K.विस्तृतम्]॥

५७.०६ अष्ट-अङ्गुलं ललाटं विस्ताराद् द्व्य्-अङ्गुलात् परे शङ्खौ।

५७.०६ चतुर्-अङ्गुलौ तु शङ्खौ कर्णौ तु द्व्य्-अङ्गुलौ[K.द्व्यङ्गुलं] पृथुलौ॥

५७.०७ कर्ण-उपान्तः कार्यो -अर्ध-पञ्चमे भ्रू-समेन सूत्रेण।

५७.०७ कर्ण-स्रोतः सुकुमारकम् च नेत्र[K.नयन]-प्रबन्ध-समम्॥

५७.०८ चतुर्-अङ्गुलं वसिष्ठः कथयति नेत्रान्त-कर्णयोर् विवरम्।

५७.०८ अधरो -अङ्गुल-प्रमाणस् तस्य-अर्धेन-उत्त्रोष्ठश् च॥

५७.०९ अर्ध-अङ्गुला तु गोच्छा वक्त्रं चतुर्-अङ्गुल-आयतं कार्यम्।

५७.०९ विपुलं तु स-अर्धम् अङ्गुलम् *अव्यात्तं त्र्य्-अङ्गुलं[K.अध्यात्तत्र्यङ्गुलं] व्यात्तम्॥

५७.१० द्व्य्-अङ्गुल-तुल्यौ नासापुटौ च नासा पुटा-अग्रतो ज्ञेया।

५७.१० स्याद् द्व्य्-अङ्गुलम् उच्छ्रायश् चतुर्-अङ्गुलम् अन्तरं च-अक्ष्णोः॥

५७.११ द्व्य्-अङ्गुल-मितो -अक्षि-कोशो द्वे नेत्रे तत्-त्रिभागिका तारा।

५७.११ दृक्-तारा पञ्च-अंशो नेत्र-विकाशो -अङ्गुलं भवति॥

५७.१२ पर्यन्तात् पर्यन्तं दश भ्रुवो -अर्ध-अङ्गुलं भ्रुवोर् लेखा।

५७.१२ भ्रू-मध्यं द्व्य्-अङ्गुलकं भूर्[U - भ्रूर्] धैर्घ्येण-अङ्गुल-चतुष्कम्॥

५७.१३ कार्या तु केश-रेखा भ्रू-बन्ध-सम-अङ्गुल-अर्ध-विस्तीर्णा।

५७.१३ नेत्र-अन्ते करवीरकम् उपन्यसेद् अङ्गुल-प्रमितम्॥

५७.१४ द्वात्रिंशत् परिणाहाच् चतुर्दश-आयामतो -अङ्गुलानि शिरः।

५७.१४ द्वादश तु चित्र-कर्मणि दृश्यन्ते विंशतिर् अदृश्याः॥

५७.१५ आस्यं स-केश-निचयं षोडश दैर्घ्येण नग्निजित्[U - नग्नजित्]-प्रोक्तम्।

५७.१५ ग्रीवा दश विस्तीर्णा परिणाहाद् विंशतिः स-एका॥

५७.१६ कण्ठाद् द्वादश हृदयं हृदयान् नाभी[K.नाभिश्] च तत्-प्रमाणेन।

५७.१६ नाभी-मध्याद् मेढ्र-अन्तरं च तत्-तुल्यम् एव-उक्तम्॥

५७.१७ ऊरू च-अङ्गुल-मानैश् चतुर्-युता विंशतिस् तथा जङ्घे।

५७.१७ जानुकपिच्छे चतुर्-अङ्गुले च पादौ च तत्-तुल्यौ॥

५७.१८ द्वादश-दीर्घौ षट् पृथुतया च पादौ त्रिक-आयत-अङ्गुष्ठौ।

५७.१८ पञ्च-अङ्गुल-परिणाहौ प्रदेशिनी त्र्य्-अङ्गुलं दीर्घा॥

५७.१९ अष्ट-अंश-अंश-ऊनाः शेष-अङ्गुल्यः[K.शेषाङ्गुलयः] क्रमेण कर्तव्याः।

५७.१९ स-चतुर्थ-भागम् अङ्गुलम् उत्सेधो -अङ्गुष्ठकस्य-उक्तः॥

५७.२० अङ्गुष्ठ-नखः कथितस् चतुर्थ-भाग-ऊनम् अङ्गुलं तज्ज्ञैः।

५७.२० शेष-नखानाम् अर्ध-अङ्गुलं क्रमात् किंचिद्-ऊनं वा॥

५७.२१ जङ्घ-अग्रे परिणाहश् चतुर्दश-उक्तस् तु विस्तरात्[K.विस्तरः] पञ्च।

५७.२१ मध्ये तु सप्त विपुला परिणाहात् त्रिगुणिताः सप्त॥

५७.२२ अष्टौ तु जानुमध्ये वैपुल्यं त्र्य्-अष्टकं तु परिणाहः।

५७.२२ विपुलौ चतुर्दश-ऊरू मध्ये द्विगुणश् च तत्-परिधिः॥

५७.२३ कटिर् अष्टादश विपुला चत्वारिंशच् चतुर्-युता परिधौ।

५७.२३ अङ्गुलम् एकं नाभी[K.नाभिर्] वेधेन तथा प्रमाणेन॥

५७.२४ चत्वारिंशद्-द्वि-युता नाभी-मध्येन मध्य-परिणाहः।

५७.२४ स्तनयोः षोडश च-अन्तरम् ऊर्ध्वं कक्ष्ये[K.कक्षे] षड्-अङ्गुलिके॥

५७.२५ *अष्टाव् अंसौ द्वादश बाहू कार्यौ[K.कार्याव् अष्टाव् अंसौ द्वादश बाहू] तथा प्रबाहू च।

५७.२५ बाहू षड्-विस्तीर्णौ[K.षड्विस्तिर्णौ] प्रतिबाहू त्व् अङ्गुल-चतुष्कम्॥

५७.२६ षोडश बाहू मूले परिणाहाद् द्वादश-अग्र-हस्ते च।

५७.२६ विस्तारेण करतलं षड्-अङ्गुलं सप्त दैर्घ्येण॥

५७.२७ पञ्च-अङ्गुलानि मध्या प्रदेशिनी मध्य-पर्व-दल-हीना।

५७.२७ अनया तुल्या च-अनामिका कनिष्ठा तु पर्व-ऊना॥

५७.२८ पर्व-द्वयम् अङ्गुष्ठः शेष-अङ्गुल्यस्[K.शेषाङ्गुलयस्] त्रिभिस् त्रिभिः कार्याः।

५७.२८ नख-परिमाणं कार्यं सर्वासाम् पर्वणो -अर्धेन॥

५७.२९ देश-अनुरूप-भूषण-वेषालङ्कार-मूर्तिभिः कार्या।

५७.२९ प्रतिमा लक्षण-युक्ता सन्निहिता वृद्धिदा भवति॥

५७.३० दशरथ-तनयो रामो बलिश् च वैरोचनिः शतं विंशम्।

५७.३० द्वादश-हान्या शेषाः प्रवर-सम-न्यून-परिमाणाः॥

५७.३१ कार्यो -अष्टभुजो भगवांश् चतुर्-भुजो द्विभुज एव वा विष्णुः।

५७.३१ श्रीवत्स-अङ्कित-वक्षाः कौस्तुभ-मणि-भूषित-उरस्कः॥

५७.३२ अतसी-कुसुम-श्यामः पीत-अम्बर-निवसनः प्रसन्न-मुखः।

५७.३२ कुण्डल-किरीट-धारी पीन-गल-उरःस्थल-अंस-भुजः॥

५७.३३ खड्ग-गदा-शर-पाणिर् दक्षिणतः शान्तिदश् चतुर्थ-करः।

५७.३३ वाम-करेषु च कार्मुक-खेटक-चक्राणि शङ्खश् च॥

५७.३४ अथ च चतुर्भुजम् इच्छति शान्तिद एको गदा-धरश् च-अन्यः।

५७.३४ दक्षिण-पार्श्वे त्व्[K.ह्य्] एवं वामे शङ्खश् च चक्रं च॥

५७.३५ द्विभुजस्य तु शान्ति-करो दक्षिण-हस्तो -अपरश् च शङ्ख-धरः।

५७.३५ एवं विष्णोः प्रतिमा कर्तव्या भूतिम् इच्छद्भिः॥

५७.३६ बलदेवो हल-पाणिर् मद-विभ्रम-लोचनश् च कर्तव्यः।

५७.३६ विभ्रत्[K.बिभ्रत्] कुण्डलम् एकं शङ्ख-इन्दु-मृणाल-गौर-तनुः[K.वपुः]॥

५७.३७ एकानंशा कार्या देवी बलदेव-कृष्णयोर् मध्ये।

५७.३७ कटि-संस्थित-वाम-करा सरोजम् इतरेण च-उद्वहती॥

५७.३८ कार्या चतुर्भुजा या वाम-कराभ्यां स-पुस्तकं कमलम्।

५७.३८ द्वाभ्यां दक्षिण-पार्श्वे वरम् अर्थिष्व् अक्ष-सूत्रं च॥

५७.३९ *वामो -अथ वा-अष्ट-भुजायाः[K.वामेष्व् अष्टभुजायाः] कमण्डलुश् चापम् अम्बुजं शास्त्रम्।

५७.३९ वर-शर-दर्पण-युक्ताः सव्य-भुजाः स-अक्ष-सूत्राश् च॥

५७.४० शाम्बश् च गदा-हस्तः प्रद्युम्नश् चाप-भृत् सुरूपश् च।

५७.४० अनयोः स्त्रियौ च कार्ये खेटक-निस्त्रिंश-धारिण्यौ॥

५७.४१ ब्रह्मा कमण्डलु-करश् चतुर्-मुखः पण्कज-आसन-स्थश् च।

५७.४१ स्कन्दः कुमार-रूपः शक्ति-धरो बर्हिकेतुश् च॥

५७.४२ शुक्ल-चतुर्-विषाणो द्विपो महेन्द्रस्य वज्र-पाणित्वम्।

५७.४२ तिर्यग् ललाट-संस्थं तृतीयम् अपि लोचनं चिह्नम्॥

५७.४३ शम्भोः शिरसि-इन्दुकला वृष-ध्वजो -अक्षि च तृतीयम् अपि च-ऊर्ध्वम्।

५७.४३ शूलं धनुः पिनाकं वाम-अर्धे वा गिरिसुता-अर्धम्॥

५७.४४ पद्म-अङ्कित-कर-चरणः प्रसन्न-मूर्तिः सुनीच-केशश् च।

५७.४४ पद्मासन-उपविष्टः पिता-इव जगतो भवति[K.भवेत्] बुद्धः॥

५७.४५ आ-जानु-लम्ब-बाहुः श्रीवत्स-अङ्कः प्रशान्त-मूर्तिश् च।

५७.४५ दिग्-वासास् तरुणो रूपवांश् च कार्यो -अर्हतां देवः॥

५७.४६ नासा-ललाट-जङ्घ-ऊरु-गण्ड-वक्षांसि च-उन्नतानि रवेः।

५७.४६ कुर्याद् उदीच्य-वेषं गूढं पादाद् उरो यावत्॥

५७.४७ बिभ्राणः स्व-कर-रुहे बाहुभ्यां[K.पाणिभ्यां] पङ्कजे मुकुट-धारी।

५७.४७ कुण्डल-भूषित-वदनः प्रलम्ब-हारो वियद्व[Kऽस् त्र्. वियङ्ग]-वृतः॥

५७.४८ कमल-उदर-द्युति-मुखः कञ्चुक-गुप्तः स्मित-प्रसन्न-मुखः।

५७.४८ रत्न-उज्ज्वल-प्रभा-मण्डलश् च कर्तुः शुभकरो -अर्कः॥

५७.४९ सौम्या तु हस्त-मात्रा वसुदा हस्त-द्वय-उच्छ्रिता प्रतिमा।

५७.४९ क्षेम-सुभिक्षाय भवेत् त्रि-चतुर्-हस्त-प्रमाणा या॥

५७.५० नृप-भयम् अत्यङ्गायां हीन-अङ्गायाम् अकल्यता कर्तुः।

५७.५० शात-उदर्यां क्षुद्-भयम् अर्थ-विनाशः कृश-अङ्गायाम्[K.कृशायां च]॥

५७.५१ मरणं तु स-क्षतायां शस्त्र-निपातेन निर्दिशेत् कर्तुः।

५७.५१ वाम-अवनता पत्नीं दक्षिण-विनता हिनस्त्य् आयुः॥

५७.५२ अन्धत्वम् ऊर्ध्व-दृष्ट्या करोति चिन्ताम् अधोमुखी दृष्टिः।

५७.५२ सर्व-प्रतिमास्व् एवं शुभ-अशुभं भास्कर-उक्त-समम्॥

५७.५३ लिङ्गस्य वृत्त-परिधिं दैर्घ्येण-आसूत्र्य तत् त्रिधा विभजेत्।

५७.५३ मूले तच् चतुरस्रं[K.चतुरश्रं] मध्ये त्व् अष्टाश्रिं वृत्तम् अतः॥

५७.५४ चतुरस्रम्[K.चतुरश्रम्] अवनि-खाते मध्यं कार्यं तु पिण्डिका-श्वभ्रे।

५७.५४ दृश्य-उच्छ्रायेण समा समन्ततः पिण्डिका[K.पिण्डका] श्वभ्रात्॥

५७.५५ कृश-दीर्घं देशघ्नं पार्श्व-विहीनं पुरस्य नाशय।

५७.५५ यस्य क्षतं भवेद् मस्तके विनाशाय तल्-लिङ्गम्॥

५७.५६ मातृ-गणः कर्तव्यः स्व-नाम-देव-अनुरूप-कृत-चिह्नः।

५७.५६ रेवन्तो -अश्व-आरूढो मृगया-क्रीडा-आदि-परिवारः॥

५७.५७ दण्डी यमो महिषगो हंस-आरूढश् च पाशभृद् वरुणः।

५७.५७ नर-वाहनः कुबेरो वाम-किरीटी बृहत्-कुक्षिः॥

[K.५८.५८ प्रमथाधिपो गजमुखः प्रलम्ब-जठरः कुठारधारी स्यात्।

K.५८.५८ एकविषाणो बिभ्रन् मूलककन्दं सुनीलदलकन्दम्॥]

५८ वनसम्प्रवेशाध्यायः

५८.०१ कर्तुर् अनुकूल-दिवसे दैवज्ञ-विशोधिते शुभ-निमित्ते।

५८.०१ मङ्गल-शकुनैः प्रास्थानिकैश् च वन-सम्प्रवेशः स्यात्॥

५८.०२ पितृवन-मार्ग-सुरालय-वल्मीक-उद्यान-तापसाश्रम-जाः।

५८.०२ चैत्य-सरित्सङ्गम-सम्भवाश् च घटतोय-सिक्ताश् च॥

५८.०३ कुब्ज-अनुजात-वल्ली-निपीडिता वज्र-मारुत-उपहताः।

५८.०३ स्वपतित-हस्ति-निपीडित-शुष्क-अग्नि-प्लुष्ट-मधुनिलयाः॥

५८.०४ तरवो वर्जयितव्याः शुभदाः स्युः स्निग्ध-पत्र-कुसुम-फलाः।

५८.०४ अभिमत-वृक्षं गत्वा कुर्यात् पूजां सबलि-पुष्पाम्॥

५८.०५ सुरदारु-चन्दन-शमी-मधूक-तरवः शुभा द्विजातीनाम्।

५८.०५ क्षत्रस्य-अरिष्ट-अश्वत्थ-खदिर-बिल्वा विवृद्धिकराः॥

५८.०६ वैश्यानां जीवक-खदिर-सिन्धुक-स्यन्दनाश्[K.स्पन्दनाश्] च शुभफलदाः।

५८.०६ तिन्दुक-केसर-सर्ज-अर्जुन-आम्र-शालाश् च शूद्राणाम्॥

५८.०७ लिङ्गं वा प्रतिमा वा द्रुमवत् स्थाप्या यथा दिशं यस्मात्।

५८.०७ तस्माच् चिह्नयितव्या दिशो द्रुमस्य-ऊर्ध्वम् अथ वा-अधः।

५८.०८ परमान्न-मोदक-ओदन-दधि-पलल-उल्लोपिका-आदिभिर् भक्ष्यैः।

५८.०८ मद्यैः कुसुमैर् धूपैर् गन्धैश् च तरुं समभ्यर्च्य॥

५८.०९ सुर-पितृ-पिशाच-राक्षस-भुजग-असुर-गण-विनायक-आद्यानाम्।

५८.०९ कृत्वा रात्रौ पूजां वृक्षं संस्पृश्य च ब्रूयात्॥

५८.१० अर्चार्थम् अमुकस्य त्वं देवस्य परिकल्पितः।

५८.१० नमस् ते वृक्ष पूजेयं विधिवत् सम्प्रगृह्यताम्॥

५८.११अ यानीह भूतानि वसन्ति तानि

५८.११ब् बलिं गृहीत्वा विधिवत् प्रयुक्तम् ।

५८.११च् अन्यत्र वासं परिकल्प्यन्तु

५८.११द् क्षमन्तु तान्य् अद्य नमो -अस्तु तेभ्यः ॥

५८.१२अ वृक्षं प्रभाते सलिलेन सिक्त्वा

५८.१२ब् पूर्वोत्तरस्यां दिशि सन्निकृत्य ।

५८.१२च् मध्वाज्य-दिग्धेन[K.लिप्तेन] कुठारकेण

५८.१२द् प्रदक्षिणं शेषम् अतो निहन्यात्[K.-अभिहन्यात्] ॥

५८.१३अ पूर्वेण पूर्वोत्तरतो -अथ वा-उदक्

५८.१३ब् पतेद् यदा वृद्धिकरस् तदा स्यात् ।

५८.१३च् आग्नेयकोणात् क्रमशो -अग्निदाह-

५८.१३द् रुग्राग[K.क्षुद्रोग]रोगास् तुरगक्षयश् च ॥

५८.१४अ यन् न-उक्तम् अस्मिन् वन-सम्प्रवेशे

५८.१४ब् निपात-विच्छेदन-वृक्षगर्भाः ।

५८.१४च् इन्द्रध्वजे वास्तुनि च प्रदिष्टाः

५८.१४द् पूर्वं मया ते -अत्र तथ-एव योज्याः ॥

५९ प्रतिमाप्रतिष्ठापनाध्यायः

५९.०१ दिशि याम्यायां[K.सौम्यायां] कुर्याद् अधिवासन-मण्डपं बुधः प्राग् वा ।

५९.०१ तोरण-चतुष्टय-युतं शस्त-द्रुम-पल्लव-च्छन्नम् ॥

५९.०२ पूर्वे भागे चित्राः स्रजः पताकाश् च मण्डपस्य-उक्ताः ।

५९.०२ आग्नेय्यां दिशि रक्ताः कृष्णाः स्युर् याम्य-नैरृत्योः[K.नैरृतयोः]॥

५९.०३ श्वेता दिश्य् अपरस्याम् वायव्यायां तु पाण्डुरा एव।

५९.०३ चित्राश् च-उत्तर-पार्श्वे पीताः पूर्वोत्तरे कार्याः[K.कोणे]॥

५९.०४ आयुः-श्री-बल-जयदा दारु-मयी मृण्-मयी[K.मृन्मयी] तथा प्रतिमा।

५९.०४ लोक-हिताय मणि-मयी सौवर्णी पुष्टिदा भवति॥

५९.०५ रजत-मयी कीर्ति-करी प्रजा-विवृद्धिं करोति ताम्र-मयी।

५९.०५ भू-लाभं तु महान्तं शैली प्रतिमा-अथ वा लिङ्गम्॥

५९.०६ शङ्कु-उपहता प्रतिमा प्रधान-पुरुषं कुलं च घातयति।

५९.०६ श्वभ्र-उपहता रोगान् उपद्रवांश् च क्षयम्[K.अक्षयान्] कुरुते॥

५९.०७ मण्डप-मध्ये स्थण्डिलम् उपलिप्य-आस्तीर्य सिकतया-अथ कुशैः।
५९.०७ भद्रासन-कृत-शीर्ष-उपधान-पादां न्यसेत् प्रतिमाम्॥

५९.०८ प्लक्ष-अश्वत्थ-उदुम्बर-शिरीष-वट-सम्भवैः कषाय-जलैः।

५९.०८ मङ्गल्य-संज्ञिताभिः सर्व-औषधिभिः कुश-आद्याभिः॥

५९.०९ द्विप-वृषभ-उद्धत[K.उद्धृत]-पर्वत-वल्मीक-सरित्-समागम-तटेषु।

५९.०९ पद्म-सरःसु च मृद्भिः स-पञ्चगव्यैश् च तीर्थ-जलैः॥

५९.१० पूर्व-शिरस्कां स्नातां सुवर्ण-रत्न-अम्बुभिश् च स-सुगन्धैः।

५९.१० नाना-तूर्य-निनादैः पुण्याहैर् वेद-निर्घोषैः॥

५९.११ ऐन्द्र्यां दिशि-इन्द्र-लिङ्गा मन्त्राः प्राग्दक्षिणे -अग्नि-लिङ्गाश् च।

५९.११ वक्तव्या[K.जप्तव्या] द्विज-मुख्यैः पूज्यास् ते दक्षिणाभिश् च॥

५९.१२ यो देवः संस्थाप्यस् तन्-मन्त्रैश् च-अनलं द्विजो जुहुयात्।

५९.१२ अग्नि-निमित्तानि मया प्रोक्तानि-इन्द्र-ध्वज-उत्थाने[K.उच्छ्राये]॥

५९.१३ धूम-आकुलो -अपसव्यो मुहुर् मुहुर् विफुलिङ्ग-कृन् न शुभः।

५९.१३ होतुः स्मृति-लोपो वा प्रसर्पणं च-अशुभं प्रोक्तम्॥

५९.१४ स्नाताम् अभुक्त-वस्त्रां स्व्-अलङ्कृतां पूजिताम् कुसुम-गन्धैः।

५९.१४ प्रतिमां स्व्-आस्तीर्णायाम् शय्यायाम् स्थापकः कुर्यात्॥

५९.१५ सुप्तां *स-गीत-नृत्यैर् जागरणैः[K.सुनृत्यगीतैर् जागरकैः] सम्यग् एवम् अधिवास्य।

५९.१५ दैवज्ञ-सम्प्रदिष्टे काले संस्थापनं कुर्यात्॥

५९.१६ अभ्यर्च्य कुसुम-वस्त्र-अनुलेपनैः शङ्ख-तूर्य-निर्घोषैः।

५९.१६ प्रादक्षिण्येन नयेद् आयतनस्य प्रयत्नेन॥

५९.१७ कृत्वा बलिं प्रभूतं सम्पूज्य ब्राह्मणांश् च सभ्यांश् च।

५९.१७ दत्त्वा हिरण्य-शकलं विनिक्षिपेत् पिण्डिका-श्वभ्रे।

५९.१८ स्थापक-दैवज्ञ-द्विज-सभ्य-स्थपतीन् विशेषतो -अभ्यर्च्य।

५९.१८ कल्याणानां भागी भवति-इह परत्र च स्वर्गी॥

५९.१९अ विष्णोर् भागवतान् मगांश् च सवितुः शम्भोः स-भस्म-द्विजान्

५९.१९ब् मातॄणाम् अपि मण्डल-क्रम-विदो[K.मातृमण्डलविदो] विप्रान् विदुर् ब्रह्मणः।

५९.१९च् शाक्यान् सर्व-हितस्य शान्त-मनसो नग्रान् जिनानां विदुर्

५९.१९द् ये यं देवम् उपाश्रिताः स्व-विधिना तैस् तस्य कार्या क्रिया॥

५९.२० उदगयने सितपक्षे शिशिर-गभस्तौ च जीव-वर्ग-स्थे।

५९.२० लग्ने स्थिरे स्थिर-अंशे सौम्यैर् धी-धर्म-केन्द्र-गतैः॥

५९.२१ पापैर् उपचय-संस्थैर् ध्रुव-मृदु-हरि-तिष्य-वायु-देवेषु।

५९.२१ विकुजे दिने -अनुकूले देवानां स्थापनं शस्तम्॥

५९.२२ सामान्यम् इदं समासतो लोकानां हितदं मया कृतम्।

५९.२२ अधिवासन-सन्निवेशने सावित्रे पृथग् एव विस्तरात्॥

६० गोलक्षणाध्यायः

६०.०१अ पराशरः प्राह बृहद्रथाय

६०.०१ब् गो-लक्षणं यत् क्रियते ततो -अयम्।

६०.०१च् मया समासः शुभ-लक्षणास् ताः

६०.०१द् सर्वास् तथा -अप्य् आगमतो -अभिधास्ये॥

६०.०२ सास्र-आविल-रूक्ष-अक्ष्यो मूषक-नयनाश् न शुभदा गावः।

६०.०२ प्रचलच्-चिपिट-विषाणाः करटाः खर-सदृश-वर्णाश्[K.वर्नाः] च॥

६०.०३ दश-सप्त-चतुर्-दन्त्यः प्रलम्ब-मुण्ड-आनना विनत-पृष्ठ्यः[K.पृष्ठाः ऊ.पृष्ठः]।

६०.०३ ह्रस्व-स्थूल-ग्रीवा यव-मध्या दारित-खुराश् च॥

६०.०४ श्याव-अतिदीर्घ-जिह्वा गुल्फैर् अतितनुभिर् अतिबृहद्भिर् वा।

६०.०४ अतिककुदाः कृश-देहा न-इष्टा हीन-अधिक-अङ्ग्यश् च॥

६०.०५ वृषभो -अप्य् एवं स्थूल-अतिलम्ब-वृषणः शिरा-तत-क्रोडः।

६०.०५ स्थूल-शिरा-चित-गण्डस् त्रिस्थानं मेहते यश् च॥

६०.०६ मार्जार-अक्षः कपिलः करटो वा न शुभदो द्विजस्य-एव[K.द्विजस्येष्टः]।

६०.०६ कृष्ण-ओष्ठ-तालु-जिह्वः श्वसनो यूथस्य घातकरः॥

६०.०७ स्थूल-शकृन्-मणि-शृङ्गः सित-उदरः कृष्ण-सार-वर्णश् च।

६०.०७ गृहजातो -अपि त्याज्यो यूथ-विनाश-आवहो वृषभः॥

६०.०८ श्यामक-पुष्प-चित-अङ्गो भस्म-अरुण-सन्निभो बिडाल-अक्षः।

६०.०८ विप्राणाम् अपि न शुभं करोति वृषभः परिगृहीतः॥

६०.०९ ये च-उद्धरन्ति पादान् पङ्कात् इव योजिताः कृश-ग्रीवाः।

६०.०९ कातर-नयना हीनाश् च पृष्ठतस् ते न भारसहाः॥

६०.१० मृदु-संहत-ताम्र-ओष्ठास् तनु-स्फिजस् ताम्र-तालु-जिह्वाश् च।

६०.१० ह्रस्व-तनु[K.तनुह्रस्वो]-उच्च-श्रवणाः सुकुक्षयः स्पृष्ट[K.स्पष्ट]-जङ्घाश् च॥

६०.११ आताम्र-संहत-खुरा व्यूढ-उरस्का बृहत्-ककुद-युक्ताः।

६०.११ स्निग्ध-श्लक्ष्ण-तनु-त्वग्-रोमाणस् ताम्र-तनु-शृङ्गाः॥

६०.१२ तनु-भू-स्पृग्-वालधयो रक्त-अन्त-विलोचना महोच्छ्वासाः।

६०.१२ सिंह-स्कन्धास् तन्व्-अल्प-कम्बलाः पूजिताः सुगमाः[K.ऊ.सुगताः]॥

६०.१३ वाम-आवर्तैर् वामे दक्षिण-पार्श्वे च दक्षिण-आवर्तैः।

६०.१३ शुभदा भवन्त्य् अनडुहो जङ्घाभिश् च-एणक-निभाभिः॥

६०.१४ वैदूर्य[K.वैडूर्य]-मल्लिका-बुद्बुद-ईक्षणाः स्थूल-नेत्र-पक्ष्माणः[K.वर्माणः]।

६०.१४ पार्ष्णिभिर् अस्फुटित-आभिः शस्ताः सर्वे च[K.अपि] भारसहाः॥

६०.१५ घ्राणोद्देशे सवलिर् मार्जार-मुखः सितश् च दक्षिणतः।

६०.१५ कमल-उत्पल-लाक्षा-आभः सुवालधिर् वाजि-तुल्य-जवः॥

६०.१६ लम्बैर् वृषणैर् मेष-उदरश् च संक्षिप्त-वंक्षण[K.क्षणा]-क्रोडः।

६०.१६ ज्ञेयो भार-अध्व-सहो जवे -अश्व-तुल्यश् च शस्तफलः॥

६०.१७ सितवर्णः पिङ्ग-अक्षस् ताम्र-विषाण-ईक्षणो महावक्त्रः।

६०.१७ हंसो नाम शुभफलो यूथस्य विवर्धनः प्रोक्तः॥

६०.१८ भूस्पृग्वालधिर् आताम्र-विषाणो[K.वङ्कणो] रक्तदृक् ककुद्मांश्[K.ककुद्मी] च।

६०.१८ कल्माषश् च स्वामिनम् अचिरात् कुरुते पतिं लक्ष्म्याः॥

६०.१९ यो वा सितैकचरणैर्[K.सितैकचरणो] यथेष्टवर्णश् च सो -अपि शुभफलकृत्[K.शस्तफलः]।

६०.१९ मिश्रफलो -अपि ग्राह्यो यदि न-एकान्तप्रशस्तो -अस्ति॥

६१ श्वलक्षणाध्यायः

६१.०१अ पादाः पञ्च-नखास् त्रयो -अग्र-चरणः षड्भिर् नखैर् दक्षिणस्

६१.०१ब् ताम्र-ओष्ठ-अग्रनसो मृगेश्वर-गतिर् जिघ्रन् भुवं याति च।

६१.०१च् लाङ्गूलं ससटं दृग्-ऋक्ष-सदृशी कर्णौ च लम्बौ मृदू

६१.०१द् यस्य स्यात् स करोति पोष्टुर् अचिरात् पुष्टां श्रियं श्वा गृहे॥

६१.०२अ पादे पादे पञ्च पञ्च-अग्रपादे

६१.०२ब् वामे यस्याः षण्नखा मल्लिकाक्ष्याः।

६१.०२च् वक्रं पुच्छं पिङ्गला-लम्ब-कर्णा

६१.०२द् या सा राष्ट्रं कुक्कुरी पाति पुष्टा[K.पोष्टुः]॥

६२ कुक्कुटलक्षणाध्यायः

६२.०१ कुक्कुटस् त्व् ऋजु-तनूरुह-अङ्गुलिस् ताम्र-वक्त्र-नख-चूलिकः सितः।

६२.०१ रौति सुस्वरम् उषात्यये च यो वृद्धिदः स नृप-राष्ट्र-वाजिनाम्॥

६२.०२अ यवग्रीवो यो वा बदर-सदृशो वा-अपि विहगो

६२.०२ब् बृहन्-मूर्धा वर्णैर् भवति बहुभिश् च रुचिरः।

६२.०२च् स शस्तः संग्रामे मधु-मधुप-वर्णश् च जयकृद्

६२.०२द् न शस्तो यो -अतो -अन्यः कृश-तनु-रवः खञ्ज-चरणः॥

६२.०३ कुक्कुटी च मृदु-चारु-भाषिणी स्निग्ध-मूर्ति-रुचिर-आनन-ईषणा।

६२.०३ सा ददाति सुचिरं महीक्षितां श्री-यशो-विजय-वीर्यसम्पदः॥

६३ कूर्मलक्षणाध्यायः

६३.०१अ स्फुटिक-रजत-वर्णो नील-राजी-विचित्रः

६३.०१ब् कलश-सदृश-मूर्तिश् चारु-वंशश् च कूर्मः।

६३.०१च् अरुण-सम-वपुर् वा सर्षप-आकार-चित्रः

६३.०१द् सकल-नृप-महत्त्वं मन्दिरस्थः करोति॥

६३.०२ अञ्जन-भृङ्ग-श्याम-तनुर् वा बिन्दु-विचित्रो -अव्यङ्ग-शरीरः।

६३.०२ सर्प-शिरा वा स्थूलगलो यः सो -अपि नृपाणां राष्ट्र-विवृद्ध्यै॥

६३.०३अ वैडूर्य-त्विट् स्थूल-कण्ठस् त्रिकोणो

६३.०३ब् गूढ-च्छिद्रश् च-ऊरु[K.ऊ.चारु]-वंशश् च शस्तः।

६३.०३च् क्रीडावाप्यां तोयपूर्णे मणौ वा

६३.०३द् कार्यः कूर्मो मङ्गल-अर्थं नरेन्द्रैः॥

६४ छागलक्षणाध्यायः

६४.०१ छाग-शुभ-अशुभ-लक्षणम् अभिधास्ये नव-दश-अष्ट-दन्तास् ते।

६४.०१ धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्त-दन्ता ये॥

६४.०२ दक्षिण-पार्श्वे मण्डलम् असितं शुक्लस्य शुभफलं भवति।

६४.०२ ऋष्य-निभ-कृष्ण-लोहित-वर्णानां श्वेतम् अति[K.अपि]शुभदम्॥

६४.०३ स्तनवद् अवलम्बते यः कण्ठे -अजानां मणिः स विज्ञेयः।

६४.०३ एकमणिः शुभफल-कृद् धन्यतमा द्वि-त्र-मणयो[K.द्वित्रिमणयो] ये॥

६४.०४ मुण्डाः सर्वे शुभदाः सर्व-सिताः सर्व-कृष्ण-देहाश् च।

६४.०४ अर्ध-असिताः सित-अर्धा धन्याः कपिल-अर्ध-कृष्णाश् च॥

६४.०५ विचरति यूथस्य-अग्रे प्रथमं च-अम्भो -अवगाहते यो -अजः।

६४.०५ स शुभः सित-मूर्धा वा मूर्धनि वा कृत्तिका[K.टिक्किका] यस्य॥

६४.०६ स-पृषत-कण्ठ-शिरा वा तिल-पिष्ट-निभश् च ताम्रदृक् शस्तः।

६४.०६ कृष्ण-चरणः सितो वा कृष्णो वा श्वेत-चरणो यः॥

६४.०७ यः कृष्ण-अण्डः श्वेतो मध्ये कृष्णेन भवति पट्टेन।

६४.०७ यो वा चरति सशब्दं मन्दं च स शोभनश् छागः॥

६४.०८ ऋष्य-शिरोरुह-पादो यो वा प्राक् पाण्डुरो -अपरे नीलः।

६४.०८ स भवति शुभकृच् छागः श्लोकश् च-अप्य् अत्र गर्ग-उक्तः॥

६४.०९ कुट्टकः कुटिलश् च-एव जटिलो वामनस् तथा।

६४.०९ ते चत्वारः श्रियः पुत्रा न-अलक्ष्मीके वसन्ति ते॥

६४.१०अ अथ-अप्रशस्ताः खर-तुल्य-नादाः

६४.१०ब् प्रदीप्त-पुच्छाः कुनखा विवर्णाः।

६४.१०च् निकृत्त-कर्णा द्विप-मस्तकाश् च

६४.१०द् भवन्ति ये च-असित-तालु-जिह्वाः॥

६४.११अ वर्णैः प्रशस्तैर् मणिभिः प्रयुक्ता[K.च युक्ता]

६४.११ब् मुण्डाश् च ये ताम्र-विलोचनाश् च।

६४.११च् ते पूजिता वेश्मनि[K.वेश्मसु] मानवानां

६४.११द् सौख्यानि कुर्वन्ति यशः श्रियं च॥

६५ अश्वलक्षणाध्यायः

६५.०१अ दीर्घ-ग्रीवा-अक्षिकूटस् त्रिक-हृदय-पृथुस् ताम्र-तालु-ओष्ठ-जिह्वः

६५.०१ब् सूक्ष्म-त्वक्-केश-वालः सुशफ-गति-मुखो ह्रस्व-कर्ण-ओष्ठ-पुच्छः।

६५.०१च् जङ्घा-जानु-ऊरु-वृत्तः सम-सित-दशनश् चारु-संस्थान-रूपो

६५.०१द् वाजी सर्व-अङ्ग-शुद्धो भवति नरपतेः शतु-नाशाय नित्यम्॥

६५.०२ अशुपात-हनु-गण्ड-हृद्[K.हृड्]-गल-प्रोथ-शङ्ख-कटि-बस्ति-जानुनि।

६५.०२ मुष्क-नाभि-ककुदे तथा गुदे सव्य-कुक्षि-चरणे तथा[K.चरणेषु च] शुभाः[U - अशुभाः]॥

६५.०३अ ये प्रपाण-गल-कर्ण-संस्थिताः

६५.०३ब् पृष्ठ-मध्य-नयन-उपरि स्थिताः।

६५.०३च् ओष्ठ-सक्थि-भुज-कुक्षि-पार्श्वगास्

६५.०३द् ते ललाट-सहिताः सुशोभनाः॥

६५.०४ तेषां प्रपाण एको ललाट-केशेषु च ध्रुव-आवर्ताः।

६५.०४ रन्ध्र-उपरन्ध्र-मूर्धनि वक्षसि च-इति स्मृतौ द्वौ द्वौ॥

६५.०५अ षष्भिर् दन्तैः सित-आभैर् भवति हय-शिशुस् तैः कशायैर् द्विवर्षैः

६५.०५ब् सन्दंशैर् मध्यम-अन्त्यैः पति[K.ऊ.पतित]समुदितैस् त्र्यब्धि[K.त्र्यब्द]-पञ्च-अब्दिक-अश्वः।

६५.०५च् सन्दंश-अनुक्रमेण त्रिक-परिगणिताः कालिका पीत-शुक्लाः

६५.०५द् काचा मक्षीक[K.माक्षीक]-शङ्ख-अवट-चलनम् अतो दन्तपातं च विद्धि॥

६६ हस्तिलक्षणाध्यायः

६६.०१अ मध्व्-आभ-दन्ताः सुविभक्त-देहा

६६.०१ब् न च-*उपदिग्धा न[K.दिग्धाश् च] कृशाः क्षमाश् च।

६६.०१च् गात्रैः समैश् चाप-समान-वंशा

६६.०१द् वराह-तुल्यैर् जघनैश् च भद्राः॥

६६.०२अ वक्षो -अथ कक्षा-वलयः श्लथाश् च

६६.०२ब् लम्ब-उदरस् त्वग् बृहती गलश् च।

६६.०२च् स्थूला च कुक्षिः सह पेचकेन

६६.०२द् सैंही च दृग् मन्द-मतङ्गजस्य॥

६६.०३अ मृगास् तु ह्रस्व-अधर-वाल-मेढ्रास्

६६.०३ब् तन्व्-अङ्घ्रि[K.तन्वंहि]-कण्ठ-द्विज-हस्त-कर्णाः।

६६.०३च् स्थूल-ईक्षणाश् च-इति यथा-उक्त-चिह्नैः

६६.०३द् सङ्कीर्ण-नागा व्यतिमिश्र-चिह्नाः॥

६६.०४अ पञ्च-उन्नतिः सप्त मृगस्य दैर्घ्यम्

६६.०४ब् अष्टौ च हस्ताः परिणाह-मानम्।

६६.०४च् एक-द्वि-वृद्धाव् अथ मन्द-भद्रौ

६६.०४द् सङ्कीर्न-नागो -अनियत-प्रमाणः॥

६६.०५अ भद्रस्य वर्णो हरितो *मदश् च[K.मदस्य]

६६.०५ब् मन्दस्य हारिद्रक-सन्निकाशः।

६६.०५च् कृष्णो मदश् च-अभिहितो मृगस्य

६६.०५द् सङ्कीर्ण-नागस्य मदो विमिश्रः॥

६६.०६अ ताम्र-ओष्ठ-तालु-वदनाः कलविङ्क-नेत्राः

६६.०६ब् स्निग्ध-उन्नत-अग्र-दशनाः पृथुल-आयत-आस्याः।
६६.०६च् चाप-उन्नत-आयत-निगूढ-निमग्न-वंशास्

६६.०६द् तन्व्-एक-रोम-चित-कूर्म-समान-कुम्भाः॥

६६.०७अ विस्तीर्ण-कर्ण-हनु-नाभि-ललाट-गुह्याः

६६.०७ब् कूर्म-उन्नत-द्वि-नव-विंशतिभिर् नखैश् च।

६६.०७च् रेखा-त्रय-उपचित-वृत्त-कराः सुवाला

६६.०७द् धन्याः सुगन्धि-मद-पुष्कर-मारुताश् च॥

६६.०८ दीर्घ-अङ्गुलि-रक्त-पुष्कराः सजल-अम्भोद-निनाद-बृंहिणः।

६६.०८ बृहद्-आयत-वृत्त-कन्धरा धन्या भूमिपतेर् मतङ्गजाः॥

६६.०९अ निमर्द[K.ऊ.निर्मदा]-अभ्यधिक-हीन-नख-अङ्गान्

६६.०९ब् कुब्ज-वामनक-मेष-विषाणान्।

६६.०९च् दृश्य-कोश-फल-पुष्कर-हीनान्

६६.०९द् श्याव-नील-शबल-असित-तालून्॥

६६.१०अ स्वल्प-वक्त्र-रुह-मत्कुण-षण्ढान्

६६.१०ब् हस्तिनीं च गज-लक्षण-युक्ताम्।

६६.१०च् गर्भिणी च नृपतिः परदेशं

६६.१०द् प्रापयेद् अतिविरूप-फलास् ते॥

६७ पुरुषलक्षनाध्यायः

६७.०१अ उन्मान-मान-गति-संहति-सार-वर्ण-

६७.०१ब् स्नेह-स्वर-प्रकृति-सत्त्वम् अनूकं आदौ।

६७.०१च् क्षेत्रं मृजां च विधिवत् कुशलो -अवलोक्य

६७.०१द् सामुद्रविद् वदति यातम् अनागतं वा[K.च]॥

६७.०२अ अस्वेदनौ मृदुतलौ कमल-उदर-आभौ

६७.०२ब् श्लिष्ट-अङ्गुली रुचिर-ताम्र-नखौ सुपार्ष्णी।

६७.०२च् उष्णौ शिरा-विरहितौ सुनिगूढ-गुल्फौ

६७.०२द् कूर्म-उन्नतौ च चरणौ मनुजेश्वरस्य॥

६७.०३अ शूर्प-आकार-विरूक्ष-पाण्डुर-नखौ वक्रौ शिरा-सन्ततौ

६७.०३ब् संशुष्कौ विरल-अङ्गुली च चरणौ दारिद्र्य-दुःख-प्रदौ।

६७.०३च् मार्गाय-उत्कटकौ कषाय-सदृशौ वंशस्य विच्छेददौ[K.विच्छित्तिदौ]

६७.०३द् ब्रह्मघ्नौ परिपक्व-मृद्-द्युति-तलौ पीताव् *अगम्या-रतौ[K.अगम्यरतौ]॥

६७.०४अ प्रविरल-तनु-रोम-वृत्त-जङ्घा

६७.०४ब् द्विरद-कर-प्रतिमैर् वर-ऊरुभिश् च।

६७.०४च् उपचित-सम-जानवश् च भूपा

६७.०४द् धन-रहिताः श्व-शृगाल-तुल्य-जङ्घाः॥

६७.०५अ रोम-एक-एकं कूपके पार्थिवानां

६७.०५ब् द्वे द्वे ज्ञेये पण्डित-श्रोत्रियाणाम्।

६७.०५च् त्र्य्-आद्यैर् निःस्वा मानवा दुःख-भाजः

६७.०५द् केशाश् च-एवं निन्दिताः पूजिताश् च॥

६७.०६अ निर्मांस-जानुर् म्रियते प्रवासे

६७.०६ब् सौभाग्यम् अल्पैर् विकटैर् दरिद्राः।

६७.०६च् स्त्री-निर्जिताश् च-एव[K.च-अपि] भवन्ति निम्नै

६७.०६द् राज्यं समांसैश् च महद्भिर् आयुः॥

६७.०७अ लिङ्गे -अल्पे धनवान् अपत्य-रहितः स्थूले *-अपि हीनो[K.विहीनो] धनैर्

६७.०७ब् मेढ्रे वामनते सुत-अर्थ-रहितो वक्रे -अन्यथा पुत्रवान्।

६७.०७च् दारिद्र्यं विनते त्व् अधो -अल्प-तनयो लिङ्गे शिरा-सन्तते

६७.०७द् स्थूल-ग्रन्थि-युते सुखी मृदु करोत्य् अन्तं प्रमेह-आदिभिः॥

६७.०८ कोश-निगूढैर् भूपा दीर्घैर् भग्नैश् च वित्त-परिहीनाः।

६७.०८ ऋजु-वृत्त-शेफसो लघु-शिराल-शिश्नाश् च धनवन्तः॥

६७.०९ जल-मृत्युर् एक-वृषणो विषमैः स्त्री-चञ्चलः समैः क्षितिपः।

६७.०९ ह्रस्व-आयुश् च-उद्बद्धैः प्रलम्ब-वृषणस्य शतम् आयुः॥

६७.१० रक्तैर् आढ्या मणिभिर् निर्द्रव्याः पाण्डुरैश् च मलिनैश् च।

६७.१० सुखिनः स-शब्द-मूत्रा निःस्वा निःशब्द-धाराश् च॥

६७.११ द्वि-त्रि-चतुर्-धाराभिः प्रदक्षिण-आवर्त-वलित-मूत्राभिः।

६७.११ पृथिवी-पतयो ज्ञेया विकीर्ण-मूत्राश् च धन-हीनाः॥

६७.१२ एक-एव मूत्र-धारा वलिता *रूप-प्रदा न सुत-दात्री[K.रूपप्रधानसुतदात्री]।

६७.१२ स्निग्ध-उन्नत-सम-मणयो धन-वनिता-रत्न-भोक्तारः।

६७.१३ मणिभिश् च मध्य-निम्नैः कन्या-पितरो भवन्ति निःस्वाश् च।

६७.१३ बहु-पशु-भाजो मध्य-उन्नतैश् च न-अत्युल्बणैर् धनिनः॥

६७.१४ परिशुष्क-बस्ति-शीर्षैर् धन-रहिता दुर्भगाश् च विज्ञेयाः।

६७.१४ कुसुम-सम-गन्ध-शुक्रा विज्ञातव्या मही-पालाः॥

६७.१५ मधु-गन्धे बहुवित्ता मत्स्य-सगन्धे बहून्य् अपत्यानि।

६७.१५ तनु-शुक्रः स्त्री-जनको मांस-सगन्धो महाभोगी॥

६७.१६ मदिरा-गन्धे यज्वा क्षार-सगन्धे च रेतसि दरिद्रः।

६७.१६ शीघ्रं मैथुन-गामी दीर्घ-आयुर् अतो -अन्यथा-अल्पायुः॥

६७.१७ निःस्वो -अतिस्थूल-स्फिक् समांसल-स्फिक् सुख-अन्वितो भवति।

६७.१७ व्याघ्रान्तो -अध्यर्ध-स्फिग् मण्डूक-स्फिग् नर-अधिपतिः॥

६७.१८ सिंह-कटिर् मनुजेन्द्रः कपि-करभ-कटिर् धनैः परित्यक्तः।

६७.१८ सम-जठरा भोगयुता घट-पिठर-निभ-उदरा निःस्वाः॥

६७.१९ अविकल-पार्श्वा धनिनो निम्नैर् वक्रैश् च भोग-सन्त्यक्ताः।

६७.१९ सम-कुक्षा भोगाढ्या निम्नाभिर् भोग-परिहीनाः॥

६७.२० उन्नत-कुक्षाः क्षितिपाः कुटिलाः स्युर् मानवा विषम-कुक्षाः।

६७.२० सर्प-उदरा दरिद्रा भवन्ति बह्व्-आशिनश् च-एव॥

६७.२१ परिमण्डल-उन्नताभिर् विस्तीर्णाभिश् च नाभिभिः सुखिनः।

६७.२१ अल्पा[K.स्वल्पा] त्व् अदृश्य-निम्ना नाभिः क्लेश-आवहा भवति॥

६७.२२ वलि-मध्य-गता विषमा *शूलाद् बाधां[K.शूलाबाधं] करोति नैस्व्यं[K.नैःस्व्यं] च।

६७.२२ शाठ्यं वाम-आवर्ता करोति मेधां प्रदक्षिणतः॥

६७.२३ पार्श्व-आयता चिर-आयुषम् उपरिष्टाच् च-ईश्वरं गव-आढ्यम् अधः।

६७.२३ शतपत्र-कर्णिका-आभा नाभिर् मनुजेश्वरं कुरुते॥

६७.२४ शस्त्र-अन्तं स्त्री-भोगिनम् आचार्यं बहु-सुतं यथासंख्यम्।

६७.२४ एक-द्वि-त्रि-चतुर्भिर् वलिभिर् विन्द्याद् नृपं त्व् अवलिम्॥

६७.२५ विषम-वलयो मनुष्या भवन्त्य् अगम्या-अभिगामिनः पापाः।

६७.२५ ऋजु-वलयः सुख-भाजः परदार-द्वेषिणश् च-एव॥

६७.२६ मांसल-मृदुभिः पार्श्वैः प्रदक्षिण-आवर्त-रोमभिर् भूपाः।

६७.२६ विपरीतैर् निर्द्रव्याः सुख-परिहीनाः पर-प्रेष्याः॥

६७.२७ सुभगा भवन्त्य् अनुद्वद्ध[K.अनुबद्ध]-चूचुका निर्धना विषम-दीर्घैः।

६७.२७ पीन-उपचित-निमग्नैः क्षिति-पतयश् चूचुकैः सुखिनः॥

६७.२८ हृदयं समुन्नतं पृथु न वेपनं मांसलं च नृपतीनाम्।

६७.२८ अधनानां विपरीतं खर-रोम-चितं शिरालं च॥

६७.२९ सम-वक्षसो -अर्थवन्तः पीनैः *शूरा ह्य्[K.शूरास् त्व्] अकिञ्चनास् तनुभिः।

६७.२९ विषमं वक्षो येषां ते निःस्वाः शस्त्र-निधनाश् च॥

६७.३० विषमैर् विषमो जतुभिर् अर्थ-विहीनो -अस्थि-सन्धि-परिणद्धैः।

६७.३० उन्नत-जतुर् भोगी[K.भागी] निम्नैर् निःस्वो -अर्थवान् पीनैः॥

६७.३१ चिपिट-ग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा।

६७.३१ महिष-ग्रीवः शूरः शस्त्र-अन्तो वृष-सम-ग्रीवः॥

६७.३२ कम्बु-ग्रीवो राजा प्रलम्ब-कण्ठः प्रभक्षणो भवति।

६७.३२ पृष्ठम् अभग्नम् अरोमशम् अर्थवताम् अशुभदम् अतो -अन्यत्॥

६७.३३ अस्वेदन-पीन-उन्नत-सुगन्ध[K.सुगन्धि]-सम-रोम-सङ्कुलाः कक्षाः।

६७.३३ विज्ञातव्या धनिनाम् अतो -अन्यथा-अर्थैर् विहीनानाम्॥

६७.३४ निर्मांसौ रोमचितौ भग्नाव् अल्पौ च निर्धनस्य-अंसौ।

६७.३४ विपुलाव् अव्युच्छिन्नौ सुश्लिष्टौ सौख्य-वीर्यवताम्॥

६७.३५ करि-कर-सदृशौ वृत्ताव् आ-जान्व्-अवलम्बिनौ समौ पीनौ।

६७.३५ बाहू पृथिवी-ईशानाम् अधनानां[K.अधमानां] रोमशौ ह्रस्वौ॥

६७.३६ हस्त-अङ्गुलयो दीर्घाश् चिर-आयुषाम् अवलिताश् च सुभगानाम्।

६७.३६ मेधाविनाम् च सूक्ष्माश् चिपिटाः पर-कर्म-निरतानाम्॥

६७.३७ स्थूलाभिर् धन-रहिता बहिर्-नताभिश् च शस्त्र-निर्याणाः।

६७.३७ कपि-सदृश-करा धनिनो व्याघ्र-उपम-पाणयः पापाः॥

६७.३८ मणि-बन्धनैर् निगूढैर् दृढैश् च सु-श्लिष्ट-सन्धिभिर् भूपाः।

६७.३८ हीनैर् हस्त-च्छेदः श्लथैः सशब्दैश् च निर्द्रव्याः॥

६७.३९ पितृ-वित्तेन विहीना भवन्ति निम्नेन करतलेन नराः।

६७.३९ संवृत-निम्नैर् धनिनः प्रोत्तान-कराश् च दातारः॥

६७.४० विषमैर् विषमा निःस्वाश् च करतलैर् ईश्वराश्[K.ईश्वरास्] तु लाक्षाभैः।

६७.४० पीतैर् अगम्य-वनिता-अभिगामिनो निर्धना रूक्षैः॥

६७.४१ तुष-सदृश-नखाः क्लीबाश् चिपिटैः स्फुटितैश् च वित्त-सन्त्यक्ताः।

६७.४१ कु-नख-विवर्णैः पर-तर्कुकाश् च ताम्रैश् चमूपतयः॥

६७.४२ अङ्गुष्ठ-यवैर् आढ्याः सुतवन्तो -अङ्गुष्ठ-*मूलजैश् च यवैः[K.मूलगैश् च यवः]।

६७.४२ दीर्घ-अङ्गुलि-पर्वाणः सुभगा दीर्घ-आयुषश् च-एव॥

६७.४३ स्निग्धा निम्ना रेखा धनिनां तद्-व्यत्ययेन निःस्वानाम्।

६७.४३ विरल-अङ्गुलयो निःस्वा धन-सञ्चयिनो घन-अङ्गुलयः॥

६७.४४ तिस्रो रेखा मणि-बन्धन-उत्थिताः कर-तल-उपगा नृपतेः।

६७.४४ मीन-युग-अङ्कित-पाणिर् नित्यं सत्र-प्रदो भवति॥

६७.४५ वज्र-आकारा धनिनां विद्या-भाजां च मीन-पुच्छ-निभाः।

६७.४५ शङ्ख-आतपत्र-शिविका-गज-अश्व-पद्म-उपमा नृपतेः॥

६७.४६ कलश-मृणाल-पताका-अङ्कुश-उपमाभिर् भवन्ति निधिपालाः।

६७.४६ दाम-निभाभिश् च-आढ्याः स्वस्तिक-रूपाभिर् ऐश्वर्यम्॥

६७.४७ चक्र-असि-परशु-तोमर-शक्ति-धनुः-कुन्त-सन्निभा रेखाः।

६७.४७ कुर्वन्ति चमूनाथं यज्वानम् उलूखल-आकाराः॥

६७.४८ मकर-ध्वज-कोष्ठागार-सन्निभाभिर् महाधन-उपेताः।

६७.४८ वेदी-निभेन च-एव-अग्निहोत्रिणो ब्रह्मतीर्थेन॥

६७.४९ वापी-देवकुल-आद्यैर् धर्मं कुरुवन्ति च त्रि-कोणाभिः।

६७.४९ अङ्गुष्ठ-मूल-रेखाः पुत्राः स्युर् दारिकाः सूक्ष्माः॥

६७.५० रेखाः प्रदेशिनि-गताः[K.गाः] शतायुषं कल्पनीयम् ऊनाभिः।

६७.५० छिन्नाभिर् द्रुम-पतनं बहु-रेखा-अरेखिणो निःस्वाः॥

६७.५१ अतिकृश-दीर्घैश् चिबुकैर् निर्द्रव्या मांसलैर् धन-उपेताः।

६७.५१ विम्ब[K.बिम्ब]-उपमैर् अवक्रैर् अधरैर् भूपास् तनुभिर् अस्वाः॥

६७.५२ ओष्ठैः स्फुटित-विखण्डित-विवर्ण-रूक्षैश् च धन-परित्यक्ताः।

६७.५२ स्निग्धा घनाश् च दशनाः सुतीक्ष्ण-दंष्ट्राः समाश् च शुभाः॥

६७.५३ जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनो[K.भोगिनां] ज्ञेया।

६७.५३ श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु॥

६७.५४ वक्त्रं सौम्यं संवृतम् अमलं श्लक्ष्णं समं च भूपानाम्।

६७.५४ विपरीतं क्लेश-भुजां महामुखं दुर्भगाणां च॥

६७.५५ स्त्री-मुखम् अनपत्यानां शाठ्यवतां मण्डलं परिज्ञेयम्।

६७.५५ दीर्घं निर्द्रव्याणां भीरु-मुखाः पाप-कर्माणः॥

६७.५६ चतुरस्रं[K.चतुरश्रं] धूर्तानां निम्नं वक्रं[K.वक्त्रं] च तनय-रहितानाम्।

६७.५६ कृपणानाम् अतिह्रस्वं सम्पूर्णं भोगिनां कान्तम्॥

६७.५७ अस्फुटित-अग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतं च-एव।

६७.५७ रक्तैः परुषैश् चौराः श्मश्रुभिर् अल्पैश् च विज्ञेयाः॥

६७.५८ निर्मांसैः कर्णैः पाप-मृत्यवश् चर्पटैः सुबहुभोगाः।

६७.५८ कृपणाश् च ह्रस्व-कर्णाः शङ्कु-श्रवणाश् चमूपतयः[K.च भूपतयः]॥

६७.५९ रोमश-कर्णा दीर्घ-आयुषश् च[K.तु] धन-भागिनो विपुल-कर्णाः।

६७.५९ क्रूराः शिरा-अवनद्धैर् व्यालम्बैर् मांसलैः सुखिनः॥

६७.६० भोगी त्व् अनिम्न-गण्डो मन्त्री सम्पूर्ण-मांस-गण्डो यः।

६७.६० सुखभाक् शुक-सम-नासश् चिर-जीवी शुष्क-नासश् च॥

६७.६१ छिन्न-अनुरूपया-अगम्य-गामिनो दीर्घया तु सौभाग्यम्।

६७.६१ आकुञ्चितया चौरः स्त्री-मृत्युः स्याच् चिपिट-नासः॥

६७.६२ धनिनो -अग्र-वक्र-नासा दक्षिण-विनताः[K.वक्राः] प्रभक्षणाः क्रूराः।

६७.६२ ऋज्वी स्व्-अल्प-च्छिद्रा सुपुटा नासा सभाग्यानाम्॥

६७.६३ धनिनां क्षुतं सकृद् द्वि-त्रि-पिण्डितं ह्लादि स-अनुनादं च।

६७.६३ दीर्घ-आयुषां प्रमुक्तं विज्ञेयं संहतं च-एव॥

६७.६४ पद्म-दल-आभैर् धनिनो रक्त-अन्त-विलोचनाः[K.विलोचनाः] श्रियः भाजः।

६७.६४ मधु-पिङ्गलैर् महार्था मार्जार-विलोचनैः पापाः॥

६७.६५ हरिण-अक्षा मण्डल-लोचनाश् च जिह्मैश् च लोचनैश् चौराः।

६७.६५ क्रूराः केकर-नेत्रा गज-सदृश-*विलोचनाश् चमूपतयः[K.दृशश् च भूपतयः]॥

६७.६६ ऐश्वर्यम् गम्भीरैर् नीलोत्पल-कान्तिभिश् च विद्वांसः।

६७.६६ अतिकृष्ण-तारकाणाम् अक्ष्णाम् उत्पाटनं भवति॥

६७.६७ मन्त्रित्वं स्थूल-दृशां *श्याव-अक्षाणां [K.श्यावाक्षाणां च]-भवति सौभाग्यम्।

६७.६७ दीना दृग् निःस्वानां स्निग्धा विपुल-अर्थ-भोगवताम्॥

६७.६८ अभ्युन्नताभिर् अल्प-आयुषो विशाल-उन्नताभिर् अतिसुखिनः।

६७.६८ विषम-भ्रुवो दरिद्रा बालेन्दु-नत-भ्रुवः स-धनाः॥

६७.६९ दीर्घा-असंसक्ताभिर् धनिनः खण्डाभिर् अर्थ-परिहीनाः।

६७.६९ मध्य-विनत-भ्रुवो ये ते सक्ताः स्त्रीष्व् अगम्यासु॥

६७.७० उन्नत-विपुलैः शङ्खैर् धनिनो[K.धन्या] निम्नैः सुत-अर्थ-सन्त्यक्ताः।

६७.७० विषम-ललाटा विधना धनवन्तो -अर्धेन्दु-सदृशेन॥

६७.७१ शुक्ति-विशालैर् आचार्यता शिरा-सन्ततैर् अधर्म-रताः।

६७.७१ उन्नत-शिराभिर् आढ्याः स्वस्तिकवत् संस्थिताभिश् च॥

६७.७२ निम्न-ललाटा वध-बन्ध-भागिनः क्रूर-कर्म-निरताश् च।

६७.७२ अभ्युन्नतैश् चमूपाः[K.भूपाः] कृपणाः स्युः संवृत[K.सङ्कट]-ललाटाः॥

६७.७३ रुदितम् अदीनम् अनशु स्निग्धं च शुभ-आवहं मनुष्याणाम्।

६७.७३ रूक्षं दीनं प्रचुर-अशु च-एव न शुभ-प्रदं पुंसाम्॥

६७.७४ हसितं शुभदम् अकम्पं स-निमीलित-लोचनं तु पापस्य।

६७.७४ दुष्टस्य[K.ह्रष्टस्य] हसितम् असकृत् स-उन्मादस्य-असकृत् प्रान्ते॥

६७.७५ तिस्रो रेखाः शत-जीविनां ललाट-आयताः स्थिता यदि ताः।

६७.७५ चतसृभिर् अवनीशत्वं नवतिश् च-आयुः स-पञ्च-अब्दा॥

६७.७६ विच्छिन्नाभिश् च-अगम्य-गामिनो नवतिर् अप्य् अरेखेण।
६७.७६ केश-अन्त-उपगताभी रेखाभिर् अशीति-वर्ष-आयुः॥

६७.७७ पञ्चभिर् आयुः सप्ततिर् एक-अग्र-अवस्थिताभिर् अपि षष्टिः।

६७.७७ बहु-रेखेण शत-अर्धं चत्वारिंशच् च वक्राभिः॥

६७.७८ *भ्रू-लग्नाभिस् त्रिंशद्[K.त्रिम्शभ्रूलग्नाभिर्]-विंशतिकश् च-एव वाम-वक्राभिः।

६७.७८ क्षुद्राभिः स्व्-अल्प-आयुर् न्यूनाभिश् च-अन्तरे कल्प्यम्॥

६७.७९ परिमण्डलैर् गव-आढ्याश् छत्र-आकारैः शिरोभिर् अवनीशाः।

६७.७९ चिपिटैः पितृ-मातृ-घ्नाः करोटि-शिरसां चिरान् मृत्युः॥

६७.८० घट-मूर्धा-अध्वान-रुचिर् द्वि-मस्तकः पापकृद् धनैस् त्यक्तः।

६७.८० निम्नं तु शिरो महतां बहु-निम्नम् अन्-अर्थदं भवति॥

६७.८१ एक-एक-भवैः स्निग्धैः कृष्णैर् आकुञ्चितैर् अभिन्न-अग्रैः।

६७.८१ मृदुभिर् न च-अतिबहुभिः केशैः सुख-भाग् नरेन्द्रो वा॥

६७.८२ बहु-मूल-विषम-कपिलाः स्थूल-स्फुटित-अग्र-परुष-ह्रस्वाश् च।

६७.८२ अतिकुटिलाश् च-अतिघनाश् च मूर्धजा वित्त-हीनानाम्॥

६७.८३ यद् यद् गात्रं रूक्षं मांस-विहीनं शिर-अवनद्धं च।

६७.८३ तत् तद् अनिष्टं प्रोक्तं विपरीतम् अतः शुभं सर्वम्॥

६७.८४ त्रिषु विपुलो गम्भीरस् त्रिष्व् एव षड्-उन्नतश् चतुर्-ह्रस्वः।

६७.८४ सप्तसु रक्तो राजा पञ्चसु दीर्घश् च सूक्ष्मश् च॥

६७.८५अ नाभी[K.नाभिः] स्वरः सत्त्वम् इति प्रशस्तं[K.प्रदिष्टं]

६७.८५ब् गम्भीरम् एतत् त्रितयं नराणाम्।

६७.८५च् उरो ललाटं वदनं च पुंसां

६७.८५द् विस्तीर्णम् एतत् त्रितयं प्रशस्तम्॥

६७.८६अ वक्षो -अथ कक्षा नख-नासिका-आस्यं

६७.८६ब् कृकाटिका च-इति षड्-उन्नतानि।

६७.८६च् ह्रस्वानि चत्वारि च लिङ्ग-पृष्ठं

६७.८६द् ग्रीवा च जङ्घे च हित-प्रदानि॥

६७.८७अ नेत्रान्त-पाद-कर-ताल्व्-अधरोष्ठ-जिह्वा

६७.८७ब् रक्ता नखाश् च खलु सप्त सुख-आवहानि।

६७.८७च् सूक्ष्माणि पञ्च दशन-अङ्गुलि-पर्व-केशाः

६७.८७द् साकं त्वचा *कररुहा न च[K.कररुहाश् च न] दुःखितानाम्॥

६७.८८ हनु-लोचन-बाहु-नासिकाः स्तनयोर् अन्तरम् अत्र पञ्चमम्।

६७.८८ इति दीर्घम् इदं तु पञ्चकं न भवत्य् एव नृणाम् अभूभृताम्॥

६७.८९अ छाया शुभ-अशुभ-फलानि निवेदयन्ती

६७.८९ब् लक्ष्या मनुष्य-पशु-पक्षिषु लक्षणज्ञैः।

६७.८९च् तेजोगुणान् बहिर् अपि प्रविकाशयन्ती

६७.८९द् दीप-प्रभा स्फटिक-रत्न-घट-स्थिता-इव॥

६७.९०अ स्निग्ध-द्विज-त्वग्-नख-रोम-केशाश्[K.केश]

६७.९०ब् छाया सुगन्धा च मही-समुत्था।

६७.९०च् तुष्ट्य्-अर्थ-लाभ-अभ्युदयान् करोति

६७.९०द् धर्मस्य च-अहन्य् अहनि प्रवृत्तिम्॥

६७.९१अ स्निग्धा सित-अच्छ-हरिता नयन-अभिरामा

६७.९१ब् सौभाग्य-मार्दव-सुख-अभ्युदयान् करोति।

६७.९१च् सर्व-अर्थ-सिद्धि-जननी जननी-इव च-आप्या

६७.९१द् छाया फलं तनु-भृतां शुभम् आदधाति॥

६७.९२अ चण्डा-अधृष्या पद्म-हेम-अग्नि-वर्णा

६७.९२ब् युक्ता तेजो-विक्रमैः सप्रतापैः।

६७.९२च् आग्नेयि-इति प्राणिनां स्याज् जयाय

६७.९२द् क्षिप्रं सिद्धिं वाञ्छित-अर्थस्य दत्ते[K.धत्ते]॥

६७.९३अ मलिन-परुष-कृष्णा पाप-गन्धा-अनिल-उत्था

६७.९३ब् जनयति वध-बन्ध-व्याध्य्-अनर्थ-अर्थ-नाशान्।

६७.९३च् स्फटिक-सदृश-रूपा भाग्य-युक्ता-आत्युदारा

६७.९३द् निधिर् इव गगन-उत्था श्रेयसां स्व्-अच्छ-वर्णा॥

६७.९४अ छायाः क्रमेण कु-जल-अग्न्य्-अनिल-अम्बर-उत्थाः

६७.९४ब् के चिद् वदन्ति दश ताश् च यथा-अनुपूर्व्या।

६७.९४च् सूर्य-अब्जनाभ-पुरुहूत-यम-उडुपानां

६७.९४द् तुल्यास् तु लक्षण-फलैर् इति तत् समासः॥

६७.९५ करि-वृष-रथौघ-भेरी-मृदङ्ग-सिंह-अभ्र[K.अब्द]-निःस्वना भूपाः।

६७.९५ गर्दभ-जर्जर-रूक्ष-स्वराश् च धन-सौख्य-सन्त्यक्ताः॥

६७.९६ सप्त भवन्ति च सारा मेदो-मज्ञा-त्वग्-अस्थि-शुक्राणि।

६७.९६ रुधिरं मांसं च-इति प्राण-भृतां तत् समास-फलम्॥

६७.९७ ताल्व्-ओष्ठ-दन्तपाली-जिह्वा-नेत्रान्त-पायु-कर-चरणैः।

६७.९७ रक्ते[K.रक्तैः] तु रक्त-सारा बहु-सुख-वनिता-अर्थ-पुत्र-युताः॥

६७.९८ स्निग्ध-त्वक्का धनिनो मृदुभिः सुभगा विचक्षणास् तनुभिः।

६७.९८ मज्ञा-मेदः-साराः सुशरीराः पुत्र-वित्त-युताः[K.युक्ताः]॥

६७.९९ स्थूल-अस्थिर् अस्थि-सारो बलवान् विद्या-अन्तगः सुरूपश् च।

६७.९९ बहु-गुरु-शुक्राः सुभगा विद्वांसो रूपवन्तश् च॥

६७.१०० उपचित-देहो विद्वान् धनी सुरूपश् च मांस-सारो यः।

६७.१०० सङ्घाता इति च सुश्लिष्ट-सन्धिता सुख-भुजो ज्ञेया॥

६७.१०१ स्नेहः पञ्चसु लक्ष्यो वाग्-जिह्वा-दन्त-नेत्र-नख-संस्थः।

६७.१०१ सुत-धन-सौभाग्य-युताः स्निग्धैस् तैर् निर्धना रूक्षैः॥

६७.१०२ द्युतिमान् वर्ण-स्निग्धः[K.वर्णः स्निग्धः] क्षितिपानाम् मध्यमः सुत-अर्थवताम्।

६७.१०२ रूक्षो धन-हीनानां शुद्धः शुभदो न सङ्कीर्णः॥

६७.१०३ साध्यम् अनूकं वक्त्राद् गो-वृष-शार्दूल-सिंह-गरुड-मुखाः।

६७.१०३ अप्रतिहत-प्रतापा जित-रिपवो मानव-इन्द्राश् च॥

६७.१०४ वानर-महिष-वराह-अज-तुल्य-वदनाः शुत[K.सुत]-अर्थ-सुख-भाजः।

६७.१०४ गर्दभ-करभ-प्रतिमैर् मुखैः शरीरैश् च निःस्व-सुखाः॥

६७.१०५ अष्ट-शतं षण्-णवतिः[K.षणवतिः] परिमाणं चतुर्-अशीतिर् इति पुंसाम्।

६७.१०५ उत्तम-सम-हीनानाम् अङ्गुल-सङ्ख्या स्व-मानेन॥

६७.१०६ भार-अर्ध-तनुः सुख-भाक् तुलितो -अतो दुःख-भाग् भवत्य् ऊनः।

६७.१०६ भारो -अतिवाढ्यानाम् अध्यर्धः सर्व-धरणीशः॥

६७.१०७ विंशति-वर्षा नारी पुरुषः खलु पञ्च-विंशतिभिर् अब्दैः।

६७.१०७ अर्हति मान-उन्मानं जीवित-भागे चतुर्थे वा॥

६७.१०८ भू-जल-शिख्य्-अनिल-अम्बर-सुर-नर-रक्षः पिशाचक-तिरश्चाम्।

६७.१०८ सत्त्वेन भवति पुरुषो लक्षणम् एतद् भवति तेषाम्[K.एषाम्]॥

६७.१०९अ मही-स्वभावः शुभ-पुष्प-गन्धः

६७.१०९ब् सम्भोगवान् सु-श्वसनः स्थिरश् च।

६७.१०९च् तोय-स्वभावो बहु-तोयपायी

६७.१०९द् प्रिय-अभिभाषी[K.अभिलाषी] रस-भाजनश्[K.भोजनश्] च॥

६७.११०अ अग्नि-प्रकृत्या चपलो -अति-तीक्ष्णश्

६७.११०ब् चण्डः क्षुध-आलुर् बहु-भोजनश् च।

६७.११०च् वायोः स्वभावेन चलः कृशश् च

६७.११०द् क्षिप्रं च कोपस्य वशं प्रयाति॥

६७.१११अ ख-प्रकृतिर् निपुणो विवृत-आस्यः

६७.१११ब् शब्द-गतेः कुशलः सु-शिरा-अङ्गः।

६७.१११च् त्याग-युतः[K.त्यागयुतो] पुरुषो मृदु-कोपः

६७.१११द् स्नेह-रतश् च भवेत् सुर-सत्त्वः॥

६७.११२ मर्त्य-सत्त्व-संयुतो गीत-भूषण-प्रियः।

६७.११२ संविभाग-शीलवान् नित्यम् एव मानवः॥

६७.११३अ तीक्ष्ण-प्रकोपः खल-चेष्टितश् च

६७.११३ब् पापश् च सत्त्वेन निशा-चराणाम् ।

६७.११३च् पिशाच-सत्त्वश् चपलो मलाक्तो

६७.११३द् बहु-प्रलापी च समुल्बण-अङ्गः ॥

६७.११४अ भीरुः क्षुधा-आलुर् बहु-भुक् च यः स्याद्

६७.११४ब् ज्ञेयश् च[K.स] सत्त्वेन नरस् तिरश्चाम् ।

६७.११४च् एवं नराणां प्रकृतिः प्रदिष्टा

६७.११४द् यल् लक्षण-ज्ञाः प्रवदन्ति सत्त्वम् ॥

६७.११५अ शार्दूल-हंस-समद-द्विप-गोपतीनां

६७.११५ब् तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।

६७.११५च् येषां च शब्द-रहितं स्तिमितं च यातं

६७.११५द् ते -अपि-इश्वरा द्रुत-परिप्लुतगा दरिद्राः ॥

६७.११६अ श्रान्तस्य यानम् अशनं च बुभुक्षितस्य

६७.११६ब् पानं तृषा-परिगतस्य भयेषु रक्षा ।

६७.११६च् एतानि यस्य पुरुषस्य भवन्ति काले

६७.११६द् धन्यं वदन्ति खलु तं नर-लक्षणज्ञाः ॥

[K.६८.११७ पुरुष-लक्षणम् उक्तम् इदं मया मुनि-मतान्य् अवलोक्य समासतः ।

K.६८.११७ इदम् अधीत्य नरो नृप-सम्मतो भवति सर्व-जनस्य च वल्लभः ॥]

६८ पञ्चमनुष्यविभागाध्यायः

६८.०१ ताराग्रहैर् बलयुतैः स्व-क्षेत्र-स्व-उच्चगैश् चतुष्टयगैः।

६८.०१ पञ्च पुरुषाः प्रशस्ता जायन्ते तान् अहं वक्ष्ये॥

६८.०२ जीवेन भवति हंसः सौरेण शशः कुजेन रुचकश् च।

६८.०२ भद्रो बुधेन बलिना मालव्यो दैत्य-पूज्येन॥

६८.०३ सत्त्वम् अहीनं सूर्यात्-शारीरं मानसं च चन्द्र-बलात्।

६८.०३ यद् राशि-भेद-युक्ताव् एतौ तल् लक्षणः स पुमान्॥

६८.०४ तद्-धातु-महाभूत-प्रकृति-द्युति-वर्ण-सत्त्व-रूप-आद्यैः।

६८.०४ अबल-रवि-इन्दु-युतैस् तैः सङ्कीर्णा लक्षणैः पुरुषाः॥

६८.०५ भौमात् सत्त्वं गुरुता बुधात् सुरेज्यात् स्वरः सितात् स्नेहः।

६८.०५ वर्णः सौराद् एषां गुण-दोषैः साध्व्-असाधुत्वम्॥

६८.०६ सङ्कीर्णाः स्युर् न नृपा दशासु तेषां भवन्ति सुख-भाजः।

६८.०६ रिपु-गृह-नीच-उच्च-च्युत-सत्-पाप-निरीक्षणैर् भेदाः[K.भेदः]॥

६८.०७ षण्-णवतिर् अङ्गुलानां व्यायामो दीर्घता च हंसस्य।

६८.०७ शश-रुचक-भद्र-मालव्य-संज्ञितास् त्र्य्-अङ्गुल-विवृद्ध्या॥

६८.०८अ यः सात्त्विकस् तस्य दया स्थिरत्वं

६८.०८ब् सत्त्व-आर्जवं ब्राह्मण-देव-भक्तिः।

६८.०८च् रजो-अधिकः काव्य-कला-क्रतु-स्त्री-

६८.०८द् संसक्त-चित्तः पुरुषो -अतिशूरः॥

६८.०९अ तमो-अधिको वञ्चयिता परेषां

६८.०९ब् मूर्खो -अलसः क्रोध-परो -अति-निद्रः।

६८.०९च् मिश्रैर् गुणैः सत्त्व-रजस्-तमोभिर्

६८.०९द् मिश्रास् तु ते सप्त सह प्रभेदैः॥

६८.१०अ मालव्यो *नाग-नासः सम-भुज[K.नागनाससमभुज]-युगलो जानु-सम्प्राप्त-हस्तो

६८.१०ब् मांसैः पूर्ण-अङ्ग-सन्धिः सम-रुचिर-तनुर् मध्य-भागे कृशश् च।

६८.१०च् पञ्च-अष्टौ च-ऊर्ध्वम् आस्यं श्रुति-विवरम् अपि त्र्य्-अङ्गुल-ऊनं च तिर्यग्

६८.१०द् दीप्त-अक्षं सत्-कपोलं सम-सित-दशनं न-अतिमांस-अधरोष्ठम्॥

६८.११अ मालवान् स भरुकच्छ-सुराष्ट्रान्

६८.११ब् लाट-सिन्धु-विषय-प्रभृतींश् च।

६८.११च् विक्रम-आर्जित-धनो -अवति राजा

६८.११द् पारियात्र-निलयान्[K.निलयः] कृत-बुद्धिः॥

६८.१२ सप्तति-वर्षो मालव्यो -अयं त्यक्ष्यति सम्यक् प्राणांस् तीर्थे।

६८.१२ लक्षणम् एतत् सम्यक् प्रोक्तं शेष-नराणां च-अतो वक्ष्ये॥

६८.१३अ उपचित-समवृत्त-लम्ब-बाहुर्

६८.१३ब् भुज-युगल-प्रमितः समुच्छ्रयो -अस्य।

६८.१३च् मृदु-तनु-घन-रोम-नद्ध-गण्डो

६८.१३द् भवति नरः खलु लक्षणेन भद्रः॥

६८.१४अ त्वक्-शुक्र-सारः पृथु-पीन-वक्षाः

६८.१४ब् सत्त्व-अधिको व्याघ्र-मुखः स्थिरश् च।

६८.१४च् क्षम-अन्वितो धर्म-परः कृत-ज्ञो

६८.१४द् गजेन्द्र-गामी बहु-शास्त्र-वेत्ता॥

६८.१५अ प्राज्ञो वपुष्मान् सु-ललाट-शङ्खः

६८.१५ब् कलास्व् अभिज्ञो धृतिमान् सु-कुक्षिः।

६८.१५च् सरोज-गर्भ-द्युति-पाणि-पादो

६८.१५द् योगी सुनासः सम-संहत-भ्रूः॥

६८.१६अ नव-अम्बु-सिक्त-अवनि-पत्र-कुङ्कुम-

६८.१६ब् द्विपेन्द्र-दान-अगुरु-तुल्य-गन्धता।

६८.१६च् शिरो-रुहाश् च-एकज-कृष्ण-कुञ्चितास्

६८.१६द् तुरङ्ग-नाग-उपम-गुह्य-गूढता[K.गूढगुह्यता]॥

६८.१७अ हल-मुशल-गदा-असि-शङ्ख-चक्र-

६८.१७ब् द्विप-मकर-अब्ज-रथ-अङ्कित-अङ्घ्रि[K.अन्हि]-हस्तः।

६८.१७च् विभवम् अपि जनो -अस्य बोभुजी-इति

६८.१७द् क्षमति हि न स्वजनं स्व-तन्त्र-बुद्धिः॥

६८.१८अ अङ्गुलानि नवतिश् च षड्-ऊनान्य्

६८.१८ब् उच्छ्रयेण तुलया-अपि हि भारः।

६८.१८च् मध्य-देश-नृपतिर् यदि पुष्टाश्

६८.१८द् त्र्य्-आदयो -अस्य सकल-अवनि-नाथः॥

६८.१९ भुक्त्वा सम्यग्-वसुधां शौर्येण-उपार्जिताम् अशीत्य्-अब्दः।

६८.१९ तीर्थे प्राणांस् त्यक्त्वा भद्रो देव-आलयं याति॥

६८.२०अ ईषद्-दन्तुरकस् तनु-द्विज-नखः कोश-ईक्षणः शीघ्रगो

६८.२०ब् विद्या-धातु-वणिक्-क्रियासु निरतः सम्पूर्ण-गण्डः शठः।

६८.२०च् सेनानीः प्रिय-मैथुनः पर-जन-स्त्री-सक्त-चित्तश् चलः

६८.२०द् शूरो मातृहितो वन-अचल-नदी-दुर्गेषु सक्तः शशः॥

६८.२१अ दीर्घो -अङ्गुलानां शतम् अष्ट-हीनं

६८.२१ब् साशङ्क-चेष्टः पर-रन्ध्रविच् च।

६८.२१च् सारो -अस्य मज्ञा निभृत-प्रचारः

६८.२१द् शशो ह्य् अतो[K.अयं] न-अतिगुरुः प्रदिष्टः॥
६८.२२अ मध्ये कृशः खेटक-खड्ग-वीणा

६८.२२ब् पर्यङ्क-माला-मुरज-अनुरूपाः।

६८.२२च् शूल-उपमाश् च-ऊर्ध्व-गताश् च रेखाः

६८.२२द् शशस्य पाद-उपगताः करे वा॥

६८.२३अ प्रात्यन्तिको माण्डलिको -अथ वा-अयं

६८.२३ब् स्फिक्-स्राव-शूल-अभिभव-अर्त-मूर्तिः।

६८.२३च् एवं शशः सप्तति-हायनो -अयं

६८.२३द् वैवस्वतस्य-आलयम् अभ्युपैति॥

६८.२४अ रक्तं पीन-कपोलम् उन्नत-नसं वक्त्रं सुवर्ण-उपमं

६८.२४ब् वृत्तं च-अस्य शिरो -अक्षिणी मधु-निभे सर्वे च रक्ता नखाः।

६८.२४च् स्रग्-दाम-अङ्कुश-शङ्ख-मत्स्य-युगल-क्रत्व्-अङ्क-कुम्भ-अम्बुजैश्

६८.२४द् चिह्नैर् हंस-कल-स्वनः सु-चरणो हंसः प्रसन्न-इन्द्रियः॥

६८.२५ रतिर् अम्भसि शुक्र-सारता द्वि-गुणा च-अष्ट-शतैः पलैर् मितिः।

६८.२५ परिमाणम् अथ-अस्य षड्-युता नवतिः सम्परिकीर्तिता बुधैः॥

६८.२६ भुनक्ति हंसः खस-शूरसेनान् गान्धार-गङ्गा-यामुना-अन्तरालम्।

६८.२६ शतं दश-ऊनं शरदां नृपत्वं कृत्वा वन-अन्ते समुपैति मृत्युम्॥

६८.२७ सु-भ्रू-केशो रक्त-श्यामः कम्बु-ग्रीवो व्यादीर्घ-आस्यः।

६८.२७ शूरः क्रूरः श्रेष्ठो मन्त्री चौर-स्वामी व्यायामी च॥

६८.२८अ यन्मात्रम् आस्यं रुचकस्य दीर्घं

६८.२८ब् मध्य-प्रदेशे चतुरस्रता[K.चतुरश्रता] सा।

६८.२८च् तनु-च्छविः शोणित-मांस-सारो

६८.२८द् हन्ता द्विषां साहस-सिद्ध-कार्यः॥

६८.२९अ खट्वाङ्ग-वीणा-वृष-चाप-वज्र-

६८.२९ब् शक्ति-इन्द्र-शूल-अङ्कित-पाणि-पादः।

६८.२९च् भक्तो गुरु-ब्राह्मण-देवतानां

६८.२९द् शत-अङ्गुलः स्यात् *तु सहस्र-मानः[K.तुलया सहस्रम्]॥

६८.३०अ मन्त्र-अभिचार-कुशलः कृश-जानु-जङ्घो

६८.३०ब् विन्ध्यं ससह्यगिरिम् उज्जयिनीं च भुक्त्वा।

६८.३०च् सम्प्राप्य सप्तति-समा रुचको नरेन्द्रः

६८.३०द् शस्त्रेण मृत्युम् उपयात्य् अथ वा -अनलेन॥

६८.३१अ पञ्च-अपरे वामनको जघन्यः

६८.३१ब् कुब्जो -अथ वा मण्डलको -अथ साची[K.समी]।

६८.३१च् पूर्व-उक्त-भूप-अनुचरा भवन्ति

६८.३१द् सङ्कीर्ण-संज्ञः[K.संज्ञाः] शृणु लक्षणैस् तान्॥

६८.३२अ सम्पूर्ण-अङ्गो वामनो भग्न-पृष्ठः

६८.३२ब् किञ्चिच् च-ऊरू-मध्य-कक्ष्य[K.कक्ष]-अन्तरेषु।

६८.३२च् ख्यातो राज्ञां ह्य् एष भद्र-अनुजीवी

६८.३२द् स्फीटो राजा[K.दाता] वासुदेवस्य भक्तः॥

६८.३३अ मालव्य-सेवी तु जघन्य-नामा

६८.३३ब् खण्डेन्दु-तुल्य-श्रवणः सु-सन्धिः।

६८.३३च् शुक्रेण सारः पिशुनः कविश् च

६८.३३द् रूक्ष-च्छविः स्थूल-कर-अङ्गुलीकः॥

६८.३४अ क्रूरो धनी स्थूल-मतिः प्रतीतस्

६८.३४ब् ताम्र-च्छविः स्यात् परिहास-शीलः।

६८.३४च् उरो-अङ्घ्रि[K.अन्हि]-हस्तेष्व् असि-शक्ति-पाश-

६८.३४द् परश्वध-*अङ्कः स[K.अङ्कश् च] जघन्य-नामा॥

६८.३५अ कुब्जो नाम्ना यः स शुद्धो ह्य् अधस्तात्

६८.३५ब् क्षीणः किञ् चित् पूर्व-काये नतश् च।

६८.३५च् हंस-आसेवी नास्तिको -अर्थैर् उपेतो

६८.३५द् विद्वान् शूरः सूचकः स्यात् कृत-ज्ञः॥

६८.३६अ कलास्व् अभिज्ञः कलह-प्रियश् च

६८.३६ब् प्रभूत-भृत्यः प्रमदा-जितश् च।

६८.३६च् सम्पूज्य लोकं प्रजहात्य् अकस्मात्

६८.३६द् कुब्जो -अयम् उक्तः सतत-उद्यतश् च॥

६८.३७ *मण्डलकक्षणम् अतो[K.मण्डलकनामधेयो. ऊ.मण्डलकलक्षणम् अतो] रुचक-अनुचरो -अभिचारवित् कुशलः।

६८.३७ कृत्या-वेताल[K.वैताल]-आदिषु कर्मसु विद्यासु च-अनुरतः॥

६८.३८ वृद्ध-आकारः खर-*परुष-मूर्धजश्[K.रूक्षमूर्धजश्] च शत्रु-नाशने कुशलः।

६८.३८ द्विज-देव-यज्ञ-योग-प्रसक्त-धीः स्त्री-जितो मतिमान्॥

६८.३९अ साची-इति[K.सामीति] यः सो -अतिविरूप-देहः

६८.३९ब् शश-अनुगामी खलु दुर्भगश् च।

६८.३९च् दाता महारम्भ-समाप्त-कार्यो

६८.३९द् गुणैः शशस्य-एव भवेत् समानः॥

६८.४०अ[K.ओमित्तेद्] पुरुष-लक्षणम् उक्तम् इदम् मया

६८.४०ब्[K.ओमित्तेद्] मुनि-मतानि निरीक्ष्य समासतः।

६८.४०च्[K.ओमित्तेद्] इदम् अधीत्य नरो नृप-सम्मतो

६८.४०द्[K.ओमित्तेद्] भवति सर्वजनस्य च वल्लभः॥

६९ कन्यालक्षणाध्यायः

६९.०१अ स्निग्ध-उन्नत-अग्र-तनु-ताम्र-नखौ कुमार्याः

६९.०१ब् पादौ सम-उपचित-चारु-निगूढ-गुल्फौ।

६९.०१च् श्लिष्ट-अङ्गुली कमल-कान्ति-तलौ च यस्यास्

६९.०१द् ताम् उद्वहेद् यदि भुवो -अधिपतित्वम् इच्छेत्॥

६९.०२अ मत्स्य-अङ्कुश-अब्ज-यव-वज्र-हल-असि-चिह्न-

६९.०२ब् अवस्वेदनौ मृदु-तलौ चरणौ प्रशस्तौ।

६९.०२च् जङ्घे च रोम-रहिते विशिरे सुवृत्ते

६९.०२द् जानु-द्वयं समम् अनुल्बण-सन्धिदेशम्॥

६९.०३अ ऊरू घनौ करिकर-प्रतिमाव् अरोमाव्

६९.०३ब् अश्वत्थ-पत्र-सदृशं विपुलं च गुह्यम्।

६९.०३च् श्रोणी-ललाटम् उरु-कूर्म-समुन्नतं च

६९.०३द् गूढो मणिश् च विपुलां श्रियम् आदधाति॥

६९.०४अ विस्तीर्ण-मांस-उपचितो नितम्बः

६९.०४ब् गुरुश् च धत्ते रशना[K.रसना]-कलापम्।

६९.०४च् नाभिर् गभीरा[K.गम्भीरा] विपुल-अङ्गानां

६९.०४द् प्रदक्षिण-आवर्त-गता *च शस्ता[K.प्रशस्ता]॥

६९.०५अ मध्यं स्त्रियास् त्रि-वलि-नाथम् अरोमशं च

६९.०५ब् वृत्तौ घनाव् अविषमौ कठिनाव् उरस्यौ।

६९.०५च् रोम-प्रवर्जितम्[K.अपवर्जितम्] उरो मृदु च-अङ्गनानां

६९.०५द् ग्रीवा च कम्बु-निचित-अर्थ-सुखानि दत्ते[K.धत्ते]॥

६९.०६अ बन्धुजीव-कुसुम-उपमो -अधरो

६९.०६ब् मांसलो रुचिर-बिम्ब-रूप-भृत्।

६९.०६च् कुन्द-कुड्मल-निभाः समा द्विजा

६९.०६द् योषितां पतिसुख-अमित-अर्थदाः॥

६९.०७अ दाक्षिण्य-युक्तम् अशठं परपुष्ट-हंस-

६९.०७ब् वल्गु प्रभाषितम् अदीनम् अनल्प-सौख्यम्।

६९.०७च् नासा समा सम-पुटा रुचिरा प्रशस्ता

६९.०७द् दृग्-नील-नीरज-दल-द्युति-हारिणी च॥

६९.०८ नो सङ्गते न-अतिपृथू न लम्बे शस्ते भ्रुवौ बाल-शशाङ्क-वक्रे।

६९.०८ अर्धेन्दु-संस्थानम् अरोमशं च शस्तं ललाटं न नतं न तुङ्गम्॥

६९.०९ कर्ण-युग्मम् अपि युक्त-मांसलं शस्यते भ्रु *समाहितम् समम्[K.समं समाहितम्]।

६९.०९ स्निग्ध-नील-मृदु-कुञ्चित-एकजा मूर्धजाः सुख-कराः समं शिरः॥

६९.१०अ भृङ्गार-आसन-वाजि-कुञ्जर-रथ-श्रीवृक्ष-यूप-इषुभिर्

६९.१०ब् माला-कुण्डल-चामर-अङ्कुश-यवैः शैलैर् ध्वजैस् तोरणैः।

६९.१०च् मत्स्य-स्वस्तिक-वेदिका-व्यजनकैः शङ्ख-आतपत्र-अम्बुजैः

६९.१०द् पादे पाणि-तले -अथ वा[K.अपि वा] युवतयो गच्छन्ति राज्ञी-पदम्॥

६९.११अ निगूढ-मणिबन्धनौ तरुण-पद्म-गर्भ-उपमौ

६९.११ब् करौ नृपति-*योषितस्[K.योषितां] तनु-विकृष्ट-पर्व-अङ्गुली।

६९.११च् न निम्नम् अति न-उन्नतं कर-तलं सु-रेखा-अन्वितं

६९.११द् करोत्य् अविधवां चिरं सुत-सुख-अर्थ-सम्भोगिनीम्॥

६९.१२अ मध्य-अङ्गुलिं या मणिबन्धन-उत्था

६९.१२ब् रेखा गता पाणि-तले -अङ्गनायाः।

६९.१२च् ऊर्ध्व-स्थिता पाद-तले -अथ वा या

६९.१२द् पुंसो -अथ वा राज्य-सुखाय सा स्यात्॥

६९.१३अ कनिष्ठिका-मूल-भवा गता या

६९.१३ब् प्रदेशिनी-मध्यमिक-अन्तरालम्।

६९.१३च् करोति रेखा परम-आयुषः सा

६९.१३द् प्रमाणम् ऊना तु तद् ऊनम् आयुः॥

६९.१४अ अङ्गुष्ट-मूले प्रसवस्य रेखाः

६९.१४ब् पुत्रा बृहत्यः प्रमदास् तु तन्व्यः।

६९.१४च् अच्छिन्न-मध्या[K.दीर्घा] बृहद्-आयुषस्[K.बृहदायुषां] ताः

६९.१४द् स्वल्प-आयुषां छिन्न-लघु-प्रमाणाः॥

६९.१५अ इति-इदम् उक्तं शुभम् अङ्गनानाम्

६९.१५ब् अतो विपर्यस्तम् अनिष्टम् उक्तम्।

६९.१५च् विशेषतो -अनिष्ट-फलानि यानि

६९.१५द् समासतस् तान्य् अनुकीर्तयामि॥

६९.१६अ कनिष्ठिका वा तद्-अनन्तरा वा

६९.१६ब् महीं न यस्याः शृशति स्त्रियाः स्यात्।

६९.१६च् गता-अथ वा-अङ्गुष्ठम् अतीत्य यस्याः

६९.१६द् प्रदेशिनी सा कुलटा -अतिपापा॥

६९.१७अ उद्बद्धाभ्याम् पिण्डिकाभ्याम् शिरालै

६९.१७ब् शुष्के जङ्घे लोमशे[K.ऊ.रोमशे] च-अतिमांसे

६९.१७च् वाम-आवर्तं निम्नम् अल्पं च गुह्यं

६९.१७द् कुम्भ-आकारं च-उदरं दुःखितानाम्॥

६९.१८ ह्रस्वया-अतिनिःस्वता दीर्घया कुल-क्षयः।

६९.१८ ग्रीवया पृथु-उत्थया योषितः प्रचण्डता॥

६९.१९अ नेत्रे यस्याः केकरे पिङ्गले वा

६९.१९ब् सा दुःशीला श्याव-लोल-ईक्षणा च।

६९.१९च् कूपौ यस्या गण्डयोश् च स्मितेषु

६९.१९द् निःसन्दिग्धं बन्धकीं तां वदन्ति॥

६९.२०अ प्रविलम्बिनि देवरं ललाटे

६९.२०ब् श्वशुरं हन्त्य् उदरे स्फिजोः पतिं च।

६९.२०च् अतिरोम-चय-अन्वित-उत्तर-ओष्ठी

६९.२०द् न शुभा भर्तुर् अतीव या च दीर्घा॥

६९.२१अ स्तनौ सरोमौ मलिन-उल्बणौ च

६९.२१ब् क्लेशं दधाते विषमौ च कर्णौ।

६९.२१च् स्थूलाः कराला विषमाश् च दन्ताः

६९.२१द् क्लेशाय चौर्याय च कृष्ण-मांसाः॥

६९.२२अ क्रव्याद-रूपैर् वृक-काक-कङ्क-

६९.२२ब् सरीसृप-उलूक-समान-चिह्नैः

६९.२२च् शुष्कैः शिरालैर् विषमैश् च हस्तैर्

६९.२२द् भवन्ति नार्यः सुख-वित्त-हीनाः॥

६९.२३अ या तु-उत्तरोष्ठेन समुन्नतेन

६९.२३ब् रूक्ष-अग्र-केशी कलह-प्रिया सा।

६९.२३च् प्रायो विरूपासु भवन्ति दोषा

६९.२३द् यत्र-आकृतिस् तत्र गुणा वसन्ति॥

६९.२४ पादौ सगुल्फौ प्रथमं प्रदिष्टौ जङ्घे द्वितीयं तु स-जानु-चक्रे।

६९.२४ मेढ्र-ऊरु-मुष्कं च ततस् तृतीयं नाभिः कटिश् च-एव[K.च इति] चतुर्थम् आहुः॥

६९.२५ उदरं कथयन्ति पञ्चमं हृदयं षष्ठम् अतस् स्तन-अन्वितम्।

६९.२५ अथ सप्तमम् अंसजतुणी कथयन्त्य् अष्टमम् ओष्ठ-कन्धरे॥

६९.२६ नवमं नयने च स-भ्रुणी स-ललाटं दशमं शिरस् तथा।

६९.२६ अशुभेष्व् अशुभं दशाफलं चरण-आद्येषु शुभेषु शोभनम्॥

७० वस्त्रच्छेदलक्षणाध्यायः

७०.०१अब्[K.७१.६अब्]। प्रभूत-वस्त्रदा-अश्विनी भरण्य् अथ-अपहारिणी।

७०.०१च्द्[K.७१.६च्द्]। प्रदह्यते -अग्निदैवते प्रजेस्वरे -अर्थ-सिद्धयः॥

७०.०२अब्[K.७१.७अब्]। मृगे तु मूषकाद् भयं व्यसुत्वम् एव शाङ्करे।

७०.०२च्द्[K.७१.७च्द्]। पुनर्वसौ शुभ-आगमस् तद्-अग्रभे धनैर् युतिः॥

७०.०३अब्[K.७१.८अब्]। भुजङ्ग-भे विलुप्यते मघासु मृत्युम् आदिशेत्।

७०.०३च्द्[K.७१.८च्द्]। भग-आह्वये नृपाद् भयं धन-आगमाय च-उत्तरा॥

७०.०४अब्[K.७१.९अब्]। करेण कर्म-सिद्धयः शुभ-आगमस् तु चित्रया।

७०.०४च्द्[K.७१.९च्द्] । शुभं च भोज्यम् आनिले द्वि-दैवते जन-प्रियः॥

७०.०५अब्[K.७१.१०अब्] । सुहृद्युतिश्[K.ऊ.सुहृद्युतिश्] च मित्रभे तद्-अग्र-भे[K.पुरन्दरे] -अम्बर-क्षयः ।

७०.०५च्द्[K.७१.१०च्द्] । जल-प्लुतिश् च नैरृते रुजो जलाधि-दैवते॥

७०.०६अब्[K.७१.११अब्] । मिष्टम् अन्नम् अपि वैश्व-दैवते वैष्णवे भवति नेत्र-रोगता ।

७०.०६च्द्[K.७१.११च्द्] । धान्य-लब्धिर्[K.लब्धिम्] अपि[K.अथ] वासवे[K.विश्वदैवते] विदुर् वारुणे विष-कृतं महद्भयम्॥

७०.०७अ[K.७१.१२अ] भद्रपदासु भयं सलिल-उत्थं

७०.०७ब्[K.७१.१२ब्] तत् परतश् च भवेत् सुत-लब्धिः ।

७०.०७च्[K.७१.१२च्] रत्न-युतिं कथयन्ति च पौष्णे

७०.०७द्[K.७१.१२द्] यो -अभिनव-अम्बरम् इच्छति भोक्तुम्॥

[K.७१.१३ विप्र-मताद् अथ भूपति-दत्तं यच् च विवाह-विधाव् अभिलब्धम् ।

K.७१.१३ तेषु गुणै रहितेष्व् अपि भोक्तुं नूतनम् अम्बरमिष्टफलं स्यात्॥]

७०.०८अब्[K.७१.१४अब्] । भोक्तुं नव-अम्बरं शस्तम् ऋक्षे -अपि गुण-वर्जिते ।

७०.०८च्द्[K.७१.१४च्द्] । विवाहे राज-सम्माने ब्रह्मणाणां च सम्मते॥
७०.०९अब्[K.७१.१अब्] । वस्त्रस्य कोणेषु वसन्ति देवा नराश् च पाशान्त-दशान्त-मध्ये ।

७०.०९च्द्[K.७१.१च्द्] । शेषास् त्रयश् च-अत्र निशाचरांशास् तथ-एव शय्या-आसन-पादुकासु॥

७०.१०अब्[K.७१.२अब्] । लिप्ते मषी-गोमय-कर्दम-आद्यैश् छिन्ने प्रदग्धे स्फुटिते च विन्द्यात् ।

७०.१०च्द्[K.७१.२च्द्] । पुष्टं नवे -अल्प-अल्पतरं च भुक्ते पापं शुभं च-अधिकम् उत्तरीये॥

७०.११अब्[K.७१.३अब्] । रुग्-राक्षस-अंशेस्व् अथ वा -अपि मृत्युः पुञ्-जन्म-तेजश् च मनुष्य-भागे ।

७०.११च्द्[K.७१.३च्द्] । भागे -अमराणाम् अथ भोग-वृद्धिः प्रान्तेषु सर्वत्र वदन्त्य् अनिष्टम्॥

७०.१२अब्[K.७१.४अब्] । कङ्क-प्लव-उलूक-कपोत-काक-क्रव्याद-गोमायु-खर-उष्ट्र-सर्पैः ।

७०.१२च्द्[K.७१.४च्द्] । छेद-आकृतिर् दैवत-भागगा-अपि पुंसां भयं मृत्यु-समं करोति॥

७०.१३अब्[K.७१.५अब्] । छत्र-ध्वज-स्वस्तिक-वर्धमान-श्रीवृक्ष-कुम्भ-अम्बुज-तोरण-आद्यैः ।

७०.१३च्द्[K.७१.५च्द्]। छेद-आकृतिर् नैरृत-भागगा-अपि पुंसां विधत्ते न चिरेण लक्ष्मीम्॥

७१ चामरलक्षणाध्यायः

७१.०१अ देवैश् चमर्यः किल वाल-हेतोः

७१.०१ब् सृष्टा हिमक्ष्माधर-कन्दरेषु।

७१.०१च् आपीत-वर्णाश् च भवन्ति तासां

७१.०१द् कृष्णाश् च लाङ्गूल-भवाः सिताश् च॥

७१.०२अ स्नेहो मृदुत्वं बहु-वालता[K.वालता च]

७१.०२ब् वैशद्यम् अल्प-अस्थि-निबन्धनत्वम्।

७१.०२च् शौक्ल्यं च तासां[K.तेषां] गुण-सम्पद् उक्ता

७१.०२द् विद्ध-अल्प-लुप्तानि न शोभनानि॥

७१.०३अ अध्यर्ध-हस्त-प्रमितो -अस्य दण्डो

७१.०३ब् हस्तो -अथ वा-अरत्नि-समो -अथ वा-अन्यः।

७१.०३च् काष्ठात्-शुभात् काञ्चन-रूप्य-गुप्ताद्

७१.०३द् रत्नैश् *च सर्वैश्[K.विचित्रैश्] च हिताय राज्ञाम्॥

७१.०४ यष्ट्य्-आतपत्र-अङ्कुश-वेत्र-चाप-वितान-कुन्त-ध्वज-चामराणाम्।

७१.०४ व्यापीत-तन्त्री-मधु-कृष्ण-वर्णा वर्ण-क्रमेण-एव हिताय दण्डाः॥

७१.०५अ मातृ-भू-धन-कुल-क्षयावहा

७१.०५ब् रोग-मृत्यु-जननाश् च पर्वभिः।

७१.०५च् द्व्य्-आदिभिर् द्विक-विवर्धितैः क्रमात्

७१.०५द् द्वादश-अन्त-विरतैः समैः फलम्॥

७१.०६अ यात्रा-प्रसिद्धिर् द्विषतां विनाशो

७१.०६ब् लाभाः प्रभूता[K.प्रभूतो] वसुधा-गमश् च।

७१.०६च् वृद्धिः पशूनाम् अभिवञ्छित-आप्तिस्

७१.०६द् त्र्य्-आद्येष्व् अयुग्मेषु तद्-ईश्वराणाम्॥

७२ छत्रलक्षणाध्यायः

७२.०१ निचितं तु[Kऽस् त्र्. नु] हंस-पक्षैः कृकवाकु-मयूर-सारसानां वा।

७२.०१ दौकूल्येन[K.दौकूलेन] नवेन तु समन्ततश् छादितं शुक्लम्॥

७२.०२ मुक्ताफलैर् उपचितं प्रलम्ब-माला-आविलं स्फटिक-मूलम्।

७२.०२ षड्-ढस्त-शुद्धहैमं नव-पर्व-नग-एक-दण्डं तु॥

७२.०३ दण्ड-अर्ध-विस्तृतं तत् समावृतं रत्न-भूषितम्[K.रत्नविभूषितम्, Kऽस् त्र्. रत्नभूषितम्] उदग्रम्।

७२.०३ नृपतेस् तद्-आतपत्रं कल्याण-परं विजयदं च॥

७२.०४ युवराज-नृपति-पत्न्योः सेनापति-दण्डनायकानां च।

७२.०४ दण्डो -अर्ध-पञ्च-हस्तः समपञ्च-*कृतो -अर्ध[K.कृतार्ध]विस्तारः॥

७२.०५ अन्येषाम् उष्णघ्नं प्रसादपट्टैर् विभूषित-शिरस्कम्।

७२.०५ व्यालम्बि-रत्नमालं छत्रं कार्यं तु[K.च] मायूरम्॥

७२.०६ अन्येषां तु नराणां शीत-आतप-वारणं तु चतुरस्रम्[K.चतुरश्रम्]।

७२.०६ समवृत्त-दण्ड-युक्तं छत्रं कार्यं तु विप्राणाम्॥

७३ स्त्रीप्रशम्साध्यायः

७३.०१अ जये धरित्र्याः पुरम् एव सारं

७३.०१ब् पुरे गृहं सद्मनि च-एकदेशः।

७३.०१च् तत्रापि शय्या शयने वरा स्त्री

७३.०१द् रत्नोज्ज्वला राज्यसुखस्य सारः॥

७३.०२ रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या।

७३.०२ चेतो विनता हरन्त्य् अरत्ना नो रत्नानि विनाङ्गना-अङ्ग-सङ्गम्[K.सङ्गात्]॥

७३.०३अ आकारं विनिगूहतां रिपुबलं जेतुं समुत्तिष्ठतां

७३.०३ब् तन्त्रं चिन्तयतां कृत-अकृत-शत-व्यापार-शाखा-आकुलम्।

७३.०३च् मन्त्रि-प्रोक्त-निषेविणां[K.निसेविणाम्, Kऽस् त्र्. निषेविनाम्] क्षितिभुजाम् आशङ्किनां सर्वतो

७३.०३द् धुःख-अम्भो-निधि-वर्तिनां सुख-लवः कान्ता-समालिङ्गनम्॥

७३.०४अ श्रुतं दृष्टं स्पृष्टं स्मृतम् अपि नृणां ह्लाद-जननं

७३.०४ब् न रत्नं स्त्रीभ्यो -अन्यत् क्व चिद् अपि कृतं लोकपतिना।

७३.०४च् तदर्थं धर्म-अर्थौ सुत-विषय-सौख्यानि च ततो

७३.०४द् गृहे लक्ष्म्यो मान्याः सततम् अबला मान-विभवैः॥

७३.०५अ ये -अप्य् अङ्गनानां प्रवदन्ति दोषान्

७३.०५ब् वैराग्य-मार्गेण गुणान् विहाय।

७३.०५च् ते दुर्जना मे मनसो वितर्कः

७३.०५द् सद्भाव-वाक्यानि न तानि तेषाम्॥

७३.०६अ प्रब्रूत सत्यं करतो -अङ्गनानां

७३.०६ब् दोषो -अस्ति यो नाचरितो मनुष्यैः।

७३.०६च् धाष्ट्येन पुम्भिः प्रमदा निरस्ता

७३.०६द् गुणाधिकास् ता मनुना-अत्र च-उक्तम्॥

७३.०७ सोमस् तासाम् अदात्-शौचं गन्धर्वः[K.गन्धर्वाः] शिक्षितां गिरम्।

७३.०७ अग्निश् च सर्वभक्षित्वं तस्मान् निष्कसमाः स्त्रियः॥

७३.०८ ब्राह्मणाः पादतो मेध्या गावो मेध्याश् च पृष्ठतः।

७३.०८ अज-अश्वा मुखतो मेध्याः स्त्रियो मेध्यास् तु सर्वतः॥

७३.०९ स्त्रियः पवित्रम् अतुलं नैता दुष्यन्ति कर्हि चित्।

७३.०९ मासि मासि रजो ह्य् आसां दुष्कृतान्य् अपकर्षति॥

७३.१० जामयो यानि गेहानि शपन्त्य् अप्रतिपूजिताः।

७३.१० तानि कृत्या-हतानि-इव विनश्यन्ति समन्ततः॥

७३.११ जाया वा स्याज् जनित्री वा सम्भवः स्त्रीकृतो नृणाम्।

७३.११ हे कृतघ्नाश् तयोर् निन्दां कुर्वतां वः कुतः शुभम्॥

७३.१२ दम्पत्योर् व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः।

७३.१२ नरा न समवेक्षन्ते तेन-अत्र वरमङ्गनाः॥

७३.१३ बहिर् लोम्ना तु षण्मासान् वेष्टितः खर-चर्मणा।

७३.१३ दारातिक्रमणे भिक्षां देहि-इत्य् उक्त्वा विशुध्यति॥

७३.१४ न शतेन-अपि वर्षाणाम् अपैति मदन-आशयः।

७३.१४ तत्र अशक्त्या निर्वर्तन्ते नरा धैर्येण योषितः॥

७३.१५ अहो धाष्ट्र्यम् असाधूनां निन्दताम् अनघाः स्त्रियः।

७३.१५ मुष्णताम् इव चौराणां तिष्ठ चौरेति जल्पताम्॥

७३.१६अ पुरुषश् चटुलानि[K.चातुलानि, Kऽस् त्र्. चटुलानि] कामिनीनां

७३.१६ब् कुरुते यानि रहो न तानि पश्चात्।

७३.१६च् सुकृतज्ञतया-अङ्गना गतासून्

७३.१६द् अवगूह्य प्रविशन्ति सप्तजिह्वम्॥

७३.१७अ स्त्रीरत्न-भोगो -अस्ति नरस्य यस्य

७३.१७ब् निःस्वो -अपि *साम्प्रत्य् अवनीस्वरो[K.स्वं प्रत्यवनीस्वरो, Kऽस् त्र्. मां प्रत्यव] -असौ।

७३.१७च् राज्यस्य सारो -अशनम् अङ्गनाश् च

७३.१७द् तृष्ण-अनल-उद्दीपन-दारु शेषम्॥

७३.१८अ कामिनीं प्रथमयौवन-अन्वितां

७३.१८ब् मन्द-वल्गु-मृदु-पीडित-स्वनाम्।

७३.१८च् उत्स्तनीं समवलम्ब्य या रतिः

७३.१८द् सा न धातृभवने -अस्ति मे मतिः॥

७३.१९अ तत्र देव-मुनि-सिद्ध-चारणैर्

७३.१९ब् मान्य-मानपितृ-सेव्य-सेवनात्।

७३.१९च् ब्रूत धातृभवने -अस्ति किं सुखं

७३.१९द् यद् रहः समवलम्ब्य न स्त्रियम्॥

७३.२०अ आब्रह्म-कीट-अन्तम् इदं निबद्धं

७३.२०ब् पुंस्त्रीप्रयोगेण जगत् समस्तम्।

७३.२०च् व्रीडा-अत्र का यत्र चतुर्मुखत्वम्

७३.२०द् ईशो -अपि लोभाद् गमितो युवत्याः॥

७४ सौभाग्यकरणाध्यायः

७४.०१अ जात्यं मनोभव-सुखं सुभगस्य सर्वम्

७४.०१ब् आभास-मात्रम् इतरस्य मनोवियोगात्।

७४.०१च् चित्तेन भावयति दूरगता-अपि यं स्त्री

७४.०१द् गर्भं बिभर्ति सदृशं पुरुषस्य तस्य॥

७४.०२अ भङ्क्त्वा काण्डं पादपस्य-उत्तम् उर्व्यां

७४.०२ब् बीजं वा-अस्यां न-अन्यताम् एति यद्वत्।

७४.०२च् एवं ह्य् आत्मा जायते स्त्रीषु भूयः

७४.०२द् कश् चित् तस्मिन् क्षेत्रयोगाद् विशेषः॥

७४.०३अ आत्मा सह-एति मनसा मन इन्द्रियेण

७४.०३ब् स्वार्थेन च-इन्द्रियम् इति क्रम एष शीघ्रः।

७४.०३च् योगो -अयम् एव मनसः किम् अगम्यम् अस्ति

७४.०३द् यस्मिन् मनो व्रजति तत्र गतो -अयम् आत्मा॥

७४.०४अ आत्मा-अयम् आत्मनि गतो हृदये -अतिसूक्ष्मो

७४.०४ब् ग्राह्यो -अचलेन मनसा सतत-अभियोगात्।

७४.०४च् यो यं विचिन्तयति याति स तन्मयत्वं

७४.०४द् यस्माद् अतः सुभगम् एव गता युवत्यः॥

७४.०५ दाक्षिण्यम् एकं सुभगत्व-हेतुर् विद्वेषणं तद्-विपरीत-चेष्टा।

७४.०५ मन्त्र-ओषध-आद्यैः कुहक-प्रयोगैर् भवन्ति दोषा बहवो न शर्म॥

७४.०६ वाल्लभ्यम् आयाति विहाय मानं दौर्भाग्यम् आपादयते -अभिमानः।

७४.०६ कृच्छ्रेण संसाधयते -अभिमानी कार्याण्य् अयत्नेन वदन् प्रियाणि॥

७४.०७ तेजो न तद् यत् प्रिय-साहसत्वं वाक्यं न च-अनिष्टम् असत्प्रणीतम्।

७४.०७ कार्यस्य गत्व?-अन्तम् अनुद्धता ये तेजस्विनस् ते न विकत्थना ये॥

७४.०८ यः सार्वजन्यं सुभगत्वम् इच्छेद् गुणान् स सर्वस्य वदेत् परोक्षम्[K.परोक्षे]।

७४.०८ प्राप्नोति दोषान् असतो -अप्य् अनेकान् परस्य यो दोषकथां करोति॥

७४.०९ सर्व-उपकार-अनुगतस्य लोकः सर्व-उपकार-अनुगतो नरस्य।

७४.०९ कृत्वा-उपकारं द्विषतां विपत्सु या कीर्तिर् अल्पेन न सा शुभेन॥

७४.१० तृणैर् इवाग्निः सुतरां विवृद्धिम् आछाद्यमानो -अपि गुणो -अभ्युपैति।

७४.१० स केवलं दुर्जनभावम् एति हन्तुं गुणान् वाञ्छति यः परस्य॥

७५ कान्दर्पिकाध्यायः

७५.०१ रक्ते -अधिके स्त्री पुरुषस् तु शुक्रे नपुंसकं शोणित-शुक्रसाम्ये।

७५.०१ यस्माद् अतः शुक्र-विवृद्धिदानि निषेवितव्यानि रसायनानि॥

७५.०२ हर्म्य-पृष्ठम् उडुनाथ-रश्मयः स-उत्पलं मधु मद-अलसा प्रिया।

७५.०२ वल्लकी स्मरकथा रहः स्रजो वर्ग एष मदनस्य वागुरा॥

७५.०३अ माक्षीकधातु-मधु-पारद-लोहचूर्ण-

७५.०३ब् पथ्या-शिलाजतु-*घृतानि समानि[K.विडङ्गघृतानि] यो -अद्यात्।

७५.०३च् सैकानि विंशतिर् अहानि जरान्वितो -अपि

७५.०३द् सो -अशीतिको -अपि रमयत्य् अबलां युवा-इव॥

७५.०४अ क्षीरं शृतं यः कपिकच्छु-मूलैः

७५.०४ब् पिबेत् क्षयं स्त्रीषु न सो -अभ्युपैति।

७५.०४च् माषान् पयःसर्पिषि वा विपक्वान्

७५.०४द् षड्ग्रासमात्रांश् च पयो -अनुपानम्[K.अनुपानान्]॥

७५.०५ विदारिकायाः स्वरसेन चूर्णं मुहुर्मुहुर् भावितशोषितं च।

७५.०५ शृतेन दुग्धेन सशर्करेण पिबेत् स यस्य प्रमदाः प्रभूताः॥

७५.०६अ धात्रीफलानां स्वरसेन चूर्णं

७५.०६ब् सुभावितं क्षौद्र-सित-आज्य-युक्तम्।

७५.०६च् लीढ्वा-अनु पीत्वा च पयो -अग्निशक्त्या

७५.०६द् कामं निकामं पुरुषो निषेवेत्॥

७५.०७अ क्षीरेण बस्त-अण्ड युजा शृतेन

७५.०७ब् सम्प्लाव्य कामी बहुशस् तिलान् यः।

७५.०७च् सुशोषितान् अत्ति *पयः पिबेच्[K.पिबेत् पयश्] च

७५.०७द् तस्य-अग्रतः किं चटकः करोति॥

७५.०८ माष-सूप-सहितेन सर्पिषा षष्टिकौदनम् अदन्ति ये नराः।

७५.०८ क्षीरम् अप्य् अनु पिबन्ति तासु ते शर्वरीषु मदनेन[K.मदने न] शेरते॥

७५.०९अ तिल-अश्वगन्धा-कपिकच्छु-मूलैर्

७५.०९ब् विदारिका-षष्टिक-पिष्ट-योगः।

७५.०९च् आजेन पिष्टः पयसा घृतेन

७५.०९द् पक्वं[K.पक्त्वा] भवेत्-शष्कुलिकातिवृष्या॥

७५.१०अ क्षीरेण वा गोक्षुरक-उपयोगं

७५.१०ब् विदारिका-कन्दक-भक्षणं वा।

७५.१०च् कुर्वन् न सीदेद् यदि जीर्यते -अस्य

७५.१०द् मन्दाग्निता चेद् इदम् अत्र चूर्णम्॥

७५.११ स-अजमोद-लवणा हरीतकी शृङ्ग-वेर-सहिता च पिप्पली।

७५.११ मद्य-तक्र-तरल-उष्णवारिभिश् चूर्णपानम् उदराग्निदीपनम्॥

७५.१२अ अत्यम्ल-तिक्त-लवणानि कटूनि वा-अत्ति

७५.१२ब् *यः क्षारशाक-बहुलानि[K.क्षारशाकबहुलानि] च भोजनानि।

७५.१२च् दृक्-शुक्र-वीर्य-रहितः स करोत्य् अनेकान्
७५.१२द् व्याजान् जरन्न् इव युवा -अप्य् अबलाम् अवाप्य॥

७६ गन्धयुक्त्यध्यायः

७६.०१ स्रग्-गन्ध-धूप-अम्बर-भूषण-आद्यं न शोभते शुक्ल-शिरोरुहस्य।

७६.०१ यस्माद् अतो मूर्धज-रागसेवां कुर्याद् यथ-एव-अञ्जन-भूषणानाम्॥

७६.०२अ लौहे पात्रे तण्डुलान् कोद्रवाणां

७६.०२ब् शुक्ले पक्वांल् लोहचूर्णेन साकम्।

७६.०२च् पिष्टान् सूक्ष्मं मूर्ध्नि शुक्ल-अम्ल-केशे

७६.०२द् दत्वा[K.दत्त्वा] तिष्ठेद् वेष्टयित्वा-आर्द्र[K.अर्क]पत्रैः॥

७६.०३अ याते द्वितीये प्रहरे विहाय

७६.०३ब् दद्यात्-शिरस्य् आमलक-प्रलेपम्।

७६.०३च् संछाद्य पत्रैः प्रहरद्वयेन

७६.०३द् प्रक्षालितं काष्ण्यम् उपैति शीर्षम्॥

७६.०४अ पश्चात्-शिरःस्नान-सुगन्ध-तैलैर्

७६.०४ब् लोह-अम्ल-गन्धं शिरसो -अपनीय।

७६.०४च् हृद्यैश् च गन्धैर् विविधैश् च धूपैर्

७६.०४द् अन्तःपुरे राज्यसुखं निषेवेत्॥

७६.०५ त्वक्-कुष्ठ-रेणु-नलिका-स्पृक्का-रस-तगर-बालकैस् तुल्यैः।

७६.०५ केसर-पत्र-विमिश्रैर् नरपति-योग्यं शिरःस्नानम्॥

७६.०६ मञ्जिष्ठया व्याघ्रनखेन शुक्त्या त्वचा सकुष्ठेन रसेन चूर्णः।

७६.०६ तैलेन युक्तो -अर्कमयूख-तप्तः करोति तच् चम्पक-गन्धि तैलम्॥

७६.०७अ तुल्यैः पत्र-तुरुष्क-बाल-तगरैर् गन्धः स्मरोद्दीपनः

७६.०७ब् सव्यामो बकुलो -अयम् एव कटुका-हिङ्गु-प्रधूप-अन्वितः।

७६.०७च् कुष्ठेन-उत्पलगन्धिकः समलयः पूर्वो भवेच् चम्पको

७६.०७द् जाती-त्वक्-सहितो -अतिमुक्तक इति ज्ञेयः सकुस्तुम्बुरुः॥

७६.०८ शतपुष्पा-कुन्दुरुकौ पादेन-अर्धेन नख-तुरुष्कौ च।

७६.०८ मलय-प्रियङ्गु-*भागौ[Kऽस् त्र्. भागो] गन्धो धूप्यो गुड-नखेन॥

७६.०९ गुग्गुलु-बालक[K.वालक]-लाक्षा-मुस्ता-नख-शर्कराः क्रमाद् धूपः।

७६.०९ अन्यो मांसी-बालक[K.वालक]-तुरुष्क-नख-चन्दनैः पिण्डः॥

७६.१०अ हरीतकी-शङ्ख-घन-द्रव-अम्बुभिर्

७६.१०ब् गुड-उत्पलैः शैलक-मुस्तक-अन्वितैः।

७६.१०च् नवान्त-पाद-आदि-विवर्धितैः क्रमाद्

७६.१०द् भवन्ति धूपा बहवो मनोहराः॥

७६.११अ भागैश् चतुर्भिः सित-शैल[U - शैलेय]-मुस्ताः

७६.११ब् श्री-सर्ज-भागौ नख-गुग्गुलू च।

७६.११च् कर्पूर-बोधो मधु-पिण्डितो -अयं

७६.११द् कोपच्छदो नाम नरेन्द्रधूपः॥

७६.१२ त्वग्-उशीर-पत्र-भागैः सूक्ष्मैला-अर्धेन संयुतैश् चूर्णः।

७६.१२ पुटवासः[K.पटवासः] प्रवरो -अयं मृग-कर्पूर-प्रबोधेन॥

७६.१३ घन-बालक-शैलेयक-कर्पूर-उशीर-नागपुष्पाणि।

७६.१३ व्याघ्रनख-स्पृक्का-अगुरु-*दमनक[U - मदनक]-नख-तगर-धान्यानि॥

७६.१४ कर्पूर[क्ऽस् त्र्. कर्चूर]-चोल[K.चोर]-मलयैः स्वेच्छापरिवर्तितैश् चतुर्भिर् अतः।

७६.१४ एकद्वित्रिचतुर्भिर् भागैर् गन्धार्णवो भवति॥

७६.१५ अत्युल्बणगन्ध-त्वाद् एकांशो नित्यम् एव धान्यानाम्।

७६.१५ कर्पूरस्य तदूनो नैतौ द्वित्र्यादिभिर् देयौ॥

७६.१६ श्री-सर्ज-गुड-नखैस् ते धूपयितव्याः क्रमान् न पिण्डस्थैः।

७६.१६ बोधः कस्तूरिकया देयः कर्पूर-संयुतया॥

७६.१७ अत्र सहस्र-चतुष्टयम् अन्यानि च सप्तति-सहस्राणि।

७६.१७ लक्षं शतानि सप्त विंशति-युक्तानि गन्धानाम्॥

७६.१८ एकैकम् एकभागं द्वि-त्रि-चतुर्-भागिकैर् युतं द्रव्यैः।

७६.१८ षड्-गन्ध-करं तद्वद् द्वि-त्रि-चतुर्-भागिकं कुरुते॥

७६.१९ द्रव्य-चतुष्टय-योगाद् गन्ध-चतुर्विंशतिर् यथा-एकस्य।

७६.१९ एवं शेषाणाम् अपि षण्णवतिः सर्वपिण्डो -अत्र॥

७६.२० षोडशके द्रव्यगणे चतुर्विकल्पेन भिद्यमानानाम्।

७६.२० अष्टादश जायन्ते शतानि सहितानि विंशत्या॥

७६.२१ षण्णवति-भेदभिन्नश् चतुर्-विकल्पो गणो यतस् तस्मात्।

७६.२१ षण्णनवति-गुणः कार्यः सा सङ्ख्या भवति गन्धानाम्॥

७६.२२अ पूर्वेण पूर्वेण गतेन युक्तं

७६.२२ब् स्थानं विनान्त्यं प्रवदन्ति सङ्ख्याम्।

७६.२२च् इच्छाविकल्पैः क्रमशो -अभिनीय

७६.२२द् नीते निवृत्तिः पुनर् अन्यनीतिः॥

७६.२३ द्वि-त्रि-इन्द्रिय-अष्टभागैर् अगुरुः पत्रं तुरुष्क-शैलेयौ

७६.२३ विषय-अष्ट-पक्ष-दहनाः प्रियङ्गु-मुस्ता-रसाः केशः॥

७६.२४ स्पृक्का-त्वक्-तगराणां मांस्याश् च कृत-एक-सप्त-षड्-भागाः।

७६.२४ सप्त-ऋतु-वेद-चन्द्रैर् मलय-नख-श्रीक-कुन्दुरुकाः॥

७६.२५ षोडशके कच्छपुटे यथा तथा *मिश्रिते चतुर्द्रव्ये[K.मिश्रितैश् चतुर्द्रव्यैः]।

७६.२५ ये -अत्र-अष्टादश भागास् ते -अस्मिन् गन्धादयो योगाः॥

७६.२६ नख-तगर-तुरुष्क-युता जाती-कर्पूर-मृग-कृत-उब्दोधाः[U - उद्बोधाः]।

७६.२६ गुड-नख-धूप्या गन्धाः कर्तव्याः सर्वतोभद्राः॥

७६.२७ जातीफल-मृग-कर्पूर-बोधितैः स-सहकार-मधु-सिक्तैः।

७६.२७ बहवो -अत्र पारिजाताश् चतुर्भिर् इच्छापरिगृहीतैः॥

७६.२८ सर्ज-रस-श्रीवासक-समन्विता ये -अत्र सर्व-धूपास्[K.सर्वयोगास्] तैः।

७६.२८ श्री-सर्ज-रस-वियुक्तैः स्नानानि सबालक[K.सवालक]त्वग्भिः॥

७६.२९ रोध्र-उशीर-नत-अगुरु-*मुस्ता-पत्र[K.मुस्ता]-प्रियङ्गु-वन-पथ्याः।

७६.२९ नवकोष्ठात् कच्छपुटाद् द्रव्यत्रितयं समुद्धृत्य॥

७६.३० चन्दन-तुरुष्क-भागौ शुक्त्य्-अर्ध पादिका तु शतपुष्पा।

७६.३० कटु-हिङ्गुल-गुड-धूप्याः केसरगन्धाश् चतुरशीतिः॥

७६.३१ सप्ताहं गोमूत्रे हरीतकी-चूर्ण-संयुते क्षिप्त्वा।

७६.३१ गन्धोदके च भूयो विनिक्षिपेद् दन्तकाष्ठानि॥

७६.३२ एला-त्वक्-पत्र-अञ्जन-मधु-मरिचैर् नागपुष्प-कुष्ठैश् च।

७६.३२ गन्धाम्भः कर्तव्यं किञ् चित् कालं स्थितान्य् अस्मिन्॥

७६.३३ जातीफल-पत्र-एला-कर्पूरैः कृत-यम-एक-शिखि-भागैः।

७६.३३ अवचूर्नितानि भानोर् मरीचिभिः शोषणीयानि॥

७६.३४अ वर्ण-प्रसादं वदनस्य कान्तिं

७६.३४ब् वैशद्यम् आस्यस्य सुगन्धितां च।

७६.३४च् संसेवितुः श्रोत्रसुखां च वाचं

७६.३४द् कुर्वन्ति काष्ठान्य् असकृद्भवानाम्॥

७६.३५अ कामं प्रदीपयति रूपम् अभिव्यनक्ति

७६.३५ब् सौभाग्यम् आवहति वक्त्र-सुगन्धितां च।

७६.३५च् ऊर्जं करोति कफजांश् च निहन्ति रोगांस्

७६.३५द् ताम्बूलम् एवम् अपरांश् च गुणान् करोति॥

७६.३६अ युक्तेन चूर्णेन करोति रागं

७६.३६ब् राग-क्षयं पूगफल-अतिरिक्तम्।

७६.३६च् चूर्ण-अधिकं वक्त्र-विगन्ध-कारि

७६.३६द् पत्र-अधिकं साधु करोति गन्धम्॥

७६.३७अ पत्र-अधिकं निशि हितं सफलं दिवा च

७६.३७ब् प्रोक्तान्य् अथाकरणम् अस्य विडम्बनैव।

७६.३७च् कक्कोल-पूग-लवलीफल-पारिजातैर्

७६.३७द् आमोदितं मदमुदा मुदितं करोति॥

७७ स्त्रीपुंससमायोगाध्यायः

७७.०१ शस्त्रेन वेणी-विनिगूहितेन विदूरथं स्वा महिषी जघान।

७७.०१ विष-प्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम्॥

७७.०२अ एवं विरक्ता जनयन्ति दोषान्

७७.०२ब् प्राणच्छिदो -अन्यैर् अनुकीर्तितैः किम्।

७७.०२च् रक्ताविरक्ताः पुरुषैर् अतो -अर्थात्

७७.०२द् परीक्षितव्याः प्रमदाः प्रयत्नात्॥

७७.०३अ स्नेहं मनोभवकृतं कथयन्ति भावा

७७.०३ब् नाभी-भुज-स्तन-विभूषण-दर्शनानि।

७७.०३च् वस्त्र-अभिसंयमन-केश-विमोक्षणानि

७७.०३द् भ्रूक्षेप-कम्पित-कटाक्ष-निरीक्षणानि॥

७७.०४अ उच्चैः ष्ठीवनम् उत्कट-प्रहसितं शय्या-आसन-उत्सर्पणं

७७.०४ब् गात्र-आस्फोटन-जृम्भणानि सुलभ-द्रव्य-अल्प-सम्प्रार्थना।

७७.०४च् बाल-आलिङ्गन-चुम्बनान्य् अभिमुखे सख्याः समालोकनं

७७.०४द् दृक्पातश् च पराङ्मुखे गुणकथा कर्णस्य कण्डूयनम्॥

७७.०५अ इमां च विन्द्याद् अनुरक्तचेष्टां

७७.०५ब् प्रियाणि वक्ति स्वधनं ददाति।

७७.०५च् विलोक्य संहृष्यति वीतरोषा

७७.०५द् प्रमार्ष्टि दोषान् गुणकीर्तनेन॥

७७.०६अ तन्मित्रपूजा तदरिद्विषत्वं

७७.०६ब् कृतस्मृतिः प्रोषित-दौर्मनस्यम्।

७७.०६च् स्तन-ओष्ठ-दानान्य् उपगूहनं च

७७.०६द् स्वेदो -अथ चुम्बा-प्रथम-अभियोगः॥

७७.०७अ विरक्त-चेष्टा भुकुटी[K.भृकुटी]-मुखत्वं

७७.०७ब् पराङ्मुखत्वं कृतविस्मृतिश् च।

७७.०७च् असम्भ्रमो दुष्परितोषता च

७७.०७द् तद्द्विष्ट-मैत्री परुषं च वाक्यम्॥

७७.०८अ स्पृष्ट्वा-अथ वा-आलोक्य धुनोति गात्रं

७७.०८ब् करोति गर्वं न रुणद्धि यान्तम्।

७७.०८च् चुम्बा-विरामे वदनं प्रमार्ष्टि

७७.०८द् पश्चात् समुत्तिष्ठति पूर्वसुप्ता॥

७७.०९ भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजिका।

७७.०९ मालाकारी दुष्टाङ्गना सखी नापिती दूत्यः॥

७७.१० कुलजन-विनाश-हेतुर् दूत्यो यस्माद् अतः प्रयत्नेन।

७७.१० ताभ्यः स्त्रियो -अभिरक्ष्या वंश-यशो-मान-वृद्ध्य्-अर्थम्॥

७७.११ रात्री-विहार-जागर-रोग-व्यपदेश-परगृह-ईक्षणिकाः।

७७.११ व्यसन-उत्सवाश् च सङ्केत-हेतवस् तेषु रक्ष्याश् च॥

७७.१२अ आदौ न-इच्छति न-उज्झति स्मरकथां व्रीडा-विमिश्र-आलसा

७७.१२ब् मध्ये ह्री-परिवर्जित-अभ्युपरमे लज्जा-विनम्र-आनना।

७७.१२च् भावैर् न-एकविधैः करोत्य् अभिनयं भूयश् च या सादरा

७७.१२द् बुद्ध्वा पुम्प्रकृतिं च या-अनुचरति ग्लानेतरैश् चेष्टितैः॥

७७.१३अ स्त्रीणां गुणा यौवन-रूप-वेष-

७७.१३ब् दाक्षिण्य-विज्ञान-विलास-पूर्वाः।

७७.१३च् स्त्री रत्नसंज्ञा च गुण-अन्वितासु

७७.१३द् स्त्री-व्याधयो -अन्याश् चतुरस्य पुंसः॥

७७.१४अ न ग्राम्य-वर्णैर् मलदिग्धकाया

७७.१४ब् निन्द्याङ्ग-संबन्धि-कथां च कुर्यात्।

७७.१४च् न च-अन्यकार्य-स्मरणं रहःस्था

७७.१४द् मनो हि मूलं हरदग्धमूर्तेः॥

७७.१५ श्वासं मनुष्येण समं त्यजन्ती बाहु-उपधान-स्तन-दान-दक्षा।

७७.१५ सुगन्ध-केशा सुसमीप-रागा सुप्ते -अनुसुप्ता प्रथमं विबुद्धा॥

७७.१६ दुष्ट-स्वभावाः परिवर्जनीया विमर्द-कालेषु च न क्षमा याः।

७७.१६ यासाम् असृग्-वा-असित-नील-पीतम् आताम्रवर्णं च न ताः प्रशस्ताः॥

७७.१७ या स्वप्नशीला बहु-रक्त-पित्ता प्रवाहिनी वात-कफ-अतिरक्ता[K.अतिरिक्ता]।

७७.१७ महाशना स्वेदयुताङ्गदुष्ठा या ह्रस्वकेशी पलितान्विता वा[K.च]॥

७७.१८अ मांसानि यस्याश् च चलन्ति नार्या

७७.१८ब् महोदरा खिक्खिमिनी च या स्यात्॥

७७.१८च् स्त्रीलक्षणे याः कथिताश् च पापास्

७७.१८द् ताभिर् न कुर्यात् सह कामधर्मम्॥

७७.१९ शश-शोणित-सङ्काशं लाक्षा-रस-सन्निकाशम् अथ-वा यत्।

७७.१९ प्रक्षालितं विरज्यति यच् च-असृक् तद् भवेत्-शुद्धम्॥

७७.२० यच् छब्द-वेदना-वर्जितं त्र्यहात् सन्निवर्तते रक्तम्।

७७.२० तत् पुरुष-सम्प्रयोगाद् अविचारं गर्भतां याति॥

७७.२१ न दिनत्रयं निषेव्यं[K.निषेवेत्] स्नानं माल्य-अनुलेपनं *स्त्रीभिः[K.च स्त्री]।

७७.२१ स्नायाच् चतुर्थ-दिवसे शास्त्र-उक्तेन-उपदेशेन॥

७७.२२ पुष्यस्नान-ओषधयो याः कथितास् ताभिर् अम्बु-मिश्राभिः।

७७.२२ स्नायात् तथात्र मन्त्रः स एव यस् तत्र निर्दिष्टः॥

७७.२३ युग्मासु किल मनुष्या निशासु नार्यो भवन्ति विषमासु।

७७.२३ दीर्घायुषः सुरूपाः सुखिनश् च विकृष्ट-युग्मासु॥

७७.२४ दक्षिण-पार्श्वे पुरुषो वामे नारी यमाव् उभयसंस्थौ॥

७७.२४ यद् उदरमध्य-उपगतं नपुंसकं तन् निबोद्धव्यम्॥

७७.२५अ केन्द्र-त्रिकोणेषु शुभस्थितेषु

७७.२५ब् लग्ने शशाङ्के च शुभैः समेते।

७७.२५च् पापैस् त्रिलाभारिगतैश् च यायात्

७७.२५द् पुंजन्मयोगेषु च सम्प्रयोगम्॥

७७.२६अ न नखदशनविक्षतानि कुर्याद्

७७.२६ब् ऋतुसमये पुरुषः स्त्रियाः कथञ् चित्।

७७.२६च् ऋतुर् अपि दश षट् च वासराणि

७७.२६द् प्रथम-निशात्रितयं न तत्र गम्यम्॥

७८ शय्यासनलक्षणाध्यायः

७८.०१ सर्वस्य सर्वकालं यस्माद् उपयोगम् एति शास्त्रम् इदम्।

७८.०१ राज्ञां विशेषतो -अतः शयन-आसन-लक्षणं वक्ष्ये॥

७८.०२ असन-स्पन्दन-चन्दन-हरिद्र-सुरदारु-तिन्दुकी-शालाः।

७८.०२ काश्मर्य्-अञ्जन-पद्मक-शाका वा शिंशपा च शुभाः॥

७८.०३ अशनि-जल-अनिल-हस्ति-प्रपातिता मधु-विहङ्ग-कृत-निलयाः।

७८.०३ चैत्य-श्मशान-पथिज-ऊर्ध्वशुष्क-वल्ली-निबद्धाश् च॥

७८.०४ कण्टकिनो *ये च[K.वा ये] स्युर् महानदी-सङ्गम-उद्भवा ये च।

७८.०४ सुरभवनजाश् च न शुभा ये च-अपर-याम्य-दिक्-पतिताः॥

७८.०५ प्रतिषिद्ध-वृक्ष-निर्मित-शयन-आसन-सेवनात् कुल-विनाशः।

७८.०५ व्याधि-भय-व्यय-कलहा भवन्त्य् अनर्था[K.अनर्थाश् च] अनेकविधाः॥

७८.०६ पूर्वच्छिन्नं यदि वा दारु भवेत् तत् परीक्ष्यम् आरम्भे।

७८.०६ यद्य् आरोहेत् तस्मिन् कुमारकः पुत्र-पशु-दं तत्॥

७८.०७ सितकुसुम-मत्त-वारण-दध्य्-अक्षत-पूर्णकुम्भ-रत्नानि।

७८.०७ मङ्गल्यान्य् अन्यानि च दृष्ट्वा-आरम्भे शुभं ज्ञेयम्॥

७८.०८ कर्माङ्गुलं यव-अष्टकम् उदर-आसक्तं तुषैः परित्यक्तम्।

७८.०८ अङ्गुलशतं नृपाणां महती शय्या जयाय कृता॥

७८.०९ नवतिः सैव षडूना द्वादशहीना त्रिषड्ढीना च।

७८.०९ नृप-पुत्र-मन्त्रि-बलपति-पुरोधसां स्युर् यथा-सङ्ख्यम्॥

७८.१० अर्धम् अतो -अष्टांशोनं विष्कम्भो विश्वकर्मणा प्रोक्तः।

७८.१० आयाम-त्र्यंश-समः पाद-उच्छ्रायः सकुक्ष्य[K.सकुक्षि]शिराः॥

७८.११ यः सर्वः श्रीपर्ण्या पर्यङ्को निर्मितः स धनदाता।

७८.११ असनकृतो रोगहरस् तिन्दुकसारेण वित्तकरः॥

७८.१२ यः केवलशिंशपया विनिर्मितो बहुविधं स वृद्धिकरः।

७८.१२ चन्दनमयो रिपुघ्नो धर्म-यशो-दीर्घ-जीवित-कृत्॥

७८.१३ यः पद्मक-पर्यङ्कः स दीर्घम् आयुः श्रियं शुतं वित्तम्।

७८.१३ कुरुते शालेन कृतः कल्याणं शाकरचितश् च॥

७८.१४ केवल-चन्दन-रचितं काञ्चन-गुप्तं विचित्र-रत्न-युतम्।

७८.१४ अध्यासन् पर्यङ्कं विबुधैर् अपि पूज्यते नृपतिः॥

७८.१५ अन्येन समायुक्ता न तिन्दुकी शिंशपा च शुभफलदा।

७८.१५ न *श्रीपर्णेन[K.श्रीपर्णी न] च देवदारुवृक्षो न च-अप्य् असनः॥

७८.१६ शुभदौ तु शाल-शाकौ[K.शाकशालौ] परस्परं संयुतौ पृथक् च-एव।

७८.१६ तद्वत् पृथक् प्रशस्तौ सहितौ च हरिद्रक-कदम्बौ॥

७८.१७ सर्वः स्पन्दन-रचितो न शुभः प्राणान् हिनस्ति च-अम्बकृतः।

७८.१७ असनो -अन्य-दारु-सहितः क्षिप्रं दोषान् करोति बहून्॥

७८.१८ अम्ब-स्पन्दन-चन्दन-वृक्षाणां स्पन्दनात्-शुभाः पादाः।

७८.१८ फल-तरुणा शयनासनम् इष्टफलं भवति सर्वेण॥

७८.१९ गज-दन्तः सर्वेषां प्रोक्त-तरूणां प्रशस्यते योगे।

७८.१९ कार्यो -अलङ्कारविधिर् गज-दन्तेन प्रशस्तेन॥

७८.२० दन्तस्य मूलपरिधिं द्विरायतं प्रोह्य कल्पयेत्-शेषम्।

७८.२० अधिकम् अनूपचराणां न्यूनं गिरिचारिणां किञ् चित्॥

७८.२१ *श्रीवृक्ष[K.श्रीवत्स]-वर्धमान-च्छत्र-ध्वज-चामर-अनुरूपेषु।

७८.२१ छेदे दृष्टेष्व् आरोग्य[K.अरोग्य]-विजय-धन-वृद्धि-सौख्यानि॥

७८.२२ प्रहरण-सदृशेषु जयो नन्द्यावर्ते प्रनष्ट-देश-आप्तिः।

७८.२२ लोष्टे[K.ऊ.लोष्टे] तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः॥

७८.२३ स्त्रीरूपे धननाशो[K.स्वविनाशो] भृङ्गारे -अभ्युत्थिते सुत-उत्पत्तिः।

७८.२३ कुम्भेन निधिप्राप्तिर् यात्राविघ्नं च दण्डेन॥

७८.२४ कृकलास-कपि-भुजङ्गेष्व् असुभिक्ष-व्याधयो रिपु-*वशित्वम्[K.वशत्वम्]।

७८.२४ गृध्र-उलूक-ध्वाङ्क्ष-श्येन-आकारेषु जनमरकः॥

७८.२५ पाशे -अथ वा कबन्धे नृप-मृत्युर् जनविपत् सुते रक्ते।

७८.२५ कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति॥

७८.२६ शुक्लः समः सुगन्धिः स्निग्धश् च शुभावहो भवेच् छेदः।

७८.२६ अशुभ-शुभच्छेदा ये शयनेष्व् अपि ते तथा फलदाः॥

७८.२७ ईषायोगे दारु प्रदक्षिण-अग्रं प्रशस्तम् आचार्यैः।

७८.२७ अपसव्य-एकदिगग्रे भवति भयं भूत-सङ्घनितम्॥

७८.२८ एकेन-अवाक्शिरसा[K.एकेनावाक्च्छिरसा] भवति हि पादेन पाद-वैकल्यम्।

७८.२८ द्वाभ्यां न जीर्यते -अन्नं त्रिचतुर्भिः क्लेश-वध-बन्धाः॥

७८.२९ सुषिरे -अथ वा विवर्णे ग्रन्थौ पादस्य शीर्षगे व्याधिः।

७८.२९ पादे कुम्भो यश् च ग्रन्थौ तस्मिन्न् उदररोगः॥

७८.३० कुम्भ-अधस्ताज् जङ्घा तत्र कृतो जङ्घयोः करोति भयम्।

७८.३० तस्याश् च-आधरो -अधः क्षयकृद् द्रव्यस्य तत्र कृतः॥

७८.३१ खुरदेशे यो ग्रन्थिः खुरिणां पीडाकरः स निर्दिष्टः।

७८.३१ ईषा-शीर्षण्योश् च त्रिभाग-संस्थो भवेन् न शुभः॥

७८.३२ निष्कुटम् अथ कोलाक्षं सूकरनयनं च वत्सनाभं च।

७८.३२ कालकम् अन्यद् धुन्धुकम् इति कथितश् छिद्र-संक्षेपः॥

७८.३३ घटवत् सुषिरं मध्ये सङ्कटम् आस्ये च निष्कुटं छिद्रम्।

७८.३३ निष्पाव-माषमात्रं नीलं छिद्रं च कोलाक्षम्॥

७८.३४ सूकरनयनं विषमं विवर्णम् अध्यर्ध-पर्व-दीर्घम् च।

७८.३४ वामावर्तं भिन्नं पर्वमितं वत्सनाभ-आख्यम्॥

७८.३५ कालकसंज्ञं कृष्णं धुन्धुकम् इति यद् भवेद् विनिर्भिन्नम्।

७८.३५ दारुसवर्णं छिद्रं न तथा पापं समुद्दिष्टम्॥

७८.३६ निष्कुट-सण्ज्ञे द्रव्यक्षयस् तु कोलेक्षणे कुल-ध्वंसः।

७८.३६ शस्त्र-भयं सूकरके रोगभयं वत्सनाभाख्ये॥

७८.३७ कालक-धुन्धुक-संज्ञं कीटैर् विद्धं च न शुभदं छिद्रम्।

७८.३७ सर्वं ग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु॥

७८.३८ एकद्रुमेण धन्यं वृक्ष-द्वय-निर्मितं च धन्यतरम्।

७८.३८ त्रिभिर् आत्मज-वृद्धिकरं चतुर्भिर् अर्थं[K.अर्थो] यशश् चाग्र्यम्॥

७८.३९ पञ्च-वनस्पति-रचिते पञ्चत्वं याति तत्र यः शेते।

७८.३९ षट्सप्ताष्टतरूणां काष्ठैर् घटिते कुलविनाशः॥

७९ रत्नपरीक्षाध्यायः

७९.०१ रत्नेन शुभेन शुभं भवति नृपाणाम् अनिष्टम् अशुभेन।

७९.०१ यस्माद् अतः परीक्ष्यं दैवं रत्नाश्रितम् तज्ज्ञैः॥

७९.०२ द्विप-हय-वनिता-आदीनां स्वगुणविशेषेण रत्नशब्दो -अस्ति।

७९.०२ इह तु-उपलरत्नानाम् अधिकारो वज्रपूर्वाणाम्॥

७९.०३ रत्नानि बलाद् दैत्याद् दधीचितो -अन्ये वदन्ति जातानि।

७९.०३ के चिद् भुवः स्वभावाद् वैचित्र्यं प्राहुर् उपलानाम्॥

७९.०४ वज्र-इन्द्रनील-मरकत-कर्केतर-पद्मराग-रुधिर-आख्याः।

७९.०४ वैदूर्य[K.वैडूर्य]-पुलक-विमलक-राजमणि-स्फतिक-शशिकान्ताः॥

७९.०५ सौगन्धिक-गोमेदक-शङ्ख-महानील-पुष्पराग-आख्याः।

७९.०५ ब्रह्ममणि-ज्योतीरस-सस्यक-मुक्ता-प्रवालानि॥

७९.०६ वेणा-तटे विशुद्धं शिरीषकुसुम*प्रभं[K.उपमं] च कौशलकम्।

७९.०६ सौराष्ट्रकम् आताम्रं कृष्णं सौर्पारकं वज्रम्॥

७९.०७ ईषत्-ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम्।

७९.०७ आपीतं च कलिङ्गे श्यामं पौण्ड्रेषु सम्भूतम्॥

७९.०८ ऐन्द्रं षडश्रि शुक्लं याम्यं सर्प-आस्य-रूपम् असितं च।

७९.०८ कदली-काण्ड-निकाशं वैष्णवम् इति सर्व-संस्थानम्॥

७९.०९ वारुणम् अबला-गुह्य-उपमं भवेत् कर्णिकार-पुष्प-निभम्।

७९.०९ शृङ्गाटक-संस्थानं व्याघ्र-अक्षि-निभं च हौतभुजम्॥

७९.१० वायव्यं च यव-उपमम् अशोक-कुसुम-प्रभं समुद्दिष्टम्।

७९.१० स्रोतः खनिः प्रकीर्णकम् इत्य् आकर-सम्भवस् त्रिविधः॥

७९.११ रक्तं पीतं च शुभम् राजन्यानाम् सितम् द्विजातीनाम्।

७९.११ शैरीषं वैश्यानां शूद्राणां शस्यते -असिनिभम्॥

७९.१२ सितसर्षप-अष्टकं तण्डुलो भवेत् तण्डुलैस् तु विंशत्या।

७९.१२ तुलितस्य द्वे लक्षे मूल्यं द्विद्व्यूनिते चैतत्॥

७९.१३ पाद-त्र्यंश-अर्ध-ऊनं त्रिभाग-पञ्चांश-षोडश-अंशाश् च।

७९.१३ भागश् च पञ्चविंशः शतिकस् साहस्रिकश् च-इति॥

७९.१४ सर्व-द्रव्य-आभेद्यं लघ्व् अम्भसि तरति रश्मिवत् स्निग्धम्।

७९.१४ तडिद्-अनल-शक्रचाप-उपमं च वज्रं हिताय-उक्तम्॥

७९.१५ काकपद-मक्षिका-केश-धातु-युक्तानि शर्करैर्[K.शर्करा] विद्धम्।

७९.१५ द्विगुणाश्रि दग्ध[K.दिग्ध]-कलुष-त्रस्त-विशीर्णानि न शुभानि॥

७९.१६ यानि च बुद्बुद-दलित-अग्र-चिपिट-वासीफल-प्रदीर्घाणि।

७९.१६ सर्वेषां चैतेषां मूल्याद् भागो -अष्टमो हानिः॥

७९.१७अ वज्रं न किञ् चिद् अपि धारयितव्यम् एके

७९.१७ब् पुत्र-अर्थिनीभिर् अबलाभिर् उशन्ति तज्ज्ञाः।

७९.१७च् शृङ्गाटक-त्रिपुट-धान्यकवत् स्थितं यच्

७९.१७द् श्रोणीनिभं च शुभदं तनय-अर्थिनीनाम्॥

७९.१८ स्वजन-विभव-जीवित-क्षयं जनयति वज्रम् अनिष्ट-लक्षणम्।

७९.१८ अशनि-विष-भय-अरिनाशनम् शुभम् उपभोग-करं[K.उरु-भोगकर] च भूभृताम्॥

८० मुक्तालक्षणाध्यायः

८०.०१ द्विप-भुजग-शुक्ति-शङ्ख-अभ्र-वेणु-तिमि-सूकर-प्रसूतानि।

८०.०१ मुक्ताफलानि तेषां बहुसाधु च शुक्तिजं भवति॥

८०.०२ सिंहलक-पारलौकिक-सौराष्ट्रिक-ताम्रपर्णि-पारशवाः।

८०.०२ कौबेर-पाण्ड्यवाटक-हैमा इत्य् आकरास् त्व्[K.ह्य्] अष्टौ॥

८०.०३ बहुसंस्थानाः स्निग्धाः[K.स्निग्धा] हंसाभाः सिंहलाकराः स्थूलाः।

८०.०३ ईषत्ताम्राः श्वेतास् तमोवियुक्ताश् च ताम्राख्याः॥

८०.०४ कृष्णाः श्वेताः पीताः सशर्कराः पारलौकिका विषमाः।

८०.०४ न स्थूला नात्यल्पा नवनीत-निभाश् च सौराष्ट्राः॥

८०.०५ ज्योतिष्मत्यः[K.मन्तः] शुभ्रा गुरवो -अतिमहागुणाश् च पारशवाः।

८०.०५ लघु जर्जरं दधिनिभं *बृहद् द्विसंस्थानम्[K.बृहद्विसंस्थानम्] अपि हैमम्॥

८०.०६ विषमम् कृष्ण-श्वेतं[K.कृष्णम् श्वेतम्] लघु कौबेरं प्रमाण-तेजोवत्।

८०.०६ निम्बफल-त्रिपुट-धान्यक-चूर्णाः स्युः पाण्ड्यवाटभवाः॥

८०.०७ अतसीकुसुम-श्यामम् वैष्णवम् ऐन्द्रं शशाङ्क-सङ्काशम्।

८०.०७ हरिताल-निभं वारुणम् असितं यमदैवतं भवति॥

८०.०८ परिणत-दाडिम-गुलिका-गुञ्जा-ताम्रं च वायुदैवत्यम्।

८०.०८ निर्धूम-अनल-कमल-प्रभं च विज्ञेयम् आग्नेयम्॥

८०.०९ माषक-चतुष्टय-धृतस्य-एकस्य शताहता त्रिपञ्चाशत्।

८०.०९ कार्षापणा निगदिता मूल्यं तेजोगुणयुतस्य॥

८०.१० माषक-दलहान्यातो द्वात्रिंश-द्विंशतिस् त्रयोदश च।

८०.१० अष्टौ च शतानि शतत्रयं त्रिपञ्चाशता सहितम्॥

८०.११ पञ्चत्रिंशं शतम् इति चत्वारः कृष्णला नवतिमूल्याः।

८०.११ सार्धास् तिस्रो गुञ्जाः सप्ततिमूल्यं धृतं रूपम्॥

८०.१२ गुञ्जा-त्रयस्य मूल्यं पञ्चाशद् रूपका गुणयुतस्य।

८०.१२ रूपक-पञ्च-त्रिंशत्-त्रयस्य गुञ्जा-अर्धहीनस्य॥

८०.१३ पलदशभागो धरणं तद् यदि मुक्तास् त्रयोदश सुरूपाः।

८०.१३ *त्रिशती[U - त्रिंशती] सपञ्चविंशा रूपकसङ्ख्या कृतं मूल्यम्॥

८०.१४ षोडशकस्य द्विशती विंशतिरूपस्य सप्ततिः सशता।

८०.१४ यत्पञ्चविंशतिधृतं तस्य शतं त्रिंशता सहितम्॥

८०.१५ त्रिंशत्सप्ततिमूल्यं चत्वारिंशच्छतार्ध-मूल्यं[K.मूल्या] च।

८०.१५ षष्टिः पञ्चोना वा धरणम् पञ्च-अष्टकं मूल्यम्॥

८०.१६ मुक्ताशीत्या त्रिंशच्छतस्य सा पञ्चरूपकविहीना।

८०.१६ द्वित्रिचतुःपञ्चशता द्वादशषट्पञ्चकत्रितयम्॥

८०.१७ पिक्का-पिच्चा-अर्घा-अर्धा रवकः सिक्थं त्रयोदश-आद्यानाम्।

८०.१७ संज्ञाः परतो निगराश् चूर्णाश् च-अशीतिपूर्वाणाम्॥

८०.१८ एतद्-गुणयुक्तानां धरण-धृतानां प्रकीर्तितं[K.प्रकीतितम्] मूल्यम्।

८०.१८ परिकल्प्यम् अन्तराले हीनगुणाणां क्षयः कार्यः॥

८०.१९ कृष्ण-श्वेतक-पीतक-ताम्राणाम् ईषद् अपि च विषमाणाम्।

८०.१९ त्र्यंशोनम् विषमक-पीतयोश् च षड्भाग-दलहीनम्॥

८०.२० ऐरावत-कुलजानां पुष्य-श्रवण-इन्दु-सूर्य-दिवसेषु।

८०.२० ये चोत्तरायणभवा ग्रहणे -अर्केन्द्वोश् च भद्रेभाः॥

८०.२१ तेषां किल जायन्ते मुक्ताः कुम्भेषु सरदकोशेषु।

८०.२१ बहवो बृहत्प्रमाणा बहुसंस्थानाः प्रभायुक्ताः॥

८०.२२ नैषाम् अर्घः कार्यो न च वेधो -अतीव ते प्रभायुक्ताः।

८०.२२ सुत-विजय-आरोग्य-करा महापवित्रा धृता राज्ञाम्॥

८०.२३ दंष्ट्रामूले शशिकान्तिसप्रभं बहुगुणं च वाराहम्।

८०.२३ तिमिजं मत्स्य-अआक्षि-इभं बृहत् पवित्रं बहुगुणं च॥

८०.२४ वर्ष-उपलवज्रातं वायुस्कन्धाच् च सप्तमाद् भ्रष्टम्।

८०.२४ ह्रियते किल खाद् दिव्यैस् तडित्-प्रभं मेघ-सम्भूतम्॥

८०.२५ तक्षक-वासुकि-कुलजाः कामगमा ये च पन्नगास् तेषाम्।

८०.२५ स्निग्धा नीलद्युतयो भवन्ति मुक्ताः फणस्यान्ते॥

८०.२६ शस्ते -अवनिप्रदेशे रजतमये भाजने स्थिते च यदि।

८०.२६ वर्षति देवो -अकस्मात् तज्ज्ञेयं नागसम्भूतम्॥

८०.२७ अपहरति विषमलक्ष्मीं क्षपयति शत्रून् यशो विकाशयति।

८०.२७ भौजङ्गं नृपतीनां धृतम् अकृतार्घं विजयदं च॥

८०.२८ कर्पूर-स्फटिक-निभं चिपिटं विषमं च वेणुजं ज्ञेयम्।

८०.२८ शङ्ख-उद्भवं शशिनिभं वृत्तं भ्राजिष्णु रुचिरं च॥

८०.२९ शङ्ख-तिमि-वेणु-वारण-वराह-भुजग-अभ्रजान्य् *अवैद्यानि[K.अवैध्यानि ऊ.अवेद्यानि]।

८०.२९ अमितगुणत्वाच् च-एषाम् अर्घः शास्त्रे न निर्दिष्टः॥

८०.३०अ एतानि सर्वाणि महागुणानि

८०.३०ब् सुता-अर्थ-सौभाग्य-यशस्-कराणि।

८०.३०च् रुक्-शोक-हन्तॄणि च पार्थिवानां

८०.३०द् मुक्ताफलानि-ईप्सित-कामदानि॥
८०.३१ सुरभूषणं लतानां सहस्रम् अष्टोत्तरं चतुर्हस्तम्।

८०.३१ इन्दुच्छन्दो[K.इन्द्रच्छन्दो] नाम्ना विजयच्छन्दस् तदर्धेन॥

८०.३२ शतम् अष्टयुतं हारो देवच्छन्दो ह्य् अशीतिर् एकयुता।

८०.३२ अष्टाष्टको -अर्धहारो रश्मिकलापश् च नवषट्कः॥

८०.३३ द्वात्रिंशता तु गुच्छो विंशत्या कीर्तितो -अर्धगुच्छाख्यः।

८०.३३ षोडशभिर् माणवको द्वादशभिश् च-अर्धमाणवकः॥

८०.३४ मन्दरसंज्ञो -अष्टाभिः पञ्चलता हारफलकम् इत्य् उक्तम्।

८०.३४ सप्तविंशतिमुक्ता हस्तो नक्षत्रमाला-इति॥

८०.३५ अन्तरमणिसंयुक्ता मणिसोपानं सुवर्णगुलिकैर् वा।

८०.३५ तरलक-मणि-मध्यं तद्विज्ञेयं चाटुकारम् इति॥

८०.३६अ एकावली नाम यथेष्ट-सङ्ख्या

८०.३६ब् हस्तप्रमाणा मणि-विप्रयुक्ता।

८०.३६च् संयोजिता या मणिना तु मध्ये

८०.३६द् यष्टि-इति सा भूषणविद्भिर् उक्तम्॥

८१ पद्मरागलक्षणाद्यायः

८१.०१ सौगन्धिक-कुरुविन्द-स्फटिकेभ्यः पद्मराग-सम्भूतिः[Kऽस् त्र्. पद्मरागो सम्भूतिः]।

८१.०१ सौगन्धिकजा भ्रमर-अञ्जन-अब्ज-जम्बू-रस-द्युतयः॥

८१.०२ कुरुविन्द-भवाः शबला मन्द-द्युतयश् च धातुभिर् विद्धाः।

८१.०२ स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश् च॥

८१.०३ स्निग्धः प्रभानुलेपी स्वच्छो -अर्चिष्मान् गुरुः सुसंस्थानः।

८१.०३ अन्तःप्रभो -अतिरागो[K.अतिरागा] मणिरत्नगुणाः समस्तानाम्॥

८१.०४ कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः।

८१.०४ दुर्विद्धा न मनोज्ञाः सशर्कराश् च-इति मणिदोषाः॥

८१.०५ भ्रमर-शिखि-कण्ठ-वर्णो दीप-शिखा-सप्रभो भुजङ्गानाम्।

८१.०५ भवति मणिः किक मूर्धनि यो -अनर्घेयः स विज्ञेयः॥

८१.०६अ यस् तं बिभर्ति मनुजाधिपतिर् न तस्य

८१.०६ब् दोषा भवन्ति विष-रोग-कृताः कदा चित्।

८१.०६च् राष्ट्रे च नित्यम् अभिवर्षति तस्य देवः

८१.०६द् शत्रूंश् च नाशयति तस्य मणेः प्रभावात्॥

८१.०७ षड्विंशतिः सहस्राण्य् एकस्य मणेः पल-प्रमाणस्य।

८१.०७ कर्ष-त्रयस्य विंशतिर् उपदिष्टा पद्मरागस्य॥

८१.०८ अर्धपलस्य द्वादश कर्षस्य एकस्य षट्सहस्राणि।

८१.०८ यच् च-अष्ट-माषक-धृतं तस्य सहस्रत्रयं मूल्यम्॥

८१.०९ माषक-चतुष्टयं दश-शत-क्रयं द्वौ तु पञ्चशतमूल्यौ।

८१.०९ परिकल्प्यम् अन्तराले मूल्यं हीन-अधिक-गुणानाम्॥

८१.१० वर्णन्यू ऊनस्य-अर्धं तेजोहीनस्य मूल्यम् अष्टांशम्।

८१.१० अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम्॥

८१.११ आधूम्रं व्रणबहुलं स्वल्पगुणं चाप्नुयाद् द्विशतभागम्।

८१.११ इति पद्मराग-मूल्यं पूर्वाचार्यैः समुद्दिष्टम्॥

८२ मरकतलक्षणाध्यायः।

८२.०१ शुक-वंशपत्र-कदली-शिरीषकुसुमप्रभं गुणोपेतम्।

८२.०१ सुर-पितृ-कार्ये मरकतम्[K.रकतम्] अतीव शुभदं नृणां विहितम्[K.विधृतम्]॥

८३ दीपलक्षणाध्यायः

८३.०१अ वामावर्तो मलिनकिरणः सस्फुलिङ्गो -अल्पमूर्तिः

८३.०१ब् क्षिप्रं नाशं व्रजति विमल-स्नेह-वर्त्य्-अन्वितो -अपि।

८३.०१च् दीपः पापं कथयति फलं शब्दवान् वेपनश् च

८३.०१द् व्याकीर्ण-अर्चिर् विशलभ-मरुद्यश् च नाशं प्रयाति॥

८३.०२अ दीपः संहत-मूर्तिर् आयत-तनुर् निर्वेपनो दीप्तिमान्

८३.०२ब् निःशब्दो रुचिरः प्रदक्षिणगतिर् वैदूर्य[K.वैडूर्य]हेमद्युतिः।

८३.०२च् लक्ष्मीं क्षिप्रम् अभिव्यनक्ति सुचिरं[K.रुचिरं, Kऽस् त्र्. सुचिरम्] यश् च-उद्यतं दीप्यते

८३.०२द् शेषं लक्षणम् अग्रिलक्षणसमं योज्यं यथायुक्ततः॥

८४ दन्तकाष्ठलक्षणाध्यायः

८४.०१अ वल्ली-लता-गुल्म-तरु-प्रभेदैः

८४.०१ब् स्युर् दन्तकाष्ठानि सहस्रशो यैः।

८४.०१च् फलानि वाच्यान्य् अथ[K.अति] तत्प्रसङ्गो

८४.०१द् मा भूद् अतो वच्म्य् अथ कामिकानि॥

८४.०२अ अज्ञातपूर्वाणि न दन्तकाष्ठान्य्

८४.०२ब् अद्यान् न पत्रैश् च समन्वितानि।

८४.०२च् न युग्मपर्वाणि न पाटितानि

८४.०२द् न च-ऊर्ध्वशुष्काणि विना त्वचा च॥

८४.०३अ वैकङ्कत-श्रीफल-काश्मरीषु

८४.०३ब् ब्राह्मी द्युतिः क्षेमतरौ सुदाराः।

८४.०३च् वृद्धिर् वटे -अर्के प्रचुरं च तेजः

८४.०३द् पुत्रा मधूके सगुणाः[K.ककुभे] प्रियत्वम्॥

८४.०४अ लक्ष्मीः शिरीषे च तथा करञ्जे

८४.०४ब् प्लक्षे -अर्थ-सिद्धिः समभीप्सिता स्यात्।

८४.०४च् मान्यत्वम् आयाति जनस्य जात्यां

८४.०४द् प्राधान्यम् अश्वत्थ-तरौ वदन्ति॥

८४.०५अ आरोग्यम् आयुर् बदरी-बृहत्योर्

८४.०५ब् ऐश्वर्य-वृद्धिः खदिरे सबिल्वे।

८४.०५च् द्रव्याणि च-इष्टान्य् अतिमुक्तके स्युः

८४.०५द् प्राप्नोति तान्य् एव पुनः कदम्बे॥

८४.०६अ नीपे[K.निम्बे] -अर्थाप्तिः करवीरे -अन्नलब्धिर्

८४.०६ब् भाण्डीरे स्याद् *अन्नम् एवं[K.इदम् एव] प्रभूतम्।

८४.०६च् शम्यां शतून् अपहन्त्य् अर्जुने च

८४.०६द् श्यामायां च द्विषताम् एव नाशः॥

८४.०७अ शाले -अश्वकर्णे च वदन्ति गौरवं

८४.०७ब् सभद्रदारान् अपि चाटरूषके।

८४.०७च् वाल्लभ्यम् आयाति जनस्य सर्वतः

८४.०७द् प्रियङ्गु-अपामार्ग-सजम्बु-दाडिमैः॥

८४.०८अ उदङ्मुखः प्राङ्मुख एव वा-अब्दं

८४.०८ब् कामं यथेष्टं[U - यथेष्टं] हृदये निवेश्य।

८४.०८च् अद्याद् अनिन्दन्[K.अनिन्द्यं] च सुख-उपविष्टः

८४.०८द् प्रक्षाल्य जह्याच् च शुचिप्रदेशे॥

८४.०९अ अभिमुख-पतितं प्रशान्त-दिक्-स्थं

८४.०९ब् शुभम् अतिशोभनम् ऊर्ध्वसंस्थितं यत्।

८४.०९च् अशुभकरम् अतो -अन्यथा प्रदिष्टं

८४.०९द् स्थित-पतितं च करोति मृष्टम् अन्नम्॥

८५ शाकुनाध्यायः

८५.०१ यत्-शक्र-शुक्र[K.शुक्रशक्र]-वागीश-कपिष्ठल-गरुत्मताम्।

८५.०१ मतेभ्यः प्राह ऋषभो भागुरेर् देवलस्य च॥

८५.०२ भारद्वाज-मतं दृष्ट्वा यच् च श्रीद्रव्यवर्धनः।

८५.०२ आवन्तिकः प्राह नृपो महाराज-अधिराजकः॥

८५.०३ सप्तर्षीणां मतं यच् च संस्कृतं प्राकृतं च यत्।

८५.०३ यानि च-उक्तानि गर्ग-आद्यैर् यात्राकारैश् च भूरिभिः॥

८५.०४ तानि दृष्ट्वा चकार-इमं सर्वशाकुनसंग्रहम्।

८५.०४ वराहमिहिरः प्रीत्या शिष्याणां ज्ञानम् उत्तमम्॥

८५.०५ अन्य-जन्म-अन्तरकृतं कर्म पुंसां शुभ-अशुभम्।

८५.०५ यत् तस्य शकुनः पाकं निवेदयति गच्छताम्॥

८५.०६ ग्राम-आरण्य-अम्बु-भू-व्योम-द्यु-निश-उभय-चारिणः।

८५.०६ रुत-यात-ईक्षित-उक्तेषु ग्राह्याः पुं-स्त्री-नपुंसकाः[K.स्त्रीपुन्नपुंसकाः]॥

८५.०७ पृथग् जात्य्-अनवस्थानाद् एषां व्यक्तिर् न लक्ष्यते।

८५.०७ सामान्य-लक्षण-उद्देशे श्लोकाव् ऋषिकृताव् इमौ॥

८५.०८ पीन-उन्नत-विकृष्ट-अंसाः पृथुग्रीवाः सुवक्षसः।

८५.०८ स्वल्प-गम्भीर-विरुताः पुंांसः स्थिर-विक्रमाः॥

८५.०९ तनु-उरस्क-शिरो-ग्रीवाः सूक्ष्म-आस्य-पद-विक्रमाः।

८५.०९ प्रसक्त-मृदु-भाषिण्यः स्त्रियो -अतो -अन्यन् नपुंसकम्॥

८५.१० ग्राम-अरण्य-प्रचार-आद्यं लोकाद् एव-उपलक्षयेत्।

८५.१० संचिक्षिप्सुर् अहं वच्मि यात्रा-मात्र-प्रयोजनम्॥

८५.११ पथ्य्-आत्मानं नृपं सैन्ये पुरे च-उद्दिश्य देवताम्।

८५.११ सार्थे प्रधानं साम्ये[K.साम्यं] स्याज् जाति-विद्या-वयो -अधिकम्॥

८५.१२ मुक्त-प्राप्त-एष्यद्-अर्कासु फलं दिक्षु तथाविधम्।

८५.१२ अङ्गार[K.अङ्गारि]-दीप्त-धूमिन्यस् ताश् च शान्तास् ततो -अपराः[K.-अपरा, Kऽस् त्र्. अपराः]॥

८५.१३ तत्-पञ्चम-दिशां तुल्यं शुभं त्रैकाल्यम् आदिशेत्।

८५.१३ परिशेषदिशोर्[K.परिशेषयोर्] वाच्यं यथासन्नं शुभ-अशुभम्॥

८५.१४ शीघ्रम् आसन्न-निम्नस्थैश् चिराद् उन्नत-दूरगैः।

८५.१४ स्थान-वृद्ध्य्-उपघाताच् च तद्वद् ब्रूयात् फलं पुनः॥

८५.१५ क्षण-तिथ्य्-उडु-वात-अर्कैर् देवदीप्तो यथोत्तरम्।

८५.१५ क्रियादीप्तो गति-स्थान-भाव-स्वर-विचेष्टितैः॥

८५.१६ दशधा-एवं प्रशान्तो -अपि सौम्यस् तृण-फल-अशनः।

८५.१६ मांस-अमेध्य-अशने रौद्रो विमिश्रो -अन्न-अशनः स्मृतः॥

८५.१७ हर्म्य-प्रासाद-मङ्गल्य-मनोज्ञ-स्थान-संस्थिताः।

८५.१७ श्रेष्ठा मधुर-सक्षीर-फल-पुष्प-द्रुमेषु च॥

८५.१८ स्वकाले गिरि-तोय-स्था बलिनो द्युनिशाचराः।

८५.१८ क्लीब-स्त्री-*पुरुषा ज्ञेया[K.पुरुशाश् च एषां] बलिनः स्युर् यथोत्तरम्॥

८५.१९ जव-जाति-बल-स्थान-हर्ष-सत्त्व-स्वर-अन्विताः।

८५.१९ स्वभूमाव् अनुलोमाश् च तद्-ऊनाः स्युर् विवर्जिताः॥

८५.२० कुक्कुट-इभ-पिरिल्यश् च शिखि-वञ्जुल-छिक्कराः।

८५.२० बलिनः सिंहनादश् च कूटपूरी च पूर्वतः॥

८५.२१ क्रोष्टुक-उलूक-हारीत-काक-कोक-ऋक्ष-पिङ्गलाः।

८५.२१ कपोत-रुदित-आक्रन्द-क्रूर-शब्दाश् च याम्यतः॥

८५.२२ गो-शश-क्रौञ्च-लोमाश-हंस-उत्क्रोश-कपिञ्जलाः।

८५.२२ विडाल-उत्सव-वादित्र-गीत-हासाश् च वारुणाः॥

८५.२३ शतपत्र-कुरङ्ग-आखु-मृग-एकशफ-कोकिलाः।

८५.२३ चाष-शल्यक-पुण्याह-घण्टा-शङ्ख-रवा उदक्॥

८५.२४ न ग्राम्यो -अरण्यगो ग्राह्यो न-आरण्यो ग्राम्य-संस्थितः[K.ग्रामसंस्थितः]।

८५.२४ दिवाचरो न शर्वर्यां न च नक्तंचरो दिवा॥

८५.२५ द्वन्द्व-रोगार्दित-त्रस्ताः कलह-आमिष-काङ्क्षिणः

८५.२५ आपग-अन्तरिता मत्ता न ग्राह्याः शकुनाः क्व चित्॥

८५.२६ रोहित-अश्व-अज-*वालेयाः कुरङ्ग[K.वालेयकुरङ्ग]-उष्ट्र-मृगाः शशः।

८५.२६ निष्फलाः शिशिरे ज्ञेया वसन्ते काक-कोकिलौ॥

८५.२७ न तु भाद्रपदे ग्राह्याः सूकर-श्व-वृक-आदयः।

८५.२७ शारद्य[K.शरद्य]-अब्ज-अद-गो-क्रौञ्चाः श्रावणे हस्ति-चातकौ॥

८५.२८ व्याघ्र-ऋक्ष-वानर-द्वीपि-महिषाः सबिलेशयाः।

८५.२८ हेमन्ते निष्फला ज्ञेया बालाः सर्वे विमानुषाः॥

८५.२९ ऐन्द्र-अनल-दिशोर् मध्ये त्रिभागेषु व्यवस्थिताः।

८५.२९ कोशाध्यक्ष-अनलाजीवि-तपोयुक्ताः प्रदक्षिणम्॥

८५.३० शिल्पी भिक्षुर् विवस्त्रा स्त्री याम्य-अनल-दिग्-अन्तरे।

८५.३० परतश् च-अपि मातङ्ग-गोप-धर्मसमाश्रयाः॥

८५.३१ नैरृती-वारुणी-मध्ये प्रमदा-सूति-तस्कराः।

८५.३१ शौण्डिकः शाकुनी हिंस्रो वायव्या[K.वायव्य]-पश्चिम-अन्तरे॥

८५.३२ विषघातक-गोस्वामि-कुहकज्ञास् ततः परम्।

८५.३२ धनवान् ईक्षणीकश् च मालाकारः परं ततः॥

८५.३३ वैष्णवश् चरकश् च-एव वाजिनां रक्षणे रतः।

८५.३३ *द्वात्रिंशद् एवं[K.एवं द्वात्रिंशतो] भेदाः स्युः पूर्वदिग्भिः सह-उदिताः॥

८५.३४ राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।

८५.३४ राजाध्यक्षश्[K.ऊ.गजाध्यक्षश्] च पूर्वाद्याः क्षत्रिय-आद्याश् चतुर्दिशम्॥

८५.३५ गच्छतस् तिष्ठतो वा-अपि दिशि यस्यां व्यवस्थितः।

८५.३५ विरौति शकुनो वाच्यस् तद्दिग्जेन समागमः॥

८५.३६ भिन्न-भैरव-दीन-आर्त-परुष-क्षाम-जर्जराः।

८५.३६ स्वना[K.स्वरा] न-इष्टाः शुभाः शान्त[K.शान्ता]-हृष्ट-प्रकृति-पूरिताः॥

८५.३७ शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका।

८५.३७ सूकरी परपुष्टा च पुन्नामानश् च वामतः॥

८५.३८ स्त्रीसंज्ञा भास-भषक-कपि-श्रीकर्ण-*धिक्कराः[K.छिक्कराः]।

८५.३८ शिखि-श्रीकण्ठ-पिप्पीक-रुरु-श्येनाश् च दक्षिणाः॥

८५.३९ क्ष्वेड-आस्फोटित-पुण्याह-गीत-शङ्ख-अम्बु-निःस्वनाः।

८५.३९ सतूर्य-अध्ययनाः पुंवत् स्त्रीवद् अन्या गिरः शुभाः॥

८५.४० ग्रामौ मध्यम-षड्जौ तु गान्धारश् च-इति शोभनाः।

८५.४० षड्ज[K.षड्जा]-मध्यम-गान्धारा ऋषभश् च स्वरा हिताः॥

८५.४१ रुत-कीर्तन-दृष्टेषु भारद्वाज-अज-बर्हिणः।

८५.४१ धन्या नकुल-चाषौ च सरटः पापदो -अग्रतः॥

८५.४२ जाहक-अहि-शश-क्रोड-गोधानां कीर्तनं शुभम्।

८५.४२ *रुतं सन्दर्शनं[K.रतसन्दर्शनं] न-इष्टं प्रतीपं वानर-ऋक्षयोः॥

८५.४३ ओजाः प्रदक्षिणं शस्ता मृगाः सनकुल-अण्डजाः।
८५.४३ चाषः सनकुलो वामो भृगुर् आह-अपराह्णतः॥

८५.४४ छिक्करः कूटपूरी च पिरिली चाह्नि दक्षिणाः।

८५.४४ अपसव्याः सदा शस्ता दंष्ट्रिणः सबिलेशयाः॥

८५.४५ श्रेष्ठे हयसिते प्राच्यां शवमांसे च दक्षिणे।

८५.४५ कन्यका-दधिनी पश्चाद् उदग् गो-विप्र-साधवः॥

८५.४६ जाल-श्व-चरणौ न-इष्टौ प्राग् याम्यौ शस्त्र-घातकौ।

८५.४६ पश्चाद् आसव-षण्ढौ च खल-आसन-हलान्य् उदक्॥

८५.४७ कर्म-सङ्गम-युद्धेषु प्रवेशे नष्ट-मार्गणे।

८५.४७ यान-व्यस्तगता ग्राह्या विशेषश् च-अत्र वक्ष्यते॥

८५.४८ दिवा प्रस्थानवद् ग्राह्याः कुरङ्ग-रुरु-वानराः।

८५.४८ अह्नश् च प्रथमे भागे चाष-वञ्जुल-कुक्कुटाः॥

८५.४९ पश्चिमे शर्वरी-भागे नक्तृक-उलूक-पिङ्गलाः।

८५.४९ सर्व एव विपर्यस्ता ग्राह्याः सार्थेषु योषिताम्॥

८५.५० नृप-सन्दर्शने ग्राह्यः प्रवेशे -अपि प्रयाणवत्।

८५.५० गिर्य्-अरण्य-*प्रवेशेषु[K.प्रवेशे च] नदीनां च-अवगाहने॥

८५.५१ वाम-दक्षिणगौ शस्तौ यौ तु ताव् अग्र-पृष्ठगौ।

८५.५१ क्रियादीप्तौ विनाशाय यातुः परिघ-संज्ञितौ॥

८५.५२ ताव् एव तु यथाभागं प्रशान्त-रुत-चेष्टितौ।

८५.५२ शकुनौ शकुन-द्वार-संज्ञिताव् अर्थ-सिद्धये॥

८५.५३ के चित् तु शकुन-द्वारम् इच्छन्त्य् उभयतः स्थितैः।

८५.५३ शकुनैर् एकजातीयैः शान्त-चेष्टा-विराविभिः॥

८५.५४ विसर्जयति यद्य् एक एकश् च प्रतिषेधति।

८५.५४ स विरोधो -अशुभो यातुर् ग्राह्यो यो[K.ऊ.वा] बलवत्तरः॥

८५.५५ पूर्वं प्रावेशिको[K.प्रावेशेको] भूत्वा पुनः प्रास्थानिको भवेत्।

८५.५५ सुखेन सिद्धिम् आचष्टे प्रवेशे तद्-विपर्ययात्[K.तद्विपर्ययः]॥

८५.५६ विसर्ज्य शकुनः पूर्वं स एव निरुणद्धि चेत्।

८५.५६ प्राह यातुर् अरेर् मृत्युं डमरं रोगम् एव वा॥

८५.५७ अपसव्यास् तु शकुना दीप्ता भय-निवेदिनः।

८५.५७ आरम्भे शकुनो दीप्तो वर्षान्तस् तद्भयङ्करः॥

८५.५८ तिथि-वाय्व्-अर्क-भ-स्थान-चेष्टा-दीप्ता यथाक्रमम्।

८५.५८ धन-सैन्य-बल-अङ्ग-इष्ट-कर्मणां स्युर् भयङ्कराः॥

८५.५९ जीमूतध्वनिदीप्तेषु भयं भवति मारुतात्।

८५.५९ उभयोः सन्ध्ययोर् दीप्ताः शस्त्र-उद्भव-भयङ्कराः॥

८५.६० चिति-केश-कपालेषु मृत्यु-बन्ध-वध-प्रदाः।

८५.६० कण्टकी-काष्ठ-भस्मस्थाः कलह-आयास-दुःखदाः॥

८५.६१ अप्रसिद्धिं भयं वा-अपि निःसार-अश्म-व्यवस्थिताः।

८५.६१ कुर्वन्ति शकुना दीप्ताः शान्ता याप्य-फलास् तु ते॥

८५.६२ असिद्धिसिद्धिदौ ज्ञेयौ निर्हार-आहार[K.निर्हादाहार]कारिणौ।

८५.६२ स्थानाद् रुवन् व्रजेद् यात्रां शंसते त्व् अन्यथागमम्॥

८५.६३ कलहः स्वरदीप्तेषु स्थानदीप्तेषु विग्रहः।

८५.६३ उच्चम् आदौ स्वरं कृत्वा नीचं पश्चाच् च दोषकृत्[K.मोषकृत्]॥

८५.६४ एक-स्थाने रुवन् दीप्तः सप्ताहाद् ग्राम-घातकः[K.ग्रामघातकृत्]।

८५.६४ पुर-देश-नरेन्द्राणाम् ऋत्व्-अर्धायन-वत्सरात्

८५.६५ सर्वे दुर्भिक्ष-कर्तारः स्वजातिपिशित-अशिनः[K.अशनाः]॥

८५.६५ सर्प-मूषक-मार्जार-*पृथुलोम[K.पृथुरोम]-विवर्जिताः॥

८५.६६ परयोनिषु गच्छन्तो मैथुनं देशनाशनाः।

८५.६६ अन्यत्र वेसर-उत्पत्तेर् नृणां च-अजाति-मैथुनात्॥

८५.६७ बन्ध-घात-भयानि स्युः पाद-ऊरू-मस्तक-अन्तिगैः।

८५.६७ शष्प-अपः[K.अपशष्प]-पिशित-अन्न-अदैर् *दोष-वर्ष-क्षय[K.वर्षमोषक्षत ऊ.दोषवर्षक्षत]-ग्रहाः॥

८५.६८ क्रूर-उग्र-दोष-दुष्टैश् च प्रधान-नृप-वृत्तकैः।

८५.६८ चिरकालेन[K.चिरकालैश् च] दीप्ताद्यास्व् आगमो दिक्षु तन्नृणाम्॥

८५.६९ सद्रव्यो बलवांश् च स्यात् सद्रव्यस्य-आगमो भवेत्।

८५.६९ द्युतिमान् विनतप्रेक्षी सौम्यो दारुणवृत्तकृत्॥

८५.७० विदिक्स्थः शकुनो दीप्तो वामस्थेन-अनुवाशितः।

८५.७० स्त्रियाः संग्रहणं प्राह तद्दिगाख्यातयोनितः॥

८५.७१ शान्तः पञ्चमदीप्तेन विरुतो विजयावहः।

८५.७१ दिग्-नर-आगम-कारी वा दोषकृत् तद्-विपर्यये॥

८५.७२ वामसव्य-गतो[K.रुतो] मध्यः प्राह स्वपरयोर् भयम्।

८५.७२ मरणं कथयन्ति एते सर्वे समविरावणः॥

८५.७३ वृक्ष-अग्र-मध्य-मूलेषु गज-अश्व-रथिक-आगमः।

८५.७३ दीर्घ-अब्ज-मुषिताग्रेषु नर-नौ-शिबिका-आगमः॥

८५.७४ शकटेन-उन्नतस्थे वा[K.च] छायास्थे छत्र-संयुते[K.छत्रसम्युतः]।

८५.७४ एक-त्रि-पञ्च-सप्ताहात् पूर्व-आद्यास्व् अन्तरासु च॥

८५.७५ सुरपति-हुतवह-यम-निरृति-वरुण-पवन-इन्दु-सङ्करः *क्रमशः[K.ओमित्तेद्]।

८५.७५ प्राच्याद्यानां पतयो दिशः पुमांसो -अङ्गना विदिशः॥

८५.७६ तरु-ताली-विदल-अम्बर-सलिलज-शर-चर्म-पट्ट-लेखाः स्युः।

८५.७६ द्वात्रिंशत्-प्रविभक्ते दिक्चक्रे तेषु कार्याणि॥

८५.७७ व्यायाम-शिखि-निकूजित-कलह-अम्भो-निगड-मन्त्र-गो-शब्दाः।

८५.७७ वर्णास् तु[K.च] रक्त-पीतक-कृष्ण-सिताः कोणगा मिश्राः॥

८५.७८अ चिह्नं ध्वजो दग्धम् अथ श्मशानं

८५.७८ब् दरी जलं पर्वत-यज्ञ-घोषाः।

८५.७८च् एतेषु संयोग-भयानि विन्द्याद्

८५.७८द् अन्यानि वा स्थान-विकल्पितानि॥

८५.७९अ स्त्रीणां विकल्पा बृहती कुमारी

८५.७९ब् व्यङ्गा विगन्धा त्व् अथ नीलवस्त्रा।

८५.७९च् कुस्त्री प्रदीर्घा विधवा च ताश् च

८५.७९द् संयोग-चिन्ता परिवेदिकाः स्युः॥

८५.८०अ पृच्छासु रूप्य-कनक-आतुर-भामिनीनां

८५.८०ब् मेषाव्य-यान-मख-गोकुल-संश्रयासु।

८५.८०च् न्यग्रोध-रक्ततरु-रोध्रक-कीचकाख्याश्

८५.८०द् चूतद्रुमाः खदिर-बिल्व-नगार्जुनाश् च॥

८६ शाकुनेऽ-अन्तरचक्राध्यायः

८६.०१ ऐन्द्र्यां दिशि शान्तायां विरुवन् नृप-संश्रित-आगमं वक्ति।

८६.०१ [K.शकुनिः] पूजा-लाभं मणि-रत्न-द्रव्य-सम्प्राप्तिम्॥

८६.०२ तद्-अनन्तर-दिशि कनक-आगमो भवेद् वाञ्छित-अर्थ-सिद्धिश् च।

८६.०२ आयुध-धन-पूगफल-आगमस् तृतीये भवेद् भागे॥

८६.०३ स्निग्ध-द्विजस्य सन्दर्शनं चतुर्थे तथा-आहिताग्नेश् च।

८६.०३ कोणे -अनुजीवि-भिक्षु-प्रदर्शनं कनक-लोह-आप्तिः॥

८६.०४ याम्येन-आद्ये नृप-पुत्र-दर्शनं सिद्धिर् अभिमतस्य-आप्तिः।

८६.०४ परतः स्त्री-धर्म-आप्तिः सर्षप-यव-लब्धिर् अप्य् उक्ता॥

८६.०५ कोणाच् चतुर्थ-खण्डे लब्धिर् द्रव्यस्य पूर्व-नष्टस्य।

८६.०५ यद् वा तद् वा फलम् अपि यात्रायां प्राप्नुयाद् याता॥

८६.०६ यात्रा-सिद्धिः समदक्षिणेन शिखि-महिष-कुक्कुट-आप्तिश् च।

८६.०६ याम्याद् द्वितीयभागे चारण-सङ्गः शुभं प्रीतिः॥

८६.०७ ऊर्ध्वं सिद्धिः कैवर्त-सङ्गमो मीन-तित्तिर-आद्य्-आप्तिः।

८६.०७ प्रव्रजित-दर्शनं तत्परे च पक्वान्न-फल-लब्धिः॥

८६.०८ नैरृत्यां स्त्रीलाभस् तुरग-अलङ्कार-दूत-लेख-आप्तिः।

८६.०८ परतो -अस्य चर्म-तत्शिल्पि-दर्शनं चर्ममय-लब्धिः॥

८६.०९ वानर-भिक्षु-श्रवण-अवलोकनं नैरृतात् तृतीय-अंशे।

८६.०९ फल-कुसुम-दन्त-घटित-आगमश् च कोणाच् चतुर्थ-अंशे॥

८६.१० वारुण्याम् अर्णवजात-रत्न-वैदूर्य[K.वैडूर्य]-मणिमय-प्राप्तिः।

८६.१० परतो -अतः शबर-व्याध-चौर-सङ्गः पिशित-लब्धिः॥

८६.११ परतो -अपि दर्शनं वातरोगिणां चन्दन-अगुरु-प्राप्तिः।

८६.११ आयुध-पुस्तक-लब्धिस् तद्वृत्तिसमागमश् च-ऊर्ध्वम्॥

८६.१२ वायव्ये फेनक-चामर-और्णिक-आप्तिः समेति कायस्थः।

८६.१२ मृन्मय-लाभो -अन्यस्मिन् वैतालिक-डिण्डि-भाण्डानाम्॥

८६.१३ वायव्याच् च तृतीये मित्रेण समागमो धनप्राप्तिः।

८६.१३ वस्त्र-अश्व-आप्तिर् अतः परम् इष्ट-सुहृत्-सम्प्रयोगश् च॥

८६.१४ दधि-तण्डुल-लाजानां लब्धिर् उदग् दर्शनं च विप्रस्य।

८६.१४ अर्थ-अवाप्तिर् अनन्तरम् उपगच्छति सार्थ-वाहश् च॥

८६.१५ वेश्या-वटु-दास-समागमः परे शुक्ल[K.शुष्क]-पुष्प-फल-लब्धिः।

८६.१५ *अत ऊर्ध्वं[K.अतः परं] चित्रकरस्य दर्शनं चित्र-वस्त्र-आप्तिः[K.वस्त्रसम्प्राप्तिः]॥

८६.१६ ऐशान्यां देवलक-उपसङ्गमो धान्य-रत्न-पशु-लब्धिः।

८६.१६ प्राक् प्रथमे वस्त्राप्तिः समागमश् च-अपि बन्धक्या॥

८६.१७ रजकेन समायोगो जलज-द्रव्य-आगमश् च परतो -अतः।

८६.१७ हस्त्य्-उपजीवि-समाजश् च-अस्माद् धन-हस्ति-लब्धिश् च॥

८६.१८ द्वात्रिंशत्-प्रविभक्तं दिक्चक्रं *वास्तुवत् सनेम्य् उक्तम्[K.वास्तुबन्धने अप्य् उक्तम्]।

८६.१८ अर-नाभि-स्थैर् अन्तः फलानि नवधा विकल्प्यानि॥

८६.१९ नाभिस्थे बन्धु-सुहृत्-समागमस् तुष्टिर् उत्तमा भवति।

८६.१९ प्राग् रक्त-पट्ट-वस्त्र-आगमस् त्व् अरे नृपति-संयोगः॥

८६.२० आग्नेये कौलिक-तक्ष-पारिकर्म-अश्व-सूत-संयोगः।

८६.२० लब्धिश् च तत्कृतानां द्रव्याणाम् अश्व-लब्धिर् वा॥

८६.२१ नेमी-भागं बुद्ध्वा नाभी-भागं च दक्षिणे यो -अरः।

८६.२१ धार्मिक-जन-संयोगस् तत्र भवेद् धर्म-लाभश् च॥

८६.२२ उस्रा-क्रीडक-कापालिक-आगमो नैरृते समुद्दिष्टः।

८६.२२ वृषभस्य च-अत्र लब्धिर् माष-कुलत्थ-आद्यम् अशनम् च॥

८६.२३ अपरस्यां दिशि यो -अरस् तत्र-आसक्तिः कृषीवलैर् भवति।

८६.२३ सामुद्रद्रव्य-सुसार-काच-फल-मद्य-लब्धिश् च॥

८६.२४ भारवह-तक्ष-भिक्षुक-सन्दर्शनम् अपि च वायु-दिक्-संस्थे।

८६.२४ तिलक-कुसुमस्य लब्धिः सनाग-पुन्नाग-कुसुमस्य॥

८६.२५ कौबेर्यां दिशि *यो -अरस् तत्रस्थो[K.शकुनः शान्तायां] वित्त-लाभम् आख्याति।

८६.२५ भागवतेन समागमनम्[K.ऊ.समागमम्] आचष्टे पीत-वस्त्रैश् च॥

८६.२६ ऐशाने व्रतयुक्ता वनिता सन्दर्शनं समुपयाति।

८६.२६ लब्धिश् च परिज्ञेया कृष्णायः-शस्त्र[K.कृष्णायोवस्त्र]-घण्टानाम्॥

८६.२७ याम्ये -अष्टांशे पश्चाद् द्वि-षट्-त्रि-सप्त-अष्टमेषु मध्य-फला।

८६.२७ सौम्येन च द्वितीये शेषेष्व् अतिशोभना यात्रा॥

८६.२८ अभ्यन्तरे तु नाभ्यां शुभफलदा भवति षट्सु च-अरेषु।

८६.२८ वायव्या-नैरृतयोर् अरयोः[K.?उभय्योः] क्लेशावहा यात्रा॥

८६.२९ शान्तासु दिक्षु फलम् इदम् उक्तं दीप्तास्व् अतो -अभिधास्यामि।

८६.२९ ऐन्द्र्यां भयं नरेन्द्रात् समागमश् च-एव शातॄणाम्॥

८६.३० तद्-अनन्तर-दिशि नाशः कनकस्य भयं सुवर्णकाराणाम्।

८६.३० अर्थ-क्षयस् तृतीये कलहः शस्त्र-प्रकोपश् च॥

८६.३१ अग्निभयं च चतुर्थे भयम् आग्नेये च भवति चौरेभ्यः।

८६.३१ कोणाद् अपि द्वितीये धन-क्षयो नृप-सुत-विनाशः॥

८६.३२ प्रमदा-गर्भ-विनाशस् तृतीय-भागे भवेच् चतुर्थे च।

८६.३२ हैरण्यक-कारुकयोः प्रध्वंसः शस्त्र-कोपश् च॥

८६.३३ अथ पञ्चमे नृप-भयं मारी-मृत-दर्शनं च वक्तव्यम्।

८६.३३ षष्ठे तु भयं ज्ञेयं गन्धर्वाणां सडोम्बानाम्॥

८६.३४ धीवर-शाकुनिकानां सप्तम-भागाद्[K.भागे] भयं भवति दीप्ते।

८६.३४ भोजन-विघात उक्तो निर्ग्रन्थ-भयं च तत्परतः॥

८६.३५ कलहो नैरृत-भागे रक्तस्रावो -अथ शस्त्र-कोपश् च।

८६.३५ अपराह्ये चर्मकृतं विनश्यते चर्मकार-भयम्॥

८६.३६ तदनन्तरं[K.तदनन्तरे] परिव्राट्-श्रवण-भयं तत्परे त्व् अनशनभयम्।

८६.३६ वृष्टिभयं वारुण्ये श्व-तस्कराणां भयं परतः॥

८६.३७ वायु-ग्रस्त-विनाशः परे परे शस्त्र-पुस्त-*वार्तानाम्[K.वार्त्तानाम्]।

८६.३७ कोणे पुस्तकनाशः परे विष-स्तेन-वायु-भयम्॥

८६.३८ परतो वित्त-विनाशो मित्रैः सह विग्रहश् च विज्ञेयः।

८६.३८ तस्य-आसन्ने -अश्ववधो भयम् अपि च पुरोधसः प्रोक्तम्॥

८६.३९ गोहरण-शस्त्र-घाताव् उदक् परे सार्थ-घात-धन-नाशौ।

८६.३९ आसन्ने च श्वभयं व्रात्य-द्विज-दास-गणिकानाम्॥

८६.४० ऐशानस्य-आसन्ने चित्र-अम्बर-चित्रकृद्-भयं प्रोक्तम्।

८६.४० ऐशाने त्व् अग्नि-भयं दूषणम् अप्य् उत्तम-स्त्रीणाम्॥

८६.४१ प्राक् तस्य-एव-आसन्ने दुःख-उत्पत्तिः स्त्रिया विनाशश् च।

८६.४१ भयम् ऊर्ध्वं रजकानां विज्ञेयं काच्छिकानां च॥

८६.४२ हस्त्य्-आरोह-भयं स्याद् द्विरद-विनाशश् च मण्डल-समाप्तौ।

८६.४२ अभ्यन्तरे तु दीप्ते पत्नी-मरणं ध्रुवं पूर्वे॥

८६.४३ शस्त्र-अनल-प्रकोप-आग्नेये वाजि-मरण-शिल्पि-भयम्।

८६.४३ याम्ये धर्म-*विनाशो -अपरे[K.विनाशः परे] -अग्र्य्-अवस्कन्द-चोक्ष-वधाः॥

८६.४४ अपरे तु कर्मिणां भयम् अथ कोणे च-अनिले खर-उष्ट्र-वधः।

८६.४४ अत्र-एव मनुष्याणां विसूचिका[K.विशूचिका]-विष-भयं भवति॥

८६.४५ उदग् अर्थ-विप्र-पीडा दिश्य् ऐशान्यां तु चित्त-सन्तापः।

८६.४५ ग्रामीण-गोप-पीडा च तत्र नाभ्यां तथा-आत्म-वधः॥

८७ विरुताध्याय्ः

८७.०१अ श्यामा-श्येन-शशघ्न-वञ्जुल-शिखि-श्रीकर्ण-चक्राह्वयाश्

८७.०१ब् चाष-अण्डीरक-खञ्जरीटक-शुक-ध्वाङ्क्षाः कपोतास् त्रयः[K.त्रयाः]।

८७.०१च् भारद्वाज-कुलालकुक्कुट-खरा हारीत-गृध्रौ कपिः

८७.०१द् फेण्टः कुक्कुट-पूर्णकूट-*चटकाः प्रोक्ता[K.चटकाश् च उक्ता] दिवासञ्चराः॥

८७.०२अ लोमाशिका पिङ्गल-च्छिप्पिका-आख्यौ

८७.०२ब् वल्गुली-उलूकौ शशकश् च रात्रौ।

८७.०२च् सर्वे स्वकाल-उत्क्रम-चारिणः स्युर्
८७.०२द् देशस्य नाशाय नृप-अन्तदा वा॥

८७.०३अ हय-नर-भुजग-उष्ट्र-द्वीपि-सिंह-ऋक्ष-गोधा

८७.०३ब् वृक-नकुल-कुरङ्ग-श्व-अज-गो-व्याघ्र-हंसाः।

८७.०३च् पृषत-मृग-शृगाल-श्वाविद्-आख्य-अन्यपुष्टा

८७.०३द् द्युनिशम् अपि बिडालः सारसः सूकरश् च॥

८७.०४ भष-कूटपूरि[U - कूटपूरि]-कुरबक-करायिकाः पूर्णकूट-सण्ज्ञाः स्युः।

८७.०४ नामान्य् उलूकचेट्याः पिङ्गलिका पेचिका हक्का॥

८७.०५ कपोतकी च श्यामा वञ्जुलकः कीर्त्यते खदिरचञ्चुः।

८७.०५ छुच्छुन्दरी नृप-सुता वालेयो गर्दभः प्रोक्तः॥

८७.०६ स्रोतस्-*तडागभेद्य[K.तडागभेद्येक]-एकपुत्रकः कलहकारिका च रला।

८७.०६ भृङ्गारवच् च विरुवति[K.वाशति] निशि भूमौ द्व्य्-अङ्गुल-शरीरा॥

८७.०७ दुर्बलिको भाण्डीकः प्राच्यानां दक्षिणः प्रशस्तो -असौ।

८७.०७ धिक्कारो मृगजातिः कृकवाकुः कुक्कुटः प्रोक्तः॥

८७.०८ गर्ताकुक्कुटकस्य प्रथितं तु कुलालकुक्कुटो नाम।

८७.०८ गृहगोधिका-इति संज्ञा विज्ञेया कुड्यमत्स्यस्य॥

८७.०९ दिव्यो धन्वन उक्तः क्रोडः स्यात् सूकरो -अथ गौरुस्रा।

८७.०९ श्वा सारमेय उक्तो जात्या चटिका च सूकरिका॥

८७.१० एवं देशे देशे तद्विद्भ्यः समुपलभ्य नामानि॥

८७.१० शकुन-रुत-ज्ञान-अर्थं शास्त्रे सञ्चित्य[K.सञ्चिन्त्य] योज्यानि॥

८७.११ वञ्जुलक-रुतं तित्तिड् इति दीप्तम् अथ किल्किलि-इति तत्पूर्णम्।

८७.११ श्येन-शुक-गृध्र-कङ्काः प्रकृतेर् अन्यस्वरा दीप्ताः॥

८७.१२ यान-आसन-शय्या-निलयनं कपोतस्य सद्म-विशनं वा।

८७.१२ अशुभ-प्रदं नराणां जाति-विभेदेन कालो -अन्यः॥

८७.१३ आपाण्डुरस्य वर्षाच् चित्र-कपोतस्य च-एव षण्मासात्।

८७.१३ कुङ्कुम-धूम्रस्य फलं सद्यः पाकं कपोतस्य॥

८७.१४ चिचिद् इति शब्दः पूर्णः श्यामायाः शूलिशूल् इति च धन्यः।

८७.१४ चच्च-इति दीप्तः स्यात् स्वप्रिय-लाभाय[K.योगाय] चिक्चिग् इति॥

८७.१५ हारीतस्य तु शब्दो गुग्गुः पूर्णो -अपरे प्रदीप्ताः स्युः।

८७.१५ स्वर-वैचित्र्यं सर्वं भारद्वाज्याः शुभं प्रोक्तम्॥

८७.१६ किष्किष-शब्दः पूर्णः करायिकायाः शुभः कहकह-इति।

८७.१६ क्षमाय[K.ऊ.क्षेमाय] केवलं करकर-इति न त्व् अर्थ-सिद्धि-करः॥

८७.१७ कोटुक्कि-इति क्षेम्यः स्वरः कटुक्कि-इति वृष्टये तस्याः।

८७.१७ अफलः कोटिकिलि-इति च दीप्तः खलु गुं कृतः शब्दः॥

८७.१८अ शस्त्रं[K.ऊ.शस्तम्] वामे दर्शनं दिव्यकस्य

८७.१८ब् सिद्धिर् ज्ञेया हस्त-मात्र-उच्छ्रितस्य।

८७.१८च् तस्मिन्न् एव प्रोन्नतस्थे शरीराद्

८७.१८द् धात्री वश्यं सागरान्ता-अभ्युपैति॥

८७.१९अ फणितो -अभिमुखागमो -अरिसङ्गं

८७.१९ब् कथयति बन्धु[K.बन्ध]-वध-अत्ययं च यातुः।

८७.१९च् अथ वा समुपैति सव्यभागात्

८७.१९द् न स सिद्ध्यै कुशलो गमागमे च॥

८७.२०अ अब्जेषु मूर्धसु च वाजि-गज-उरगाणां

८७.२०ब् राज्य-प्रदः कुशल-कृत्-शुचि-शाद्वलेषु।

८७.२०च् भस्म-अस्थि-काष्ठ-तुष-केश-तृणेषु दुःखं

८७.२०द् दृष्टः करोति खलु खञ्जनको -अब्दम् एकम्॥

८७.२१अ किलिकिल्किलि तित्तिर-स्वनः

८७.२१ब् शान्तः शस्त-फलो -अन्यथा-अपरः।

८७.२१च् शशको निशि वाम-पार्श्वगो

८७.२१द् वाशन् शस्त-फलो निगद्यते॥

८७.२२अ किलिकिलि-विरुतं कपेः प्रदीप्तं

८७.२२ब् न शुभ-फल-प्रदम् उद्दिशन्ति यातुः।

८७.२२च् शुभम् अपि कथयन्ति चुग्गुशब्दं

८७.२२द् कपिसदृशं च कुलालकुक्कुटस्य॥

८७.२३अ पूर्णाननः कृमि-पतङ्ग-पिपीलका-आद्यैश्

८७.२३ब् चाषः प्रदक्षिणम् उपैति नरस्य यस्य।

८७.२३च् खे स्वस्तिकं यदि करोत्य् अथ वा यियासोस्

८७.२३द् तस्य-अर्थ-लाभम् अचिरात् सुमहत् करोति॥

८७.२४अ चाषस्य काकेन विरुध्यतश् चेत्

८७.२४ब् पराजयो दक्षिण-भाग-गस्य।

८७.२४च् वधः प्रयातस्य तदा नरस्य

८७.२४द् विपर्यये तस्य जयः प्रदिष्टः॥

८७.२५अ केक-इति पूर्णकुटवद् यदि वामपार्श्वे

८७.२५ब् चाषः करोति विरुतं जयकृत् तदा स्यात्।

८७.२५च् क्रेक्र-इति[K.क्रक्रेति] तस्य विरुतं न शिवाय दीप्तं

८७.२५द् सन्दर्शनं शुभदम् अस्य सदैव यातुः॥

८७.२६अ अण्डीरकष् टी-इति रुतेन पूर्णष्-

८७.२६ब् टिट्टिट्टिशब्देन तु दीप्त उक्तः।

८७.२६च् फेण्टः शुभो दक्षिण-भाग-संस्थो

८७.२६द् न वाशिते तस्य कृतो विशेषः॥

८७.२७अ श्रीकर्ण-रुतं तु दक्षिणे

८७.२७ब् क्कक्कक्क-इति शुभं प्रकीर्तितम्।

८७.२७च् मध्यं खलु चिक्चिकि-इति यच्-

८७.२७द् शेषं सर्वम् उशन्ति निष्फलम्॥

८७.२८अ दुर्बलेर् अपि चिरिल्विरिल्व् इति

८७.२८ब् प्रोक्तम् इष्टफलदं हि वामतः।

८७.२८च् वामतश् च यदि दक्षिणं व्रजेत्

८७.२८द् कार्य-सिद्धिम् अचिरेण यच्छति॥

८७.२९अ चिक्चिकि-वाशितम् एव तु कृत्वा

८७.२९च् दक्षिण-भागम् उपैति तु वामात्।

८७.२९च् क्षेमकृद् एव न साधयते -अर्थान्

८७.२९द् व्यत्यय-गो वध-बन्ध-भयाय॥

८७.३० क्रक्र-इति च सारिका द्रुतं त्रेत्रे वा-अप्य्-अभया विरौति या।

८७.३० सा वक्ति यियासतो -अचिराद् गात्रेभ्यः[K.गात्रेभ्य] क्षतजस्य विस्रुतिम्॥

८७.३१ फेण्टकस्य वामतश् चिरिल्विरिल्व् इति स्वनः।

८७.३१ शोभनो निगद्यते प्रदीप्त उच्यते -अपरः॥

८७.३२अ श्रेष्ठं खरं स्थास्नुम् उशन्ति वामम्

८७.३२ब् ओं-कार-शब्देन हितं च यातुः।

८७.३२च् *अतो -अपरं[K.अतः परं] गर्दभ-नादितं यत्

८७.३२द् सर्व-आश्रयं तत् प्रवदन्ति दीप्तम्॥

८७.३३अ आ-कार-रावी समृगः कुरङ्ग

८७.३३ब् ओ-कार-रावी पृषतश् च पूर्णः।

८७.३३च् ये -अन्ये स्वरास् ते कथिताः प्रदीप्ताः

८७.३३द् पूर्णाः शुभाः पापफलाः प्रदीप्ताः॥

८७.३४अ भीता रुवन्ति कुकुकुक्व् इति ताम्रचूडास्

८७.३४ब् त्यक्त्वा रुतानि भयदान्य् अपराणि रात्रौ।

८७.३४च् स्वस्थैः स्वभाव-विरुतानि निशावसाने

८७.३४द् ताराणि राष्ट्र-पुर-पार्थिव-वृद्धि-दानि॥

८७.३५अ नानाविधानि विरुतानि हि छिप्पिकायास्

८७.३५ब् तस्याः शुभाः कुलुकुलुर् न शुभास् तु शेषाः।

८७.३५च् यातुर् बिडाल-विरुतं न शुभं सदैव

८७.३५द् गोस् तु क्षुतं मरणम् एव करोति यातुः॥

८७.३६अ हुंहुंगुग्गुग् इति प्रियाम् अभिलषन् क्रोशत्य् उलूको मुदा

८७.३६ब् पूर्णः स्याद् गुरुलु प्रदीप्तम् अपि च ज्ञेयं सदा किस्किसि।

८७.३६च् विज्ञेयः कलहो यदा बलबलं तस्य[K.तस्याः] असकृद् वाशितं

८७.३६द् दोषाय-एव टट्टट-इति न शुभाः शेषास् तु दीप्त[K.दीप्ताः]स्वराः॥

८७.३७ सारस-कूजितम् इष्टफलं तद् यद् युगपद्-विरुतं मिथुनस्य।

८७.३७ एकरुतं न शुभं यदि वा स्याद् एकरुते प्रविरौति[K.प्रतिरौति] चिरेण॥

८७.३८ चिरिल्विरिल्व् इति स्वरैः शुभं करोति पिङ्गलाः[K.पिङ्गला]।

८७.३८ अतो -अपरे तु ये स्वराः प्रदीप्त-संज्ञितास् तु ते॥

८७.३९अ इशिविरुतं गमन-प्रतिषेधि

८७.३९ब् कुशुकुशु चेत् कलहं प्रकरोति।

८७.३९च् अभिमत-कार्य-गतिं च यथा सा

८७.३९द् कथयति तं च विधिं कथयामि॥

८७.४०अ दिनान्त-सन्ध्या-समये निवासम्

८७.४०ब् आगम्य तस्याः प्रयतश् च वृक्षम्।

८७.४०च् देवान् समभ्यर्च्य पितामह-आदीन्

८७.४०द् नव-अम्बरस् तं च तरुं सुगन्धैः॥

८७.४१अ एको निशीथे -अनल-दिक्-स्थितश् च

८७.४१ब् दिव्य-इतरैस् तां शपथैर् नियोज्य।

८७.४१च् पृच्छेद् यथाचिन्तितम् अर्थम् एवम्

८७.४१द् अनेन मन्त्रेण यथा-आशृणोति॥

८७.४२ विद्धि भद्रे मया यत् त्वम् इमम् अर्थं प्रचोदिता।

८७.४२ कल्याणि सर्व-वचसां वेदित्री त्वं प्रकीर्त्यसे॥

८७.४३ आपृच्छे -अद्य गमिष्यामि वेदितश् च पुनस् त्व् अहम्।

८७.४३ प्रातर् आगम्य पृच्छे त्वाम् आग्नेयीं दिशम् आश्रितः॥

८७.४४ प्रचोदयाम्य् अहं यत् त्वां तन् मे व्याख्यातुम् अर्हसि।

८७.४४ स्वचेष्टितेन कल्याणि यथा वेद्मि निराकुलम्॥

८७.४५अ इत्य् एवम् उक्ते तरु-मूर्ध-गायाश्

८७.४५ब् चिरिल्विरिल्वि-इति रुते -अर्थ-सिद्धिः।

८७.४५च् अत्याकुलत्वं[U - अव्याकुलत्वम्] दिशिकार-शब्दे

८७.४५द् कुचाकुचा-इत्य् एवम् उदाहृते वा॥

८७.४६अ अवाक्-प्रदाने *-अपि हित[K.विहित]-अर्थ-सिद्धिः

८७.४६ब् पूर्व-उक्त-दिक्चक्र-फलैर् अतो -अन्यत्।

८७.४६च् वाच्यं फलं च-उत्तम-मध्य-नीच-

८७.४६द् शाखा-स्थितायां वर-मध्य-नीचम्॥

८७.४७अ दिङ्मण्डले -अभ्यन्तर-बाह्य-भागे

८७.४७ब् फलानि विन्द्याद् गृहगोधिकायाः।

८७.४७च् छुच्छुन्दरी चिच्चिड् इति प्रदीप्ता

८७.४७द् पूर्णा तु सा तित्तिड् इति स्वनेन॥

८८ श्वचक्राध्यायः

८८.०१अ नृ-तुरग-करि-कुम्भ-पर्याण-सक्षीरवृक्ष-इष्टकासञ्चय-च्छत्र-शय्या-आसन-उलूखलानि ध्वजं चामरं शाद्वलं पुष्पितं वा प्रदेशं यदा श्वा-अवमूत्र्य-अग्रतो याति यातुस् तदा कार्य-सिद्धिर् भवेद् आर्द्रके गोमये मिष्टभोज्य-आगमः शुष्क-सम्मूत्रणे शुष्कम् अन्नं गुडो मोदक-अवाप्तिर् एव-अथ वा

८८.०१ब् अथ विषतरु-कण्ठकी-काष्ठ-पाषाण-शुष्कद्रुम-अस्थि-श्मशानानि मूत्र्य-अवहत्य-अथ वा यायिनो -अग्रेसरो -अनिष्टम् आख्याति शय्या-कुलाल-आदि भाण्डान्य् अभुक्तान्य् अभिन्नानि वा मूत्रयन् कन्यका-दोषकृद् भुज्यमानानि चेद् दुष्टतां तद्-गृहिण्यास् तथा स्याद् उपानत्-फलं गोस् तु सम्मूत्रणे -अवर्ण-जः[K.वर्णजः] सङ्करः।

८८.०१च् गमन-मुखम् उपानहं सम्प्रगृह्य-उपतिष्ठेद् यदा स्याद् तदा सिद्धये मांस-पूर्ण-आनने -अर्थ-आप्तिर् आद्रेण च-अस्थ्ना शुभं स-अग्र्य्-अलातेन शुष्केण च-अस्थ्ना गृहीतेन मृत्युः प्रशान्त-उल्मुकेन-अभिघातो -अथ पुंसः शिरो-हस्त-पाद-आदि वक्त्रे भुवो -अभ्यागमो[K.ह्यागमो] वस्त्र-चीर-आदिभिर् व्यापदः के चिद् आहुः सवस्त्रे शुभम्

८८.०१द् प्रविशति तु गृहं स-शुष्क-अस्थि-वक्त्रे प्रधानस्य तस्मिन् वधः शृङ्खला-शीर्ण-वल्ली-वरत्रा-आदि वा बन्धनं च-उपगृह्य-उपतिष्ठेद् यदा स्यात् तदा बन्धनं लेढि पादौ विधुन्वन् स्वकर्णाव् उपर्य् आक्रमंश् च-अपि विघ्नाय यातुर् विरोधे विरोधस् तथा स्व-अङ्ग-कण्डूयने स्यात् स्वपंश् च-ऊर्ध्व-पादः सदा दोषकृत्॥

८८.०२अ सूर्य-उदये -अर्क-अभिमुखो विरौति

८८.०२ब् ग्रामस्य मध्ये यदि सारमेयः।

८८.०२च् एको यदा वा बहवः समेताः

८८.०२द् शंसन्ति देश-अधिपम् अन्यम् आशु॥

८८.०३अ सूर्य-उन्मुखः श्वा-अनलदिक्-स्थितश् च

८८.०३ब् चौर-अनल-त्रास-करो -अचिरेण।

८८.०३च् मध्याह्न-काले -अनल-मृत्यु-शंसी

८८.०३द् सशोणितः स्यात् कलहो -अपराह्णे॥

८८.०४अ रुवन् दिनेश-अभिमुखो -अस्तकाले

८८.०४ब् कृषीबलानां भयम् आशु दत्ते[K.धत्ते]।

८८.०४च् प्रदोष-काले -अनिलदिङ्-मुखश् च[K.तु]

८८.०४द् दत्ते[K.धत्ते] भयं मारुत-तस्कर-उत्थम्॥

८८.०५अ उदङ्-मुखश् च-अपि निशार्ध-काले

८८.०५ब् विप्रव्यथां गोहरणं च शास्ति।

८८.०५च् निशावसाने शिवदिन्-मुखश् च

८८.०५द् कन्या-अभिदूष-अनल-गर्भपातान्॥

८८.०६अ उच्चैः स्वराः स्युस् तृण-कूट-संस्थाः

८८.०६ब् प्रासाद-वेश्म-उत्तम-संस्थिता वा।

८८.०६च् वर्षासु वृष्टिं कथयन्ति तीव्राम्

८८.०६द् अन्यत्र मृत्युं दहनं रुजश् च॥

८८.०७अ प्रावृट्-काले -अवग्रहे -अम्भो -अवगाह्य

८८.०७ब् प्रत्यावर्तै[K.प्रत्यावृत्तै] रेचकैश् च-अप्य् अभीक्षणम्[K.अभीक्ष्णम्]।

८८.०७च् आधुन्वन्तो वा पिबन्तश् च तोयं

८८.०७द् वृष्टिं कुर्वन्त्य् अन्तरे द्वादशाहात्॥

८८.०८अ द्वारे शिरो न्यस्य बहिः शरीरं

८८.०८ब् रोरूयते श्वा गृहिणीं विलोक्य।

८८.०८च् रोग-प्रदः स्याद् अथ मन्दिर-अन्तर्-

८८.०८द् बहिर्-मुखो *वक्ति च[K.शंसति] बन्धकीं ताम्॥

८८.०९ कुड्यम् उत्किरति वेश्मनो यदा तत्र खानक-भयं भवेत् तदा।

८८.०९ गोष्ठम् उत्किरति गो-ग्रहं वदेद् धान्य-लब्धिम् अपि धान्य-भूमिषु॥

८८.१०अ एकेन-अक्ष्णा स-अश्रुणा दीन-दृष्टिर्

८८.१०ब् मन्द-आहारो दुःख-कृत् तद्-गृहस्य।

८८.१०च् गोभिः साकं[K.सार्धं] क्रीडमाणः सुभिक्षं

८८.१०द् क्षेम-आरोग्यं च-अभिधत्ते मुदं च॥

८८.११अ वामं जिघ्रेज् जानु वित्त-आगमाय

८८.११ब् स्त्रीभिः साकं विग्रहो दक्षिणं चेत्।

८८.११च् ऊरुं वामं च-इन्द्रिय-अर्थ-उपभोगः[K.उपभोगाः]

८८.११द् सव्यं जिघ्रेद् इष्ट-मित्रैर् विरोधः॥
८८.१२अ पादौ जिघ्रेद् यायिनश् चेद् अयात्रां

८८.१२ब् प्राह-अर्थ-आप्तिं वाञ्छितां निश्चलस्य।

८८.१२च् स्थान-स्थस्य-उपानहौ चेद् विजिघ्रेत्

८८.१२द् क्षिप्रं यात्रां सारमेयः करोति॥

८८.१३अ उभयोर् अपि जिघ्रणे हि बाह्वोर्

८८.१३ब् विज्ञेयो रिपु-चौर-सम्प्रयोगः।

८८.१३च् अथ भस्मनि गोपयीत भक्षान्

८८.१३द् मांस-अस्थीनि च[K.वा च] शीघ्रम् अग्निकोपः॥

८८.१४अ ग्रामे भषित्वा च बहिः श्मशाने

८८.१४ब् भषन्ति चेद् उत्तम-पुं-विनाशः।

८८.१४च् यियासतश् च-अभिमुखो विरौति

८८.१४द् यदा तदा श्वा निरुणद्धि यात्राम्॥

८८.१५अ उकार-*वर्णे विरुते[K.वर्णेन रुते] -अर्थ-सिद्धिर्

८८.१५ब् ओकार-वर्णेन च वाम-पार्श्वे।

८८.१५च् व्याक्षेपम् औकार-रुतेन विन्द्यान्

८८.१५द् निषेधकृत् सर्वरुतैश् च पश्चात्॥

८८.१६अ *खंख-इति[K.सङ्केति] च-उच्चैश् च मुहुर्मुहुर् ये

८८.१६ब् रुवन्ति दण्डैर् इव ताड्यमानाः।

८८.१६च् श्वानो -अभिधावन्ति च मण्डलेन

८८.१६द् ते शून्यतां मृत्यु-भयं च कुर्युः॥

८८.१७अ प्रकाश्य दन्तान् यदि लेढि सृक्किणी

८८.१७ब् तदा-अशनं मृष्टम्[K.मिष्टम्] उशन्ति तद्विदः।

८८.१७च् यदा-आननं *लेढि पुनर्[K.च अवलिहेन्] न सृक्किणी

८८.१७द् प्रवृत्त-भोज्ये -अपि तदा-अन्न-विघ्न-कृत्॥

८८.१८अ ग्रामस्य मध्ये यदि वा पुरस्य

८८.१८ब् भषन्ति संहत्य मुहुर्मुहुर् ये।

८८.१८च् ते क्लेशम् आख्यान्ति तद्-ईश्वरस्य

८८.१८द् श्वा-अरण्य-संस्थो मृगवद् विचिन्त्यः॥

८८.१९अ वृक्ष-उपगे क्रोशति तोय-पातः

८८.१९ब् स्याद् इन्द्रकीले सचिवस्य पीडा।

८८.१९च् वायोर् गृहे सस्य-भयं गृह-अन्तः

८८.१९द् पीडा पुरस्य-एव च गोपुर-स्थे॥

८८.२०अ भयं च शय्यासु तद्-ईश्वराणां

८८.२०ब् याने भषन्तो भयदाश् च पश्चात्।

८८.२०च् अथ-अपसव्या जन-सन्निवेशे

८८.२०द् भयं भषन्तः कथयन्त्य् अरीणाम्॥

८९ शिवारुताध्यायः

८९.०१अ श्वभिः शृगालाः सदृशाः फलेन

८९.०१ब् विशेष एषां शिशिरे मदाग्निः।

८९.०१च् हूहू रुतान्ते परतश् च टाटा

८९.०१द् पूर्णः स्वरो -अन्ये कथिताः प्रदीप्ताः॥

८९.०२अ लोमाशिकायाः खलु कक्कशब्दः

८९.०२ब् पूर्णः स्वभाव-प्रभवः स तस्याः।

८९.०२च् ये -अन्ये स्वरास् ते प्रकृतेर् अपेताः

८९.०२द् सर्वे च दीप्ता इति सम्प्रदिष्टाः॥

८९.०३ पूर्वोदीच्योः शिवा शस्ता शान्ता सर्वत्र पूजिता।

८९.०३ धूमिता-अभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान्॥

८९.४अब्[K.ओमित्तेद्]। राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।

८९.४च्द्[K.ओमित्तेद्]। गज-अध्यक्षश् च पूर्वा-आद्याः क्षत्रिय-आद्याश् चतुर्दिशम्॥

८९.०५ सर्वदिक्ष्व् अशुभा दीप्ता विशेषेण-अह्न्य् अशोभना।

८९.०५ पुरे सैन्ये -अपसव्या च कष्टा सूर्योन्मुखी शिवा॥

८९.०६ याहि-इत्य् अग्निभयं शास्ति टाट-इति मृत-वेदिका।

८९.०६ धिग्धिग् दुष्कृतिम्[K.दुष्कृतम्] आचष्टे सज्वाला देशनाशिनी॥

८९.०७ नैव दारुणताम् एके सज्वालायाः प्रचक्षते।

८९.०७ अर्काद्यनलवत् तस्या वक्त्रं लालास्वभावतः॥

८९.०८ अन्यप्रतिरुता याम्या सा-उद्बन्ध-मृत-शंसिनी।

८९.०८ वारुण्य् अनुरुता सा-एव शंसते सलिले मृतम्॥

८९.०९ अक्षोभः श्रवणं च-इष्टं धनप्राप्तिः प्रियागमः।

८९.०९ क्षोभः प्रधान-भेदश् च वाहनानां च सम्पदः॥

८९.१० फलम् आ सप्तमाद् एतद् अग्राह्यं परतो रुतम्।

८९.१० याम्यायां तद्-विपर्यस्तं फलं षट्-पञ्चमाद् ऋते॥

८९.११ या रोमाञ्चं मनुष्याणां शकृन्-मूत्रं च वाजिनाम्।

८९.११ रावात् त्रासं च जनयेत् सा शिवा न शिव-प्रदा॥

८९.१२ मौनं गता प्रतिरुते नर-द्विरद-*वाजिभिः[K.वाजिनाम्]।

८९.१२ या शिवा सा शिवं सैन्ये पुरे वा सम्प्रयच्छति॥

८९.१३ भेभा-इति शिवा भयङ्करी भोभो व्यापदम् आदिशेच् च सा।

८९.१३ मृति-बन्ध-निवेदिनी फिफे[K.फिफ] हूहू च-आत्महिता शिवा स्वरे॥

८९.१४अ शान्ता त्व् अ-वर्णात् *परम् आ-रुवन्ती[K.पवनौ रुवन्ती]

८९.१४ब् टाटाम् उदीर्णाम् इति वाश्यमाना।

८९.१४च् टेटे च पूर्वं परतश् च थेथे

८९.१४द् तस्याः स्व-तुष्टि-प्रभवं रुतं तत्॥

८९.१५अ उच्चैर् घोरं वर्णम् उच्चार्य पूर्वं

८९.१५ब् पश्चात् क्रोशेत् क्रोष्टुकस्य-अनुरूपम्।

८९.१५च् या सा क्षेमं प्राह वित्तस्य चाप्तिं

८९.१५द् संयोगं वा प्रोषितेन प्रियेण॥

९० मृगचेष्टिताध्यायः

९०.०१अ सीमा-गता वन्य-मृगा रुवन्तः

९०.०१ब् स्थिता व्रजन्तो -अथ समापतन्तः।

९०.०१च् सम्प्रत्य्-अतीत-एष्य-भयानि दीप्ताः

९०.०१द् कुर्वन्ति शून्यं परितो भ्रमन्तः॥

९०.०२अ ते ग्राम्य-सत्त्वैर् अनुवाश्यमाना

९०.०२ब् भयाय रोधाय भवन्ति वन्यैः।

९०.०२च् द्वाभ्याम् अपि प्रत्यनुवाशितास् ते

९०.०२द् वन्दि-*ग्रहायै च[K.ग्रहायैव] मृगा रुवन्ति[K.भवन्ति]॥

९०.०३अ वन्ये सत्त्वे द्वार-संस्थे पुरस्य

९०.०३ब् रोधो वाच्यः सम्प्रविष्टे विनाशः।

९०.०३च् सूते मृत्युः स्याद् भयं संस्थिते च

९०.०३द् गेहं याते बन्धनं सम्प्रदिष्टम्॥

९१ गवेङ्गिताध्यायः

९१.०१अ गावो दीनाः पार्थिवस्य-अशिवाय

९१.०१ब् पादैर् भूमिं कुट्टयन्त्यश् च रोगान्।

९१.०१च् मृत्युं कुर्वन्त्य् अशु-पूर्ण-आयत-अक्ष्यः

९१.०१द् पत्युर् भीतास् तस्करान् आ-रुवन्त्यः॥

९१.०२ अकारणे क्रोशति चेद् अनर्थो भयाय रात्रौ वृषभः शिवाय।

९१.०२ भृशं निरुद्धा यदि मक्षिकाभिस् तदा-आशु वृष्टिं सरमात्मजैर् वा॥

९१.०३अ आगच्छन्त्यो वेश्म बम्भारवेण

९१.०३ब् संसेवन्त्यो गोष्ठ-वृद्ध्यै गवां गाः।

९१.०३च् आर्द्र-अङ्ग्यो वा हृष्टरोम्ण्यः प्रहृष्टा

९१.०३द् धन्या गावः स्युर् महिष्यो -अपि च-एवम्॥

९२ अश्वेङ्गिताध्यायः

९२.०१अ उत्सर्गान् न शुभदम् *आसनात् परस्थं[K.ऊ.आसनापरस्थं]

९२.०१ब् वामे च ज्वलनम् अतो -अपरं प्रशस्तम्।

९२.०१च् सर्व-अङ्ग-ज्वलनम् अवृद्धिदं हयानां

९२.०१द् द्वे वर्षे दहन-कणाश् च धूपनं वा॥

९२.०२अ अन्तःपुरं नाशम् उपैति मेढ्रे

९२.०२ब् कोशः क्षयं यात्य् उदरे प्रदीप्ते।

९२.०२च् पायौ च पुच्छे च पराजयः स्याद्

९२.०२द् वक्त्र-उत्तम-अङ्ग-ज्वलने जयश् च॥

९२.०३अ स्कन्ध-आसन-अंस-ज्वलनं जयाय

९२.०३ब् बन्धाय पाद-ज्वलनं प्रदिष्टम्।

९२.०३च् ललाट-वक्षो *-अक्षि-भुजे च[K.अक्षिभुजेषु] धूमः

९२.०३द् पराभवाय ज्वलनं जयाय॥

९२.०४अ नासापुट-प्रोथ-शिरो -अशुपात-

९२.०४ब् *नेत्रे च[K.नेत्रेषु] रात्रौ ज्वलनं जयाय।

९२.०४च् पलाश-ताम्र-असित-कर्बुराणां

९२.०४द् नित्यं शुक-आभस्य सितस्य च-इष्टम्॥

९२.०५अ प्रद्वेषो यवस-अम्भसां प्रपतनं स्वेदो निमित्ताद् विना

९२.०५ब् कम्पो वा वदनाच् च रक्त-पतनं धूमस्य वा सम्भवः।

९२.०५च् अस्वप्नश् च विरोधिनां[K.विरोधिता] निशि दिवा निद्रा-अलस-ध्यानता।

९२.०५द् सादो -अधो-मुखता विचेष्टितम् इदं नेष्टं स्मृतं वाजिनाम्॥

९२.०६ आरोहणम् अन्य-वाजिनां पर्याण-आदियुतस्य वाजिनः।

९२.०६ उपवाह्य-तुरङ्गमस्य वा कल्पस्य-एव विपन्न-शोभना॥

९२.०७अ क्रौञ्चवद् रिपु-वधाय ह्रेषितं[K.हेषितं]

९२.०७ब् ग्रीवया त्व् अचलया च स-उन्मुखम्।

९२.०७च् स्निग्धम् उच्चम् अनुनादि हृष्टवद्-

९२.०७द् ग्रास-रुद्ध-वदनैश् च वाजिभिः॥

९२.०८अ पूर्णपात्र-दधि-विप्र-देवता

९२.०८ब् गन्ध-पुष्प-फल-काञ्चन-आदि वा।

९२.०८च् द्रव्यम् इष्टम् अथ वा परं भवेद्

९२.०८द् ध्रेषतां[K.धेषतां] यदि समीपतो जयः॥

९२.०९अ भक्ष्य-पान-खलिन-अभिनन्दिनः

९२.०९ब् पत्युर् औपयिक-नन्दिनो -अथ वा।

९२.०९च् सव्य-पार्श्व-गत-दृष्टयो -अथ वा

९२.०९द् वाञ्छित-अर्थ-फलदास् तुरङ्गमाः॥

९२.१०अ वामैश् च पादैर् अभिताडयन्तो महीं

९२.१०ब् प्रवासाय भवन्ति भर्तुः।

९२.१०च् सन्ध्यासु दीप्ताम् अवलोकयन्तो

९२.१०द् ह्रेषन्ति[K.हेषन्ति] चेद् बन्ध-पराजयाय॥

९२.११अ अतीव ह्रेषन्ति[K.हेषन्ति] किरन्ति वालान्

९२.११ब् निद्रारताश् च प्रवदन्ति यात्राम्।

९२.११च् रोम-त्यजो दीन-खर-स्वराश् च

९२.११द् पांशून् ग्रसन्तश् च भयाय दृष्टाः॥

९२.१२अ समुद्गवद् दक्षिण-पार्श्व-शायिनः

९२.१२ब् पदं समुत्क्षिप्य च दक्षिणं स्थिताः।

९२.१२च् जयाय शेषेष्व् अपि वाहनेष्व् इदं

९२.१२द् फलं यथासम्भवम् आदिशेद् बुधः॥

९२.१३अ आरोहति क्षितिपतौ विनय-उपपन्नो

९२.१३ब् यात्रा-अनुगो -अन्य-तुरगं प्रतिहेषते[K.प्रतिहेषते] च।

९२.१३च् वक्त्रेण वा स्पृशति दक्षिणम् आत्म-पार्श्वं

९२.१३द् यो -अश्वः स भर्तुर् अचिरात् प्रचिनोति लक्ष्मीम्॥

९२.१४अ मुहुर्मुहुर् मूत्र-शकृत् करोति

९२.१४ब् न ताड्यमानो -अप्य् अनुलोमयायी।

९२.१४च् अकार्य-भीतो -अशु-विलोचनश् च

९२.१४द् शिवं[K.शुभम्] न भर्तुस् तुरगो -अभिधत्ते॥

९२.१५ उक्तम् इदं हय-चेष्टितम् अत ऊर्ध्वं दन्तिनां प्रवक्ष्यामि।

९२.१५ तेषां तु दन्त-कल्पन-भङ्ग-म्लान-आदि-चेष्टाभिः॥

९३ हस्तिचेष्टिताध्यायः

९३.०१ दन्तस्य मूल-परिधिं द्विर् आयतं प्रोह्य कल्पयेत्-शेषम्।

९३.०१ अधिकम् अनूप-चराणां न्यूनं गिरि-चारिणां किञ् चित्॥

९३.०२ श्रीवत्स-वर्धमान-च्छत्र-ध्वज-चामर-अनुरूपेषु।

९३.०२ छेदे दृष्टेष्व् आरोग्य-विजय-धन-वृद्धि-सौख्यानि॥

९३.०३ प्रहरण-सदृशेषु जयो नन्द्यावर्ते प्रनष्ट-देश-आप्तिः।

९३.०३ लोष्टे तु लब्ध-पूर्वस्य भवति देशस्य सम्प्राप्तिः॥

९३.०४ स्त्रीरूपे -अश्व-विनाशो[K.स्वविनाशो] भृङ्गारे -अभ्युत्थिते सुत-उत्पत्तिः।

९३.०४ कुम्भेन निधि-प्राप्तिर् यात्रा-विघ्नं च दण्डेन॥

९३.०५ कृकलास-कपि-भुजङ्गेष्व् असुभिक्ष-व्याधयो रिपु-*वशित्वम्[K.वशत्वम्]।

९३.०५ गृध्र-उलूक-ध्वाङ्क्ष-श्येन-आकारेषु जनमरकः॥

९३.०६ पाशे -अथ वा कबन्धे नृप-मृत्युर् जन-विपत् सुते रक्ते।

९३.०६ कृष्णे श्यावे रूक्षे दुर्गन्धे च-अशुभं भवति॥

९३.०७ शुक्लः समः सुगन्धिः स्निग्धश् च शुभ-आवहो भवेच् छेदः।

९३.०७ गलन-म्लान-फलानि च दन्तस्य समानि भङ्गेन॥

९३.०८अ मूल-मध्य-दशन-अग्र-संस्थिता

९३.०८ब् देव-दैत्य-मनुजाः क्रमात् ततः।

९३.०८च् स्फीत-मध्य-परिपेलवं फलं
९३.०८द् शीघ्र-मध्य-चिरकाल-सम्भवम्॥

९३.०९ दन्त-भङ्ग-फलम् अत्र दक्षिणे भूप-देश-बल-विद्रव-प्रदम्।

९३.०९ वामतः सुत-पुरोहित-इभयान्[K.इभपान्] हन्ति साटविक-दार-नायकान्॥

९३.१० आदिशेद् उभय-भङ्ग-दर्शनात् पार्थिवस्य सकलं कुल-क्षयम्।

९३.१० सौम्य-लग्न-तिथि-भ-आदिभिः शुभं वर्धते -अशुभम् अतो -अन्यथा वदेत्[K.भवेत्]॥

९३.११ क्षीर-मृष्ट[K.क्षीरवृक्ष]-फल-पुष्प-पादपेष्व् आपगा-तट-विघट्टितेन वा।

९३.११ वाम-मध्य-रद-भङ्ग-खण्डने[K.खण्डनं] शत्रु-नाशकृद् अतो -अन्यथा परम्॥

९३.१२अ स्खलित-गतिर् अकस्मात् त्रस्त-कर्णो -अतिदीनः

९३.१२ब् श्वसिति मृदु सुदीर्घं न्यस्त-हस्तः पृथिव्याम्।

९३.१२च् द्रुत-मुकुलित-दृष्टिः स्वप्न-शीलो विलोमो

९३.१२द् भयकृद् अहित-भक्षी नैकशो *-असृक्-शकृत्-कृत्[K.-असृक् छकृत् च]॥

९३.१३अ वल्मीक-स्थाणु-गुल्म-क्षुप-तरु-मथनः स्व-इच्छया हृष्ट-दृष्टिर्

९३.१३ब् यायाद् यात्रा-अनुलोमं त्वरित-पद-गतिर् वक्त्रम् उन्नाम्य च-उच्चैः।

९३.१३च् कक्ष्या-सन्नाह-काले जनयति च मुहुः शीकरं बृंहितं वा

९३.१३द् तत्काले[K.तत्कालं] वा मदास्रिर् जयकृद् अथ रदं वेष्टयन् दक्षिणं च॥

९३.१४अ प्रवेशनं वारिणि वारणस्य

९३.१४ब् ग्राहेण नाशाय भवेन् नृपस्य।

९३.१४च् ग्राहं गृहोत्वा[K.ग्रिहीत्वा]-उत्तरणं नृपस्य[K.ऊ.द्विपस्य]

९३.१४द् तोयात् स्थलं वृद्धि-करं नृभर्तुः॥

९४ वायसविरुताध्यायः

९४.०१ प्राच्यानां दक्षिणतः शुभदाः[K.शुभदः] काकाः करायिका वामाः[K.वामा]।

९४.०१ विपरीतम् अन्य-देशेष्व् अवधिर् लोक-प्रसिद्ध्या-एव॥

९४.०२ वैशाखे निरुपहते वृक्षे नीडः सुभिक्ष-शिव-दाता।

९४.०२ निन्दित-कण्टकि-शुष्केष्व् असुभिक्ष-भयानि तद्देशे॥

९४.०३ नीडे प्राक् शाखायां शरदि भवेत् प्रथम-वृष्टिर् अपरस्याम्।

९४.०३ याम्य-उत्तरयोर् मध्यात्[K.मध्या] प्रधान-वृष्टिस् तरोर् उपरि॥

९४.०४ शिखि-दिशि मण्डल-वृष्टिर् नैरृत्यां शारदस्य निष्पत्तिः।

९४.०४ परिशेषयोः सुभिक्षं मूषक-*सम्पच् च[K.सम्पत् तु] वायव्ये॥

९४.०५ शर-दर्भ-गुल्म-वल्ली-धान्य-प्रासाद-गेह-निम्नेषु।

९४.०५ शून्यो भवति स देशश् चौर-अनावृष्टि-रोग-आर्तः॥

९४.०६ द्वि-त्रि-चतुः-शावत्वं सुभिक्षदं पञ्चभिर् नृप-अन्यत्वम्।

९४.०६ अण्ड-अवकिरणम् एक-अण्डता-अप्रसूतिश् च न शिवाय॥

९४.०७ चौरक-वर्णैश् चौराश् चित्रैर् मृत्युः सितैस् तु वह्नि-भयम्।

९४.०७ विकलैर् दुर्भिक्ष-भयं काकानां निर्दिशेत्-शिशुभिः॥

९४.०८ अनिमित्त-संहतैर् ग्राम-मध्यगैः क्षुद्-भयं प्रविरुवद्भिः[K.प्रवाशद्भिः]।

९४.०८ रोधश् चक्र-आकारैर् अभिघातो वर्ग-वर्ग-स्थैः॥

९४.०९ अभयाश् च तुण्ड-पक्षैश् चरण-विघातैर् जनान् अभिभवन्तः।

९४.०९ कुर्वन्ति शतु-वृद्धिं निशि विचरन्तो जन-विनाशम्॥

९४.१० सव्येन खे भ्रमद्भिः स्वभयं विपरीत-मण्डलैश् च परात्।

९४.१० अत्याकुलं भ्रमद्भिर् वात-उद्भ्रमो भवति काकैः॥

९४.११ ऊर्ध्व-मुखाश् चल-पक्षाः पथि भयदाः क्षुद्-भयाय धान्य-मुषः।

९४.११ सेना-अङ्ग-स्था युद्धं परिमोषं च-अन्यभृत-पक्षाः॥

९४.१२ भस्म-अस्थि-केश-पत्राणि विन्यसन् पति-वधाय शय्यायाम्।

९४.१२ मणि-कुसुम-आद्य्-अवहनने[K.अवहनेन] सुतस्य *जन्माप्यथा-अङ्गनायाश्[K.जन्माङ्गनायाश् च][U - जन्म-अन्यथा-अङ्गनायाश्] च॥

९४.१३ पूर्णानने -अर्थ-लाभः सिकता-धान्य-आर्द्रमृत्-कुसुम-पूर्वैः।

९४.१३ भयदो जन-संवासाद् यदि भाण्डान्य् अपनयेत् काकः॥

९४.१४ वाहन-शस्त्र-उपानत्-छत्रछाया-अङ्ग-कुट्टने मरणम्।

९४.१४ तत्पूजायां पूजा विष्ठा-करणे -अन्न-सम्प्राप्तिः॥

९४.१५ यद् द्रव्यम् उपनयेत् तस्य लब्धिर् अपहरति चेत् प्रणाशः स्यात्।

९४.१५ पीत-द्रव्यैः[K.पीतद्रव्ये] कनकं वस्त्रं *कार्पासिकैः सितैः[K.कार्पासिके सिते] रूप्यम्॥

९४.१६ सक्षीर-अर्जुन-वञ्जुल-कूलद्वय-पुलिन-गा रुवन्तश् च।

९४.१६ प्रावृषि वृष्टिं दुर्दिनम् अनृतौ स्नाताश् च पांशु-जलैः॥

९४.१७ दारुण-नादस् तरु-कोटर-उपगो वायसो महा-भयदः।

९४.१७ सलिलम् अवलोक्य विरुवन् वृष्टिकरो -अब्द-अनुरावी च॥

९४.१८ दीप्त-उद्विग्नो विटपे विकुट्टयन् वह्निकृद् विधुत-पक्षः।

९४.१८ रक्त-द्रव्यं दग्धं तृण-काष्ठं वा गृहे विदधत्॥

९४.१९ ऐन्द्र्य-आदि-दिग् अवलोकी सूर्य-अभिमुखो रुवन् गृहे गृहिनः।

९४.१९ राजभय-चोर-बन्धन-कलहाः स्युः पशु-भयं च-इति॥

९४.२० शान्ताम् ऐन्द्रीम् अवलोकयन् रुयाद् राजपुरुष-मित्र-आप्तिः।

९४.२० भवति च सुवर्ण-लब्धिः शाल्य्-अन्न-गुड-अशन-आप्तिश् च॥

९४.२१ आग्नेय्याम् अनलाजीविक-युवति-प्रवर-धातु-लाभश् च।

९४.२१ याम्ये माष-कुलूत्था[K.कुलत्था]भोज्यं गान्धर्विकैर् योगः॥

९४.२२ नैरृत्यां दूत-अश्व-उपकरण-दधि-तैल-पलल-भोज्य-आप्तिः।

९४.२२ वारुण्यां मांस-सुरा-आसव-धान्य-समुद्र-रत्न-आप्तिः॥

९४.२३ मारुत्यां शस्त्र-आयुध-सरोज-वल्ली-फल-अशन-आप्तिश् च।

९४.२३ सौम्यायां परम-अन्न-अशनं तुरङ्ग-अम्बर-प्राप्तिः॥

९४.२४ ऐशान्यां सम्प्राप्तिर् घृत-पूर्णानां भवेद् अनडुहश् च।

९४.२४ एवं फलं गृहपतेर् गृह-पृष्ठ-समाश्रिते भवति॥

९४.२५ गमने कर्णसमश् चेत् क्षेमाय न कार्य-सिद्धये भवति॥

९४.२५ अभिमुखम् उपैति यातुर् विरुवन् विनिवर्तयेद् यात्राम्॥

९४.२६ वामे वाशित्वा-आदौ दक्षिण-पार्श्वे -अनुवाशते यातुः।

९४.२६ अर्थ-अपहार-कारी तद्-विपरीतो -अर्थ-सिद्धि-करः॥

९४.२७ यदि वाम एव विरुवन्[K.विरुयात्] मुहुर्मुहुर् यायिनो -अनुलोम-गतिः।

९४.२७ अर्थस्य भवति सिद्ध्यै प्राच्यानां दक्षिणश् च-एवम्॥

९४.२८ वामः प्रतिलोम-गतिर् विरुवन्[K.वाशन्] गमनस्य विघ्नकृद् भवति।

९४.२८ तत्रस्थस्य-एव फलं कथयति तद्-वाञ्छितं गमने॥

९४.२९ दक्षिण-विरुतं कृत्वा वामे विरुयाद् यथा-ईप्सित-अवाप्तिः।

९४.२९ प्रतिवाश्य पुरो यायाद् द्रुतम् *अत्यर्थागमो भवति[K.अग्रे -अर्थागमो -अतिमहान्]॥

९४.३० प्रतिवाश्य पृष्ट्ःतो दक्षिणेन यायाद् द्रुतं क्षतज-कारी[K.क्षतजकर्ता]।

९४.३० एकचरणो -अर्कम् ईक्षन् विरुवंश् च पुरो रुधिर-हेतुः॥

९४.३१ दृष्ट्वा-अर्कम् एकपादस् तुण्डेन लिखेद् यदा स्वपिच्छानि।

९४.३१ पुरतो जनस्य महतो वधम् अभिधत्ते तदा बलिभुक्॥

९४.३२ सस्य-उपेते क्षेत्रे विरुवति शान्ते ससस्य-भू-लब्धिः।

९४.३२ आकुल-चेष्टो विरुवन् सीमान्ते क्लेशकृद् यातुः॥

९४.३३ सुस्निग्ध-पत्र-पल्लव-कुसुम-फल-आनम्र-सुरभि-मधुरेषु।

९४.३३ सक्षीर-अव्रण-संस्थित-मनोज्ञ-वृक्षेषु च-अर्थ-सिद्धि-करः[K.चार्थकरः]॥

९४.३४ निष्पन्न-सस्य-शाद्वल[K.शाङ्वल, Kऽस् त्र्. शाद्वल]-भवन-प्रासाद-हर्म्य-हरितेषु।

९४.३४ धन्य[K.धान्य]-उच्छ्रय-मङ्गल्येषु च-एव विरुवन् धन-आगमदः॥

९४.३५ गोपुच्छस्थे वल्मीकगे -अथ वा दर्शनं भुजङ्गस्य।

९४.३५ सद्यो ज्वरो महिषगे विरुवति गुल्मे फलं स्वल्पम्॥

९४.३६ कार्यस्य व्याघातस् तृणकूटे वामगे -अम्बु-संस्थे[K.अस्थिसंस्थे] वा।

९४.३६ ऊर्ध्व-अग्नि-प्लुष्टे -अशनि-हते च काके वधो भवति॥

९४.३७ कण्टकि-मिश्रे सौम्ये सिद्धिः कार्यस्य भवति कलहश् च।

९४.३७ कण्टकिनि भवति कलहो वल्ली-परिवेष्टिते बन्धः॥

९४.३८ छिन्न-अग्रे -अङ्ग-च्छेदः कलहः शुष्क-द्रुम-स्थिते ध्वांक्षे।

९४.३८ पुरतश् च पृष्ठतो वा गोमय-संस्थे धन-प्राप्तिः॥

९४.३९ मृत-पुरुष-अङ्ग-अवयव-स्थितो -अभिविरुवन्[K.-अभिवाशन्] करोति मृत्यु-भयम्।

९४.३९ भञ्जन्न् अस्थि च चञ्च्वा यदि विरुवत्य्[K.वाशत्य्] अस्थि-भङ्गाय॥

९४.४० रज्ज्व्-अस्थि-काष्ठ-कण्टकि-निःसार-शिरोरुह-आनने रुवति।

९४.४० भुजग-गद-दंष्ट्रि-तस्कर-शस्त्र-अग्नि-भयान्य् अनुक्रमशः॥

९४.४१ सितकुसुम-अशुचि-मांस-आनने -अर्थ-सिद्धिर् यथा-ईप्सिता यातुः।

९४.४१ *पक्षौ धुन्वन्न्[K.धुन्वन् पक्षाव्] ऊर्ध्व-आनने च विघ्नं मुहुः क्वणति॥

९४.४२ यदि शृङ्खलां वरत्रां वल्लीं वा-आदाय वाशते बन्धः।

९४.४२ पाषाण-स्थे च भयं क्लिष्ट-अपूर्व-अध्विक-युतिश् च॥

९४.४३ अन्योन्य-भक्ष-संक्रामित-आनने तुष्टिर् उत्तमा भवति।

९४.४३ विज्ञेयः स्त्री-लाभो दम्पत्योर् विरुवतोर्[K.वाशतोर्] युगपत्॥

९४.४४ प्रमदा-शिर-उपगत-पूर्ण-कुम्भ-संस्थे -अङ्गना-अर्थ-सम्प्राप्तिः।

९४.४४ घट-कुट्टने सुत-विपद् घट-उपहदने -अन्न-सम्प्राप्तिः॥

९४.४५ स्कन्धावार-आदीनां निवेश-समये रुवंश् चलत्-पक्षः।

९४.४५ सूचयते -अन्यत्-स्थानं[K.-अन्यस्थानं] निश्चल-पक्षस् तु भय-मात्रम्॥

९४.४६ प्रविशद्भिः सैन्य-आदीन् सगृध्र-कङ्कैर् विना-आमिषं ध्वांक्षैः।

९४.४६ अविरुद्धैस् तैः प्रीतिर् द्विषतां युद्धं विरुद्धैश् च॥

९४.४७ बन्धः सूकर-संस्थे पङ्क्तिक्ते सूकरे द्विके -अर्थ-आप्तिः।

९४.४७ क्षेमं खर-उष्ट्र-संस्थे के चित् प्राहुर् वधं तु खरे॥

९४.४८ वाहनलाभो -अश्वगते विरुवत्य् अनुयायिनि क्षतजपातः।

९४.४८ अन्ये -अप्य् अनुव्रजन्तो यातारं काकवद् विहगाः॥

९४.४९ द्वात्रिंशत् प्रविभक्ते दिग्चक्रे यद् यथा समुद्दिष्टम्।

९४.४९ तत्तत् तथा विधेयं गुण-दोष-फलं यियासूनाम्॥

९४.५० का इति काकस्य रुतं स्व-निलय-संस्थस्य निष्फलं प्रोक्तम्।

९४.५० कव इति च-आत्मप्रीत्यै क-इति रुते स्निग्ध-मित्र-आप्तिः॥

९४.५१ करा-इति कलहं कुरुकुरु च हर्षम् अथ कटकट-इति दधिभक्तम्।

९४.५१ केके विरुतं कुकु वा धन-लाभं यायिनः प्राह॥

९४.५२ खरेखरे पथिक-आगमम् आह कखाखा-इति यायिनो मृत्युम्।

९४.५२ गमन-प्रतिषेधिकम् आ कखला[K.आखलखल, Kऽस् त्र्. आ खलखल] सद्यो -अभिवर्षाय॥

९४.५३ काका-इति विघातः[K.विघातं] काकटि-इति च-आहार-दूषणं प्राह।

९४.५३ प्रीत्य्-आस्पदं कवकव-इति बन्धम् एवं कगाकुर् इति॥

९४.५४ करगौ[K.करकौ] विरुते वर्षं गुडवत् त्रासाय वड् इति वस्त्र-आप्तिः।

९४.५४ कलय-इति च संयोगः शूद्रस्य ब्राह्मणैः साकम्॥

९४.५५अ कड् [K.फड्] इति फलाप्तिः फलदा[K.फलवा]-

९४.५५ब् अहिदर्शनं टट्टिति[K.टडिति] प्रहाराः स्युः।

९४.५५च् स्त्री-लाभः स्त्रीति रुते

९४.५५ब् गड् इति गवां पुड् इति पुष्पाणाम्॥

९४.५६ युद्धाय टाकुटाक्व् इति गुहु वह्नि-भयं कटेकटे कलहः।

९४.५६ टाकुलि चिण्टिचि केकेक-इति पुरं च-इति दोषाय॥

९४.५७अ काक-द्वयस्य-अपि समानम् एतत्

९४.५७ब् फलं यदुक्तं रुत-चेष्टित-आद्यैः।

९४.५७च् पतत्रिणो -अन्ये -अपि यथा-एव काको

९४.५७द् वन्याः श्ववच् च-उपरिदंष्ट्रिणो ये॥

९४.५८अ स्थल-सलिल-चराणां व्यत्ययो मेघ-काले

९४.५८ब् प्रचुर-सलिल-वृष्ट्यै शेषकाले भयाय।

९४.५८च् मधु भवन-निलीनं तत् करोत्य् आशु शून्यं

९४.५८द् मरणम् अपि *च नीला[K.निलीना] मक्षिका मूर्ध्नि लीना॥

९४.५९अ विनिक्षिपन्त्यः सलिले -अण्डकानि

९४.५९ब् पिपीलिका वृष्टि-निरोधम् आहुः।

९४.५९च् *तरुं स्थलं[K.तरुस्थलं, Kऽस् त्र्.तरुं स्थलं] वा-अपि नयन्ति निम्नाद्

९४.५९द् यदा तदा ताः कथयन्ति वृष्टिम्॥

९४.६०अ कार्यं तु मूल-शकुने -अन्तरजे तदह्नि

९४.६०ब् विन्द्यात् फलं नियतम् एवम् इमे विचिन्त्याः।

९४.६०च् प्रारम्भ-यान-समयेषु तथा प्रवेशे

९४.६०द् ग्राह्यं क्षुतं न शुभदं क्व चिद् अप्य् उशन्ति॥

९४.६१अ शुभं दशा-पाकम् अविघ्न-सिद्धिं

९४.६१ब् मूल-अभिरक्षाम् अथ वा सहायान्।

९४.६१च् दुष्टस्य[K.इष्टस्य] संसिद्धिम् अनामयत्वं

९४.६१द् वदन्ति ते मानयितुर् नृपस्य॥

९४.६२अ क्रोशाद् ऊर्ध्वं शकुन[K.शकुनि]विरुतं निष्फलं प्राहुर् एके

९४.६२ब् तत्र-अनिष्टे प्रथम-शकुने मानयेत् पञ्च षट् च।

९४.६२च् प्राणायामान् नृपतिर् अशुभे षोडश-एव द्वितीये

९४.६२द् प्रत्यागच्छेत् स्वभवनम् अतो यद्य् अनिष्टस् तृतीयः॥

९५ शाकुन-उत्तराध्यायः

९५.०१ दिग्-देश-चेष्टा-स्वर-वासर-ऋक्ष-मुहूर्त-होरा-करण-उदय-अंशान्।

९५.०१ चर-स्थिर[K.चिरस्थिर, Kऽस् त्र्. चरस्थिर]-उन्मिश्र-बल-अबलं च बुद्ध्वा फलानि प्रवदेद् रुतज्ञः॥

९५.०२अ द्विविधं कथयन्ति संस्थितानाम्

९५.०२ब् आगामि-स्थिर-संज्ञितं च कार्यम्।

९५.०२च् नृप-दूत-चर-अन्यदेश-जातान्य्

९५.०२द् अभिघातः स्वजनादि च-आगम-आख्यम्॥

९५.०३अ उद्बद्ध-संग्रहण-भोजन-चौर-वह्नि-

९५.०३ब् वर्ष-उत्सव-आत्मज-वधाः कलहो भयं च।

९५.०३च् वर्गः स्थिरो -अयम् उदय-इन्दुयुते स्थिर-ऋक्षे

९५.०३द् विद्यात् स्थिरं चरगृहे च चरं यद् उक्तम्॥

९५.०४ स्थिर-प्रदेश-उपल-मन्दिरेषु सुरालये भू-जल-सन्निधौ च।

९५.०४ स्थिराणि कार्याणि चराणि यानि चल-प्रदेश-आदिषु च-आगमाय॥

९५.०५अ आप्य-उदय-ऋक्ष-क्षण-दिग्-जलेषु

९५.०५ब् पक्ष-अवसानेषु च ये प्रदीप्ताः।

९५.०५च् सर्वे -अपि ते वृष्टिकरा रुवन्तः

९५.०५द् शान्तो -अपि वृष्टिं कुरुते -अम्बुचारी॥

९५.०६अ आग्नेय-दिग्-लग्न-मुहूर्त-देशेष्व्

९५.०६ब् अर्क-प्रदीप्तो -अग्निभयाय रौति।

९५.०६च् विष्ट्यां यम-ऋक्ष-उदय-कण्टकेषु

९५.०६द् निष्पत्र-वल्लीषु च दोषकृत्[K.मोषकृत्] स्यात्॥

९५.०७अ ग्राम्यः प्रदीप्तः स्वर-चेष्टिताभ्याम्
९५.०७ब् उग्रो रुवन् कण्टकिनि स्थितश् च।

९५.०७च् भौम-ऋक्षलग्ने यदि नैरृतीं च

९५.०७द् स्थितो -अभितश् चेत् कलहाय दृष्टः॥

९५.०८अ लग्ने -अथ वा-इन्दोर् भृगु-भ-अंश-संस्थे

९५.०८ब् विदिक्-स्थितो -अधो-वदनश् च रौति।

९५.०८च् दीप्तः स चेत् संग्रहणं करोति

९५.०८द् योन्या तया या विदिशि प्रदिष्टा॥

९५.०९अ पुंराशि-लग्ने विषमे तिथौ च

९५.०९ब् दिक्स्थः प्रदीप्तः शुकुनो नर-आख्यः।

९५.०९च् वाच्यं तदा संग्रहणं नराणां

९५.०९द् मिश्रे भवेत् पण्डक-सम्प्रयोगः॥

९५.१०अ एवं रवेः क्षेत्र-नवांश-लग्ने

९५.१०ब् लग्ने स्थिते वा स्वयम् एव सूर्ये।

९५.१०च् दीप्तो -अभिधत्ते शकुनो विरौति[K.विवासं]

९५.१०द् पुंसः प्रधानस्य हि कारणं तत्॥

९५.११ प्रारम्भमाणेषु[K.प्रारभ्यमाणेषु] च सर्व-कार्येष्व् अर्क-अन्विताद् भाद् गणयेद् विलग्नम्।

९५.११ सम्सद् विपच् च-इति यथा क्रमेण सम्पद् विपच् च-इति[K.वा-अपि] तथ-एव वाच्यम्[K.वाच्या]॥

९५.१२अ काणेन-अक्ष्णा दक्षिणेन-एति सूर्ये

९५.१२ब् चन्द्रे लग्नाद् द्वादशे च-इतरेन।

९५.१२च् लग्नस्थे -अर्के पापदृष्टे -अन्ध एव

९५.१२द् कुब्जः स्व-ऋक्षे श्रोत्र-हीनो जडो वा॥

९५.१३अ क्रूरः षष्ठे क्रूरदृष्टो विलग्नाद्

९५.१३ब् यस्मिन् राशौ तद्गृह-अङ्गे व्रणो -अस्य[K.स्यात्]।

९५.१३च् एवं प्रोक्तं यन् मया जन्मकाले

९५.१३द् चिह्नं रूपं तत् तद् अस्मिन् विचिन्त्यम्॥

९५.ऋ१अ अतः परं लोक-निरूपितानि[K.ओमित्स् fरोम् ९५.ऋ१अ तो ९५.ऋ३२द्]

९५.ऋ१ब् द्रव्येषु नाना-अक्षर-संग्रहाणि।

९५.ऋ१च् इष्ट-प्रणीतानि विभाजितानि

९५.ऋ१द् नामानि केन्द्र-क्रमशः प्रवक्ष्ये॥

९५.ऋ२अ लग्न-अम्बु-संस्थ-अस्त-नभःस्थितेषु

९५.ऋ२ब् क्षेत्रेषु ये लग्नगता गृह-अंशाः।

९५.ऋ२च् तेभ्यो -अक्षराण्य् आत्मगृह-आश्रयाणि

९५.ऋ२द् विन्द्याद् ग्रहाणां स्वगण-क्रमेण॥

९५.ऋ३अ क-वर्ग-पूर्वान् कुज-शुक्र-चान्द्रि-

९५.ऋ३ब् जीव-अर्कजानां प्रवदन्ति वर्गान्।

९५.ऋ३च् य-कार-पूर्वाः शशिनो निरुक्ता

९५.ऋ३द् वर्णास् त्व् अ-कार-प्रभवा रवेः स्युः॥

९५.ऋ४अ द्रेष्काण-वृद्ध्या प्रवदन्ति नाम

९५.ऋ४ब् त्रि-पञ्च-सप्त-अक्षरम् ओजराशौ।

९५.ऋ४च् युग्मे तु विन्द्याद् द्वि-चतुष्क-षट्कं

९५.ऋ४द् नाम-अक्षराणि ग्रह-दृष्टि-वृद्ध्या॥

९५.ऋ५अ वर्गोत्तमे द्व्य-क्षरकं चर-अंशे

९५.ऋ५ब् स्थिर-ऋक्ष-भागे चतुर्-अक्षरं तत्।

९५.ऋ५च् ओजेषु च-एभ्यो विषम-अक्षराणि

९५.ऋ५द् स्युर् द्विस्वभावेषु तु राशिवच् च॥

९५.ऋ६अ द्विमूर्ति-संज्ञे तु वदेद् द्विनाम

९५.ऋ६ब् सौम्य-ईक्षिते द्विप्रकृतौ च राशौ।

९५.ऋ६च् यावान् गणः स्व-उदयगो -अंशकानां

९५.ऋ६द् तावान् ग्रहः संग्रहके -अक्षराणाम्॥

९५.ऋ७अ संयोगम् आदौ बहुलेषु विन्द्यात्

९५.ऋ७ब् कूटेषु संयोगपरं वदन्ति।

९५.ऋ७च् स्व-उच्चांशके द्विष्कृतम् ऋक्ष-योगाद्

९५.ऋ७द् गुर्व्-अक्षरं तद्-भवन-अंशके स्यात्॥

९५.ऋ८अ मात्रा-आदि-युक् स्याद् ग्रहयुक्-त्रिकोणे

९५.ऋ८ब् द्रेष्काण-पर्यायवद् अक्षरेषु।

९५.ऋ८च् नभो-बलेषु-ऊर्ध्वम् अधो -अम्बुजेषु

९५.ऋ८द् ज्ञेयो *विसर्गस् तु बल[U - विसर्गो-अस्तबल]-अन्वितेषु॥

९५.ऋ९अ शीर्ष-उदयेषु-ऊर्ध्वम् उशन्ति मात्राम्

९५.ऋ९ब् अधश् च पृष्ठ-उदय-शब्दितेषु।

९५.ऋ९च् तीर्यक् च विन्द्याद् उभय-उदये तां

९५.ऋ९द् दीर्घेषु दीर्घाम् इतरेषु च-अन्याम्॥

९५.ऋ१०अ प्राग्-लग्न-तोय-अस्त-नभःस्थितेषु

९५.ऋ१०ब् भेष्व् अंशकेभ्यो -अक्षर-संग्रहः स्यात्।

९५.ऋ१०च् क्रूरो -अक्षरं हन्ति चतुष्टयस्थो

९५.ऋ१०द् दृष्ट्या-अपि मात्रां च त्रिकोणगो वा॥

९५.ऋ११अ शुभग्रहस् तु-ऊर्जित-वीर्य-भागी

९५.ऋ११ब् स्थान-अंश-तुल्य-अक्षरदः स च-उक्तः।

९५.ऋ११च् पश्यन् स्थितः केन्द्र-त्रिकोणयोर् वा

९५.ऋ११द् स्व-उच्चे -अपि वर्ण-द्वयम् आत्म-भागे॥

९५.ऋ१२अ क्षेत्रेश्व् अरे क्षीणबले -अंशके च

९५.ऋ१२ब् मात्रा-अक्षरं नाशम् उपैति तज्ञम्।

९५.ऋ१२च् असम्भवे -अप्य् उद्भवम् एति तस्मिन्

९५.ऋ१२द् वर्ग-आद्यम् उच्चांश-युजि-ईश-दृष्टे॥

९५.ऋ१३अ केन्द्रे यथास्थान-बल-प्रकर्षं

९५.ऋ१३ब् क्षेत्रस्य तत्-क्षेत्र-पतेश् च बुद्ध्वा।

९५.ऋ१३च् कार्यो -अक्षराणाम् अनुपूर्वयोगो

९५.ऋ१३द् मात्रा-आदि-संयोग-विकल्पना च॥

९५.ऋ१४अ तत्र-आदिराश्य्-आदि-चतुर्-विलग्नम्

९५.ऋ१४ब् आद्य्-अंशक-आदि-क्रम-पर्यायेण।

९५.ऋ१४च् ग्रहांशकेभ्यः स्वगण-अक्षराणाम्

९५.ऋ१४द् अन्वर्थने प्राप्तिर् इयं विधार्या॥

९५.ऋ१५अ मेषे ककारो हिबुके यकारस्

९५.ऋ१५ब् तुले चकारो मकरे पकारः।

९५.ऋ१५च् मेषे छकारो हिबुके -अप्य् अकारस्

९५.ऋ१५द् तुले खकारो मकरे फकारः॥

९५.ऋ१६अ मेषे टकारो हिबुके ठकारस्

९५.ऋ१६ब् तुले तकारो मकरे थकारः।

९५.ऋ१६च् मेषे तु रेफा हिबुके जकारस्

९५.ऋ१६द् तुले बकारो मकरे गकारः॥

९५.ऋ१७अ आकारम् आद्ये -अम्बुगते घकारम्

९५.ऋ१७ब् अस्ते भकारं मकरे झकारम्।

९५.ऋ१७च् लग्ने डकारं हिबुके दकारम्

९५.ऋ१७द् अस्ते धकारं मकरे ढकारम्॥

९५.ऋ१८अ लग्ने ञकारो हिबुके मकारस्

९५.ऋ१८ब् तुले ङकारो मकरे लकारः।

९५.ऋ१८च् लग्ने ककारो हिबुके पकारस्

९५.ऋ१८द् तुले चकारो मकरे इकारः॥

९५.ऋ१९अ लग्ने नकारो हिबुके तकारस्

९५.ऋ१९ब् तुले णकारो मकरे टकारः।

९५.ऋ१९च् इत्य् एतद् उक्तं चरसंज्ञकस्य

९५.ऋ१९द् वक्ष्ये स्थिराख्यस्य चतुष्टयस्य॥

९५.ऋ२०अ वृषे फकारो हिबुके खकारः

९५.ऋ२०ब् कीटे वकारो नृघटे छकारः।

९५.ऋ२०च् आद्यांशकेभ्यो मतिमान् विदध्याद्

९५.ऋ२०द् अनुक्रमेण स्थिरसंज्ञकेषु॥

९५.ऋ२१अ लग्ने बकारो हिबुके जकार

९५.ऋ२१ब् ईकारम् अस्ते -अम्बरगे गकारः।

९५.ऋ२१च् वृषे थकारो हिबुके टकारः

९५.ऋ२१द् कीटे डकारो नृघटे दकारः॥

९५.ऋ२२अ वृषे घकारो हिबुके शकारः

९५.ऋ२२ब् कीटे झकारो नृघटे भकारः।

९५.ऋ२२च् लग्ने जकारो हिबुके उकारः

९५.ऋ२२द् कीटे ङकारो नृघटे मकारः॥

९५.ऋ२३अ लग्ने ढकारो -अथ जले णकारश्

९५.ऋ२३ब् चास्ते धकारो -अम्बरगे नकारः।

९५.ऋ२३च् वृषे षकारो हिबुके चकारः

९५.ऋ२३द् कीटे पकारो नृघटे ककारः॥

९५.ऋ२४अ ऊकारम् आहुर् वृषभे जले खम्

९५.ऋ२४ब् अस्ते फकारो नृघटे छकारः।

९५.ऋ२४च् अन्त्ये वृषे टम् तम् उशन्ति सिंहे

९५.ऋ२४द् थं सप्तगे ठं प्रवदन्ति कुम्भे॥

९५.ऋ२५अ द्विर्मूर्तिसंज्ञे मिथुने जकाराः

९५.ऋ२५ब् षष्ठे बकारः प्रथमांशके स्यात्।

९५.ऋ२५च् धनुर्धरे -अस्तोपगते गकारो

९५.ऋ२५द् मीनद्वये चाम्बरगे सकारः॥

९५.ऋ२६अ लग्ने घकारो हिबुके भकारश्

९५.ऋ२६ब् चास्ते झकारो -अम्बरमध्यगे ई।

९५.ऋ२६च् लग्ने दकारो हिबुके धकारम्

९५.ऋ२६द् अस्ते डकारं विदुर् अम्बरे ढम्॥

९५.ऋ२७अ लग्ने मकारो हिबुके ङकारश्

९५.ऋ२७ब् अस्ते हकारो -अम्बरगे ञकारः।

९५.ऋ२७च् लग्ने पकारो जलगे चकार

९५.ऋ२७द् ऐकारम् अस्ते -अम्बरगे ककारः॥

९५.ऋ२८अ प्राग्लग्ने नं जलगे णम् आहुर्

९५.ऋ२८ब् अस्तं गते टं नभसि स्थिते तम्।

९५.ऋ२८च् प्राग्लग्गे खं जलगे यम् आहुर्

९५.ऋ२८द् अस्तं गते छं नभसि स्थिते फम्॥

९५.ऋ२९अ लग्ने जम् ओकारम् अथाम्बुसंस्थे

९५.ऋ२९ब् गम् अस्तसंस्थे विदुर् अम्बरे बम्।

९५.ऋ२९च् ठं लग्गे -अन्त्ये हिबुकाश्रिते डं

९५.ऋ२९द् थम् अस्तगे दं नभसि स्थिते वै॥

९५.ऋ३०अ एवं विकल्पो -अक्षर-संग्रहो -अयं

९५.ऋ३०ब् नाम्नां निरुद्दिष्ट-विधान उक्तः।

९५.ऋ३०च् सर्वेषु लग्नेषु च के चिद् एवम्

९५.ऋ३०द् इच्छन्ति पूर्व-उक्त-विधानवत् तु॥

९५.ऋ३१अ केन्द्राणि वा केन्द्र-गत-अंशकैः स्वैः

९५.ऋ३१ब् पृथक् पृथक् संगुणितानि कृत्वा।

९५.ऋ३१च् त्रिकृद्-विभक्तं विदुर् अक्षरं तत्

९५.ऋ३१द् क्षेत्र-ईश्वरस्य-अम्श-परिक्रम-स्वम्॥

९५.ऋ३२अ संचिन्तित-प्रार्थित-निर्गतेषु

९५.ऋ३२ब् नष्ट-क्षत-स्त्री-रति-भोजनेषु।

९५.ऋ३२च् स्वप्न-ऋक्ष-चिन्ता-पुरुषादि-वर्गेष्व्

९५.ऋ३२द् एतेषु नामान्य् उपलक्षयेत

९५.१४अ द्व्यक्षरं चर-गृह-अंशक-उदये

९५.१४ब् नाम चास्य चतुर्-अक्षरं स्थिरे।

९५.१४च् नामयुग्मम् अपि च द्विमूर्तिषु

९५.१४द् त्र्यक्षरं भवति च-अस्य पञ्चभिः॥

९५.१५अ क-आद्यास् तु वर्गाः कुज-शुक्र-सौम्य-

९५.१५ब् जीव-अर्कजानां क्रमशः प्रदिष्टाः।

९५.१५च् वर्ण-अष्टकं य-आदि च शीतरश्मे

९५.१५द् रवेर् अ-कारात् क्रमशः स्वराः स्युः॥

९५.१६अ नामानि च-अग्न्य्-अम्बु-कुमार-विष्णु-

९५.१६ब् शक्र-इन्द्रपत्नी-चतुराननानाम्।

९५.१६च् तुल्यानि सूर्यात् क्रमशो विचिन्त्य

९५.१६द् द्वि-त्र्य्-आदि-वर्णैर् घटयेत् स्वबुद्ध्या॥

९५.१७अ वयांसि तेषाम् स्तन-पान-बाल्य-

९५.१७ब् व्रत-स्थिता यौवन-मध्य-वृद्धाः।

९५.१७च् अतीव-वृद्धा इति चन्द्र-भौम-

९५.१७द् ज्ञ-शुक्र-जीव-अर्क-शनैश्चराणाम्॥

९६ पाकाध्यायः

९६.०१ पक्षाद् भानोः सोमस्य मासिको -अङ्गारकस्य वक्त्र-उक्तः।

९६.०१ आदर्शनाच् च पाको बुधस्य जीवस्य वर्षेण॥

९६.०२ षड्भिः सितस्य मासैर् अब्देन शनेः सुरद्विषो -अब्दार्धात्।

९६.०२ वर्षात् सूर्यग्रहणे सद्यः स्यात् त्वाष्ट्र-कीलकयोः॥

९६.०३ त्रिभिर् एव धूमकेतोर् मासैः श्वेतस्य सप्तरात्र-अन्ते।

९६.०३ सप्ताहात् परिवेष-इन्द्रचाप-सन्ध्या-अभ्रसूचीनाम्॥

९६.०४ शीत-उष्ण-विपर्यासः फल-पुष्पम् अकालजं दिशां दाहः।

९६.०४ स्थिर-चरयोर् अन्यत्वं प्रसूति-विकृतिश् च षण्-मासात्॥

९६.०५ अक्रियमाणक-करणं भूकम्पो -अनुत्सवो दुरिष्टं च।

९६.०५ शोषश् च-अशोष्याणां स्रोतो -अन्यत्वं च वर्ष-अर्धात्॥

९६.०६ स्तम्भ-कुसूल-अर्चानां जल्पित-रुदित-प्रकम्पित-स्वेदाः।

९६.०६ मास-त्रयेण कलह-इन्द्रचाप-निर्घात-पाकाश् च॥
९६.०७ कीट-आखु-मक्षिक-उरग-बाहुल्यं मृग-विहङ्ग-विरुतं च।

९६.०७ लोष्टस्य चाप्सु तरणं त्रिभिर् एव विपच्यते मासैः॥

९६.०८ प्रसवः शुनाम् अरण्ये वन्यानां ग्राम-सम्प्रवेशश् च।

९६.०८ मधुनिलय-तोरण-इन्द्रध्वजाश् च वर्षात् समधिकाद् वा॥

९६.०९ गोमायु-गृध्र-संघा दश-अहिकाः सद्य एव तूर्य-रवः।

९६.०९ आकुष्टं पक्ष-फलं वल्मीको विदरणं च भुवः॥

९६.१० अहुताश-प्रज्वलनं घृत-तैल-वसा-आदि-वर्षणं च-अपि।

९६.१० सद्यः परिपच्यन्ते मासे -अध्यर्धे च जनवादः॥

९६.११ छत्र-चिति-यूप-हुतवह-बीजानां सप्तभिर् भवति पक्षैः।

९६.११ छत्रस्य तोरणस्य च केचिन् मासात् फलं प्राहुः ॥

९६.१२ अत्यन्त-विरुद्धानां स्नेहः शब्दश् च वियति भूतानाम्।

९६.१२ मार्जार-नकुलयोर् मूषकेण सङ्गश् च मासेन॥

९६.१३ गन्धर्वपुरं मासाद् रस-वैकृत्यं हिरण्य-विकृतिश् च।

९६.१३ ध्वज-वेश्म-पांशु-धूम-आकुला दिशश् च-अपि मास-फलाः॥

९६.१४ नवक-एक-अष्ट-दशक-एक-षट्-त्रिक-त्रिक-सङ्ख्य-मास-पाकानि।

९६.१४ नक्षत्राण्य् अश्विनिपूर्वकाणि सद्यः फल-आश्लेषा॥

९६.१५ पित्र्यान् मासः षट् सट्-त्रयो -अर्धम् अष्टौ च त्रि-षड्-एक-एकाः।

९६.१५ मास-चतुष्के -अषाढे सद्यः पाक-अभिजित्तारा॥

९६.१६ सप्त-अष्टव् अध्यर्ध त्रयस् त्रयः पञ्च च-एव मासाः स्युः।

९६.१६ श्रवण-आदीनां पाको नक्षत्राणां यथासङ्ख्यम्॥

९६.१७अ निगदित-समये न दृश्यते चेद्

९६.१७ब् अधिकतरं द्विगुणे प्रपच्यते तत्।

९६.१७च् यदि न कनक-रत्न-गो-प्रदानैर्

९६.१७द् उपशमितं विधिवद् द्विजैश् च शान्त्या॥

९७ नक्षत्रकर्मगुणाध्यायः

९७.०१ शिखि-गुण-रस-इन्द्रिय-अनल-शशि-विषय-गुण-ऋतु-पञ्च-वसु-पक्षाः।

९७.०१ विषय-एक-चन्द्र-भूत-अर्णव-अग्नि-रुद्र-अश्वि-वसु-दहनाः॥

९७.०२ भूत-शत-पक्ष-वसवो द्वात्रिंशच् च-इति तारका-मानम्।

९७.०२ क्रमशो -अश्विन्य्-आदीनां कालस् तारा-प्रमाणेन॥

९७.०३ नक्षत्रजम् उद्वाहे फलम् अब्दैस् तारका-मितैः सदसत्।

९७.०३ दिवसैर् ज्वरस्य नाशो व्याधेर् अन्यस्य वा वाच्यः॥

९७.०४ अश्वि-यम-दहन-कमलज-शशि-शूलभृद्-अदिति-जीव-फणि-पितरः।

९७.०४ योन्य्-अर्यम-दिनकृत्-त्वष्टृ-पवन-शक्राग्नि-मित्राश् च॥

९७.०५ शक्रो निर्ऋतिस् तोयं विश्वे ब्रह्मा हरिर् वसुर् वरुणः।

९७.०५ अजपादो -अहिर्बुध्न्यः पूषा चेतीश्वरा भानाम्॥

९७.०६ त्रीण्य् उत्तराणि तेभ्यो रोहिण्यश् च ध्रुवाणि तैः कुर्यात्।

९७.०६ अभिषेक-शान्ति-तरु-नगर-धर्म-बीज-ध्रुव-आरम्भान्॥

९७.०७ मूल-शिव-शक्र-भुजग-अधिपानि तीक्ष्णानि तेषु सिद्ध्यन्ति।

९७.०७ अभिघात-मन्त्र-वेताल-बन्ध-वध-भेद-संबन्धाः॥

९७.०८ उग्राणि पूर्व-भरणी-पित्र्याण्य् उत्साद-नाश-शाठ्येषु।

९७.०८ योज्यानि बन्ध-विष-दहन-शस्त्र-घात-आदिषु च सिद्ध्यै॥

९७.०९ लघु हस्त-अश्विन-पुष्याः पण्य-रति-ज्ञान-भूषण-कलासु।

९७.०९ शिल्प-औषध-यान-आदिषु सिद्धिकराणि प्रदिष्टानि॥

९७.१० मृदु-वर्गो[K.मृदुवर्गस् त्व्] -अनूराधा-चित्रा-पौष्ण-ऐन्दवानि मित्रार्थे।

९७.१० सुरतविधि-वस्त्र-भूषण-मङ्गल-गीतेषु च हितानि॥

९७.११ हौतभुजं सविशाखं मृदु-तीक्ष्णम् तद्-विमिश्र-फल-कारि।

९७.११ श्रवणत्रयम् आदित्य-आनिले च चरकर्मणि हितानि॥

९७.१२अ हस्त-त्रयं मृगशिरः श्रवण-त्रयं[K.श्रवनात्त्रयं] च

९७.१२ब् पूष-अश्वि-शक्र-गुरु-भानि पुनर्वसुश् च।

९७.१२च् क्षौरे तु कर्मणि हितान्य् उदये क्षणे वा

९७.१२द् युक्तानि च-उडुपतिना शुभतारया च॥

९७.१३अ न स्नातमात्र-गमन-उन्मुख[K.उत्सुक]-भूषितानाम्

९७.१३ब् अभ्यक्त-भुक्त-रणकाल-निरासनानाम्।

९७.१३च् सन्ध्या-*निशा-शनि-कुज-अर्क-तिथौ[K.निशोः कुजयमार्कदिने] च रिक्ते

९७.१३द् क्षौरं हितं न नवमे -अह्नि न च-अपि विष्ट्याम्॥

९७.१४ नृपाज्ञया ब्राह्मण-सम्मते च विवाहकाले मृतसूतके च।

९७.१४ बद्धस्य मोक्षे क्रतु-दीक्षणासु सर्वेषु शस्तं क्षुरकर्म भेषु॥

[K.ओने वेर्से इन्सेर्तेद्

K.९८.१५ हस्तो मूलं श्रवणा पुनर्वसुर् मृगशिरस् तथा पुष्यः।

K.९८.१५ पुंसञ्ज्ञितेषु कार्येष्व् एतानि शुभानि धिष्ण्यानि॥]

९७.१५ सावित्र-पौष्ण-अनिल-मैत्र-तिष्य-त्वाष्ट्रे तथा च-उडुगणाधिप-ऋक्षे।

९७.१५ संस्कार-दीक्षा-व्रत-मेखलादि कुर्याद् गुरौ शुक्र-बुध-इन्दुयुक्ते॥

[K.ओने वेर्से इन्सेर्तेद्

K.९८.१७ लाभे तृतीये च शुभैः समेते पापैर् विहीने शुभराशिलग्ने।

K.९८.१७ वेध्यौ तु कर्णौ त्रिदशेज्यलग्ने तिष्येन्दुचित्राहरिरेवतीषु॥]

९७.१६अ शुद्धैर् द्वादश-केन्द्र-नैधनगृहैः पापैस् त्रिषष्ठायगैर्

९७.१६ब् लग्ने केन्द्रगते -अथ वा सुरगुरौ दैत्य-इन्द्रपूज्ये -अपि वा।

९७.१६च् सर्व-आरम्भ-फल-प्रसिद्धिर् उदये राशौ च कर्तुः शुभे

९७.१६द् सग्राम्य-स्थिर-भ-उदये च भवनं कार्यं प्रवेशो -अपि वा॥

९८ तिथिकर्मगुणाध्यायः

९८.०१ कमलज-विधातृ-हरि-यम-शशाङ्क-षड्वक्त्र-शक्र-वसु-भुजगाः।

९८.०१ धर्म-ईश-सवितृ-मन्मथ-कलयो विश्वे च तिथिपतयः॥

९८.०२ पितरो -अमावस्यायां संज्ञासदृशाश्च तैः क्रियाः कार्याः।

९८.०२ नन्दा भद्रा विजया रिक्ता पूर्णा च तास् त्रिविधाः॥

९८.०३ यत् कार्यं नक्षत्रे तद्दैवत्यासु तिथिषु तत् कार्यम्।

९८.०३ करणमुहूर्तेष्व् अपि तत् सिद्धिकरं देवतासदृशम्॥

९९ करणगुणाध्यायः

९९.०१ वव-वालव-कौलव[K.बवबालवकौलब]-तैतिल-आख्य-गर-वणिज-विष्टिसंज्ञानाम्।

९९.०१ पतयः स्युर् इन्द्र-कमलज-मित्र-अर्यम-भू-श्रियः सयमाः॥

९९.०२ कृष्ण-चतुर्दश्यर्धाद् धुवाणि[K.ऊ.धुवाणि] शकुनिश् चतुष्पदं नागम्।

९९.०२ किंस्तुघ्नम् इति च तेषां कलि-वृष-फणि-मारुताः पतयः॥

९९.०३अ कुर्याद् ववे[K.बवे] शुभ-चर-स्थिर-पौष्टिकानि

९९.०३ब् धर्मक्रिया-द्विज-हितानि च वालव[K.बालव]-आख्ये।

९९.०३च् सम्प्रीति-मित्र-वरणानि च कौलवे[K.कौलबे] स्युः

९९.०३द् सौभाग्य-संश्रय-गृहाणि च तैतिल-आख्ये॥

९९.०४अ कृषि-बीज-गृह-आश्रय-जानि गरे

९९.०४ब् वणिजि धुव[K.धुव]-कार्य-वणिग्-युतयः।

९९.०४च् न हि विष्टिकृतं विदधाति शुभं

९९.०४द् पर-घात-विष-आदिषु सिद्धिकरम्॥

९९.०५अ कार्यं पौष्टिकम् औषधादि शकुनौ मूलानि मन्त्रास् तथा

९९.०५ब् गोकार्याणि चतुष्पदे द्विजपितृन् उद्दिश्य राज्यानि च।

९९.०५च् नागे स्थावर-दारुणानि हरणं दौर्भाग्य-कर्माण्य् अतः

९९.०५द् किंस्तुघ्ने शुभम् इष्टि[K.इष्ट]पुष्टिकरणं मङ्गल्य-सिद्धि-क्रियाः॥

९९.०६अब्[K.ओमित्तेद्]। लाभे तृतीये च शुभैः समेते पापैर् विहीने शुभराशिलग्ने।

९९.०६च्द्[K.ओमित्तेद्]। वेध्यौ च कर्णाव् अमरेज्यलग्ने पुष्य-इन्दु-चित्रा-हरि-पौष्ण-भेषु॥

९९.०७अ रोहिण्य्-उत्तर-रेवती-मृगशिरो-मूल-अनुराधा-मघा-

९९.०७ब् हस्त-स्वातिषु षष्ठ-तौलि-मिथुनेषु-उद्यत्सु पाणि-ग्रहः।

९९.०७च् सप्त-अष्ट-अन्त्य-बहिःशुभैर् उडुपताव् एकादश-द्वि-त्रिगे

९९.०७द् क्रूरैस् त्र्यायषडष्टगैर् न तु भृगौ षष्ठे कुजे च-अष्टमे॥

९९.०८अ दम्पत्योर् द्वि-नव-अष्ट-राशि-रहिते चार-अनुकुले रवौ

९९.०८ब् चन्द्रे च-अर्क-कुज-अर्कि-शुक्र-वियुते मध्ये -अथ वा पापयोः।

९९.०८च् त्यक्त्वा च व्यतिपात-वैधृति[K.वैधृत]-दिनं विष्टिं च रिक्तां तिथिं

९९.०८द् क्रूराहायन-पौष-चैत्र[K.चैत्रपौष]-विरहे लग्न-अंशके मानुषे॥

१०० नक्षत्रजातकाध्यायः

१००.०१ प्रियभूषणः स्वरूपः[K.सुरूपः] सुभगो दक्षो -अश्विनीषु मतिमांश् च।

१००.०१ कृतनिश्चय-सत्य-अरुग्-दक्षः सुखितश् च भरणीषु॥

१००.०२ बहुभुक् परदाररतस् तेजस्वी कृत्तिकासु विख्यातः।

१००.०२ रोहिण्यां सत्य-शुचिः प्रियंवदः *स्थिरः स्वरूपश् च[K.स्थिरसुरूपश् च]॥

१००.०३ चपलश् चतुरो भीरुः पटुर् उत्साही धनी मृगे भोगी।

१००.०३ शठ-गर्वित-चण्ड-कृतघ्न-हिंस्र-पापश् च रौद्र-ऋक्षे॥

१००.०४ दान्तः सुखी सुशीलो दुर्मेधा रोगभाक् पिपासुश् च।

१००.०४ अल्पेन च सन्तुष्टः पुनर्वसौ जायते मनुजः॥

१००.०५ शान्तात्मा सुभगः पण्डितो धनी धर्म-संश्रितः पुष्ये।

१००.०५ शठ-सर्व-भक्षक्ष्य[K.भक्ष][U - भक्ष्य]-पापः कृतघ्न-धूर्तश् च भौजङ्गे॥

१००.०६ बहुभृत्य-धनी भोगी सुर-पितृ-भक्तो महोद्यमः पित्र्ये।

१००.०६ प्रियवाग् दाता द्युतिमान् अटनो नृप-सेवको भाग्ये॥

१००.०७ सुभगो विद्या-आप्तधनो भोगी सुखभाग् द्वितीयफल्गुन्याम्।

१००.०७ उत्साही धृष्टः पानपो -अघृणी तस्करो हस्ते॥

१००.०८ चित्रा-अम्बर-माल्य-धरः सुलोचनाङ्गश् च चित्रायाम्[K.भवति चित्रायाम्]।

१००.०८ दान्तो वणिक् तृषालुः[K.कृपालुः] प्रियवाग् धर्माश्रितः स्वातौ॥

१००.०९ ईर्षुर्[K.इर्ष्युर्] लुब्धो द्युतिमान् वचनपटुः कलहकृद् विशाखासु॥

१००.०९ आढ्यो विदेशवासी क्षुधालुर् अटनो -अनुराधासु॥

१००.१० ज्येष्ठासु न बहुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः।

१००.१० मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी॥

१००.११ इष्टा-नन्द-कलत्रो वीरो दृढ-सौहृदश् च जलदेवे।

१००.११ वैश्वे विनीत-धार्मिक-बहु-मित्र-कृतज्ञ-सुभगश् च॥

१००.१२ श्रीमान् श्रवणे शृतवान् उदार-दारो धन-अन्वितः ख्यातः।

१००.१२ दाता-आढ्य-शूर-गीतप्रियो धनिष्ठासु धन-लुब्धः॥

१००.१३ स्फुटवाग् व्यसनी रिपुहा साहसिकः शतभिषक्सु दुर्ग्राह्यः।

१००.१३ भद्रपदासु-उद्विग्नः स्त्रीजित-धन-पटुर् अदाता च॥

१००.१४ वक्ता सुखी प्रजावान् जितशत्रुर् धार्मिको द्वितीयासु॥

१००.१४ सम्पूर्ण-अङ्गः सुभगः शूरः शुचिर् अर्थवान् पौष्णे॥

१०१ राशिविभागाध्यायः

१०१.०१ अश्विन्यो -अथ भरण्यो बहुलापादश् च कीर्त्यते मेषः।

१०१.०१ वृषभो बहुलाशेषं रोहिण्यो -अर्धम् च मृगशिरसः॥

१०१.०२ मृगशिरो -अर्धं रौद्रं पुनर्वसोर्[K.पुनर्वसोर् च] अंशकत्रयं मिथुनः[K.मिथुनम्]।

१०१.०२ पादश् च *पुनर्वसुतस् तिष्यः श्लेषा[K.पुनर्वसोः सतिष्यो -अश्लेषा] च कर्कटकः॥

१०१.०३ सिंहो -अथ मघा पूर्वा च फल्गुनी पाद उत्तरायाश् च।

१०१.०३ तत्परिशेषं हस्तश् चित्राद्यर्धं च कन्याख्यः॥

१०१.०४ तौलिनि चित्रान्त्यार्धं स्वातिः पादत्रयं विशाखायाः।

१०१.०४ अलिनि विशाखापादस् तथानुराधान्विता ज्येष्ठा॥

१०१.०५ मूलम् अषाढा पूर्वा प्रथमश् च-अप्य् उत्तरांशको धन्वी।

१०१.०५ मकरस् तत्परिषेशं श्रवणः पूर्वं धनिष्ठार्धम्॥

१०१.०६ कुम्भो -अन्त्यधनिष्ठार्धं शतभिषगंशत्रयं च पूर्वायाः।

१०१.०६ भद्रपदायाः शेषं तथोत्तरा रेवती च झषः॥

१०१.०७ अश्विनी-पित्र्य-मूल-आद्या मेष-सिंह-हय-आदयः।

१०१.०७ विषम-ऋक्षान् निवर्तन्ते पाद-वृद्ध्या यथोत्तरम्॥

१०२ विवाहपटलाध्यायः

१०२.०१अ मूर्तौ करोति दिनकृद् विधवां कुजश् च

१०२.०१ब् राहुर् विपन्न-तनयां रविजो दरिद्राम्।

१०२.०१च् शुक्रः शशाङ्क-तनयश् च गुरुश् च साध्वीम्

१०२.०१द् आयुःक्षयं प्रकुरुते -अथ विभावरीशः॥

१०२.०२अ कुर्वन्ति भास्कर-शनैश्चर-राहु-भौमा

१०२.०२ब् दारिद्र्य-दुःखम् अतुलं नियतं द्वितीये।

१०२.०२च् वित्तेश्वरीम् अविधवां गुरु-शुक्र-सौम्या

१०२.०२द् नारीं प्रभूत-तनयां कुरुते शशाङ्कः॥

१०२.०३अ सूर्य-इन्दु-भौम-गुरु-शुक्र-बुधास् तृतीये

१०२.०३ब् कुर्युः सदा बहुसुतां धनभागिनीं च।

१०२.०३च् व्यक्तां[K.व्यक्तं] दिवाकरसुतः सुभगां करोति

१०२.०३द् मृत्युं ददाति नियमात् खलु सैंहिकेयः॥

१०२.०४अ स्वल्पं पयः स्रवति सूर्यसुते चतुर्थे

१०२.०४ब् दौर्भाग्यम् उष्ण-किरणः कुरुते शशी च।

१०२.०४च् राहुः सपत्नम्[K.सपत्न्यम् ऊ.सपत्नम्] अपि च क्षितिजो -अल्पवित्तं[K.अल्पवित्तां]

१०२.०४द् दद्याद् भृगुः सुरगुरुश् च बुधश् च सौख्यम्॥

१०२.०५अ नष्टात्मजां रविकुजौ खलु पञ्चमस्थे[K.पञ्चमस्थौ]

१०२.०५ब् चन्द्रात्मजो बहुसुता गुरुभार्गवौ च।

१०२.०५च् राहुर् ददाति मरणं शनिर् उग्ररोगं

१०२.०५द् कन्या-*विनाशम्[K.प्रसूतिम्] अचिरात् कुरुते शशाङ्कः॥

१०२.०६अ षष्ठ-आश्रिताः शनि-दिवाकर-राहु-जीवाः

१०२.०६ब् कुर्युः कुजश् च सुभगां श्वशुरेषु भक्ताम्।

१०२.०६च् चन्द्रः करोति विधवाम् उशना दरिद्राम्

१०२.०६द् ऋक्षद्रां शशाङ्क-तनयः कलहप्रियां च॥

१०२.०७अ सौर-आर-जीव-बुध-राहु-रवि-इन्दु-शुक्राः

१०२.०७ब् कुर्युः प्रसह्य खलु सप्तमराशि-संस्थाः।

१०२.०७च् वैधव्य-बन्धन-वध-क्षयम् अर्थनाश-

१०२.०७द् व्याधि-प्रवास-मरणानि यथाक्रमेण॥

१०२.०८अ स्थाने -अष्टमे गुरुबुधौ नियतं वियोगं

१०२.०८ब् मृत्युं शशी भृगुसुतश् च तथ-एव राहुः।

१०२.०८च् सूर्यः करोत्य् अविधवां सरुजां[K.सरुजं] महीजः

१०२.०८द् सूर्यात्मजो धनवतीं पतिवल्लभां च॥

१०२.०९अ धर्मे स्थिता भृगु-दिवाकर-भूमिपुत्रा

१०२.०९ब् जीवश् च धर्मनिरतां शशिजस् त्व् अरोगाम्।

१०२.०९च् राहुश् च सूर्यतनयश् च करोति बन्ध्यां[K.वन्ध्यां]

१०२.०९द् कन्याप्रसूतिम् अटनां[K.अटनं] कुरुते शशाङ्कः॥

१०२.१०अ राहुर् नभःस्थल-गतो[K.नभस्थलगतो] विधवां करोति

१०२.१०ब् पापे रतां दिनकरश् च शनैश्चरश् च।

१०२.१०च् मृत्युं कुजो -अर्थरहितां कुलटां च चन्द्रः

१०२.१०द् शेषा ग्रहा धनवतीं सुभगां च कुर्युः॥

१०२.११अ आये रविर् बहुसुतां सधनां[K.धनिनीं] शशाङ्कः

१०२.११ब् पुत्र-अन्वितां क्षितिसुतो रविजो धनाढ्याम्।

१०२.११च् आयुष्मतीं सुरगुरुः शशिजः समृद्धां

१०२.११द् राहुः करोत्य् अविधवां भृगुर् अर्थयुक्ताम्॥

१०२.१२अ अन्ते गुरुर् धनवतीं दिनकृद् दरिद्रां

१०२.१२ब् चन्द्रो धन-व्यय-करीं कुलटां च राहुः।

१०२.१२च् साध्वीं भृगुः शशिसुतो बहु-पुत्र-पौत्रां

१०२.१२द् पान-प्रसक्त-हृदयाम् रविजः कुजश् च॥

१०२.१३अ गोपैर् यष्ट्य्-आहतानां खुर-पुट-दलिता या तु धूलिर् दिनान्ते

१०२.१३ब् सोद्वाहे सुन्दरीणां विपुल-धन-सुत-आरोग्य-सौभाग्य-कर्त्री।

१०२.१३च् तस्मिन् काले न च-ऋक्षं न च तिथि-करणं नैव लग्नं न योगः

१०२.१३द् ख्यातः पुंसां सुखार्थं शमयति दुरितान्य् उत्थितं गोरजस् तु॥

१०३ ग्रहगोचराध्यायः

१०३.०१ प्रायेण सूत्रेण विनाकृतानि प्रकाश-रन्ध्राणि चिरन्तनानि।

१०३.०१ रत्नानि शास्त्राणि च योजितानि नवैर् गुणैर् भूषयितुं क्षमाणि॥

१०३.०२ प्रायेण गोचरो व्यवहार्यो -अतस् तत्फलानि वक्ष्यामि।

१०३.०२ नानावृत्तैर् आर्या[K.तन्नो] मुखचपलत्वं *क्षमध्वं नः [K.क्षमन्त्व् आर्याः]॥

१०३.०३ माण्डव्य-गिरं शुत्वा न मदीया रोचते -अथ वा नैवम्।

१०३.०३ साध्वी तथा न पुंसां प्रिया यथा स्याज् जघनचपला॥

१०३.०४अ सूर्यः षट्-त्रि-दश-स्थितस् त्रि-दश-षट्-सप्ताद्यगश् चन्द्रमा

१०३.०४ब् जीवः सप्त-नव-द्वि-पञ्चम-गतो वक्र-अर्कजौ षट्त्रिगौ।

१०३.०४च् सौम्यः षड्-द्वि-चतुर्-दश-अष्टम-गतः सूर्ये[K.ऊ.सर्वे] -अप्य् उपान्ते शुभाः

१०३.०४द् शुक्रः सप्तम-षड्-दश-ऋक्ष-सहितः शार्दूलवत् त्रासकृत्॥

१०३.०५अ जन्मन्य् आयासदो -अर्कः क्षपयति विभवान् कोष्ठरोग-अध्व-दाता

१०३.०५ब् वित्त-भ्रंशं द्वितीये दिशति च न सुखं वञ्चनां दृग्रुजं च।

१०३.०५च् स्थानप्राप्तिं तृतीये *धन-निचय-मुदा कल्य-कृच्[K.धननिचयमुदाकल्यकृच्] च-अरि-हर्ता[K.हन्ता]

१०३.०५द् रोगान् दत्ते[K.धत्ते] चतुर्थे जनयति च मुहुः स्रग्धरा-भोग-विघ्नम्॥

१०३.०६अ पीडाः स्युः पञ्चमस्थे सवितरि बहुशो रोग-अरि-जनिताः

१०३.०६ब् षष्ठे -अर्को हन्ति रोगान् क्षपयति च रिपून् शोकांश् च नुदति।

१०३.०६च् अध्वानं सप्तमस्थो जठर-गद-भयं दैन्यं च कुरुते।

१०३.०६द् रुक्-त्रासौ[K.रुक्त्रासौ] च-अष्टमस्थे भवति सुवदना न स्वापि वनिता॥

१०३.०७अ रवाव् आपद्दैन्यं रुग् इति नवमे वित्त[K.चित्त]चेष्टाविरोधो

१०३.०७ब् जयं प्राप्नोत्य् उग्रं दशम-गृहगे कर्म-सिद्धिं क्रमेण।

१०३.०७च् जय-स्थानं[K.जयं स्थानं] मानं विभवम् अपि च-एकादशे रोगनाशं

१०३.०७द् सुवृत्तानां चेष्टा भवति सफला द्वादशे न-इतरेषाम्॥

१०३.०८अ शशी जन्मन्य् अन्न-प्रवर-शयन-आच्छादन-करो

१०३.०८ब् द्वितीये मानार्थान्[K.मानार्थौ] ग्लपयति सविघ्नश् च भवति।

१०३.०८च् तृतीये वस्त्र-स्त्री-धन-विजय[K.निचय]सौख्यानि लभते

१०३.०८द् चतुर्थे -अविश्वासः शिखरिणि भुजङ्गेन सदृशः॥

१०३.०९अ दैन्यं व्याधिं शुचम् अपि शशी पञ्चमे मार्गविघ्नं

१०३.०९ब् षष्ठे वित्तं जनयति सुखं शत्रुरोगक्षयं च।

१०३.०९च् यानं मानं शयनम् अशनं सप्तमे वित्तलाभं

१०३.०९द् मन्दाक्रान्ते फणिनि हिमगौ च अष्टमे भीर् न कस्य॥

१०३.१०अ नवम-गृहगो बन्ध-उद्वेग-श्रम-उदररोगकृद्

१०३.१०ब् दशम-भवने च आज्ञा-कर्म-प्रसिद्धि-करः *शशी[K.ओमित्तेद्]।

१०३.१०च् उपचय-सुहृत्संयोग-अर्थप्रमोदम् उपान्त्यगो

१०३.१०द् वृषभ-चरितान् दोषान् अन्त्ये[K.अन्ते] करोति च[K.हि] सव्ययान्॥

१०३.११ कुजे -अभिघातः प्रथमे द्वितीये नरेन्द्रपीडा कलहारिदोषैः।

१०३.११ भृशं च पित्त-अनल-*चौर-रोगैर्[K.रोगचौरैर्] उपेन्द्रवज्र-प्रतिमो -अपि यः स्यात्॥

१०३.१२अ तृतीयगश् चौर-कुमारकेभ्यो

१०३.१२ब् भौमः सकाशात् फलम् आदधाति।

१०३.१२च् प्रदीप्तिम् आज्ञां धनम् और्णिकानि

१०३.१२द् धात्व्-आकर-आख्यानि किल अपराणि॥

१०३.१३ भवति धरणिजे चतुर्थगे ज्वर-जठर-गद-असृग्-उद्भवः।

१०३.१३ कुपुरुष-जनिताच् च सङ्गमात् प्रसभम् अपि करोति च अशुभम्॥

१०३.१४अ रिपु-गद-कोप-भयानि पञ्चमे

१०३.१४ब् तनयकृताश् च शुचो महीसुते।

१०३.१४च् द्युतिर् अपि न अस्य चिरं भवेत् स्थिरा

१०३.१४द् शिरसि कपेर् इव मालती यथा[K.कृता]॥

१०३.१५ रिपु-भय-कलहैर् विवर्जितः सकनक-विद्रुम-ताम्र-*कामगः[K.कागमः ऊ.चागम]।

१०३.१५ रिपुभवन-गते महीसुते किम् अपरवक्त्र-विकारम् ईक्षते॥

१०३.१६अ कलत्र-कलह-अक्षि-रुग्-जठररोग-कृत् सप्तमे

१०३.१६ब् क्षरत्-क्षतज-रूक्षितः क्षपित[K.क्षयित]-वित्त-मानो -अष्टमे।

१०३.१६च् कुजे नवम-संस्थिते परिभव-अर्थनाश-आदिभिर्

१०३.१६द् विलम्बितगतिर् भवत्य् अबल-देह-धातु-क्लमैः॥

१०३.१७ दशम-गृहगते समं महीजे विविध-धन-आप्तिर् उपान्त्यगे जयश् च।

१०३.१७ जनपदम् उपरि स्थितश् च भुङ्क्ते वनम् इव षट्चरणः सुपुष्पित-अग्रम्॥

१०३.१८अ नानाव्ययैर् द्वादशगे महीसुते

१०३.१८ब् सन्ताप्यते -अनर्थ-शतैश् च मानवः।

१०३.१८च् स्त्री-कोप-पित्तैश् च सनेत्र-वेदनैर्

१०३.१८द् यो -अपि इन्द्रवंश-अभिजनेन गर्वितः॥

१०३.१९ दुष्ट-वाक्य-पिशुन-अहित-भेदैर् बन्धनैः सकलहैश् च हृतस्वः।

१०३.१९ जन्मगे शशिसुते पथि गच्छन् स्वागते -अपि कुशलं न शृणोति॥

१०३.२० परिभवो धनगते धनलब्धिः सहजगे शशिसुते हृदय-आप्तिः[K.ऊ.सुहृदाप्तिः]।

१०३.२० नृपति-शतु-भय-शङ्कित-*चितो[K.चित्तो] द्रुतपदं व्रजति दुश्चरितैः स्वैः॥

१०३.२१अ चतुर्थगे स्वजन-कुटुम्ब-वृद्धयो

१०३.२१ब् धन-आगमो भवति च शीतरश्मिजे।

१०३.२१च् सुत-स्थिते तनय-कलत्र-विग्रहो

१०३.२१द् निषेवते न च रुचिराम् अपि स्त्रियम्॥

१०३.२२अ सौभाग्यं विजयम् अथ उन्नतिं च षष्ठे

१०३.२२ब् वैवर्ण्यं कलहम् अतीव सप्तमे ज्ञः।

१०३.२२च् मृत्युस्थे जय-सुत[K.सुतजय]-वस्त्र-वित्त-लाभा

१०३.२२द् नैपुण्यं भवति मति-प्रहर्षणीयम्॥

१०३.२३ विघ्नकरो नवमः शशिपुत्रः कर्मगतो रिपुहा धनदश् च।

१०३.२३ सप्रमदं शयनं च विधत्ते तद्गृहदो -अथ *कथां स्तरणं च[K.कथास्तरणं]॥

१०३.२४अ धन-*सुत-सुख[K.सुखसुत]-योषिन्-मित्र-*वाह[K.वाह्य]-आप्ति-तुष्टिस्

१०३.२४ब् तुहिनकिरण-पुत्रे लाभगे मृष्ट-वाक्यः।

१०३.२४च् रिपु-परिभव-रोगैः पीडितो द्वादशस्थे

१०३.२४द् न सहति परिभोक्तुं मालिनी-योग-सौख्यम्॥

१०३.२५अ जीवे जन्मन्य् अपगत-धन-धीः

१०३.२५ब् स्थान-भ्रष्टो बहु-कलह-युतः।

१०३.२५च् प्राप्य अर्थे -अर्थान् व्यरिर् अपि कुरुते

१०३.२५द् कान्ता-आस्य-अब्जे भ्रमरविलसितम्॥

१०३.२६अ स्थान-भ्रंशात् कार्य-विघाताच् च तृतीये

१०३.२६ब् -अनेकैः[K.नैकैः] क्लेशैर् बन्धुजन-उत्थैश् च चतुर्थे।

१०३.२६च् जीवे शान्तिं पीडितचित्तश् च स विन्देद्[K.विन्देन्]

१०३.२६द् नैव ग्रामे नापि वने मत्त-मयूरे॥

१०३.२७अ जनयति च तनयभवनम् उपगतः

१०३.२७ब् परिजन-शुभ-सुत-करि-तुरग-वृषान्।

१०३.२७च् सकनक-पुर-गृह-युवति-वसन-कृन्

१०३.२७द् मणिगुणनिकर-कृद् अपि विबुध-गुरुः॥

१०३.२८अ न सखी-वदनं तिलकोज्ज्वलं

१०३.२८ब् न *च वनं[K.भवनं] शिखि-कोकिल-नादितम्।

१०३.२८च् हरिण-प्लुत-शाव-विचित्रितं

१०३.२८द् रिपुगते मनसः सुखदं गुरौ॥

१०३.२९अ त्रिदशगुरुः शयनं रतिभोगं

१०३.२९ब् धनम् अशनं कुसुमान्य् उपवाह्यम्।

१०३.२९च् जनयति सप्तमराशिम् उपेतो

१०३.२९द् ललितपदां च गिरं धिषणां च॥

१०३.३०अ बन्धं व्याधिम् च-अष्टमे शोकम् उग्रं

१०३.३०ब् मार्ग-*क्लेशान्[K.क्लेशं] मृत्यु-तुल्यांश् च रोगान्।

१०३.३०च् नैपुण्या-आज्ञा-पुत्र-कर्म-अर्थ-सिद्धिं

१०३.३०द् धर्मे जीवः शालिनीनां च लाभम्॥

१०३.३१अ स्थान-कल्य-धन-हा दश-ऋक्षगस्

१०३.३१ब् तत्प्रदो भवति लाभगो गुरुः।

१०३.३१च् द्वादशे -अध्वनि विलोम-दुःख-भाग्

१०३.३१द् याति यद्य् अपि नरो रथोद्धतः॥

१०३.३२अ प्रथमगृह-उपगो भृगुसुतः स्मर-उपकरणैः

१०३.३२ब् सुरभि-मनोज्ञ-गन्ध-कुसुम-अम्बरैर् उपचयम्।

१०३.३२च् शयन-गृह-आसन-अशन-युतस्य च अनुकुरुते

१०३.३२द् समद-विलासिनी-मुख-सरोज-षट्चरणताम्॥

१०३.३३अ शुक्रे द्वितीयगृहगे प्रसव-अर्थ-धान्य-

१०३.३३ब् भूपाल-*सन्नत[K.सन्नति]-कुटुम्ब-हितान्य् अवाप्य।

१०३.३३च् संसेवते कुसुम-रत्न-विभूषितश् च

१०३.३३द् कामं वसन्ततिलक-द्युति-मूर्धजो -अपि॥

१०३.३४ आज्ञा-अर्थ-मान-आस्पद-भूति-वस्त्र-शतु-क्षयान् दैत्यगुरुस् तृतीये।

१०३.३४ दत्ते[K.धत्ते] चतुर्थश् च सुहृत्-समाजं रुद्र-इन्द्र-वज्र-प्रतिमां च शक्तिम्॥

१०३.३५ जनयति शुक्रः पञ्चमसंस्थो गुरु-परितोषं बन्धुजन-आप्तिम्।

१०३.३५ सुत-धन-लब्धिं मित्र-सहायान् अनवसितत्वं च अरि-बलेषु॥

१०३.३६अ षष्ठो भृगुः परिभव-रोग-तापदः

१०३.३६ब् स्त्रीहेतुकं जनयति सप्तमो -अशुभम्।

१०३.३६च् यातो -अष्टमं भवन-परिच्छद-प्रदो

१०३.३६द् लक्ष्मीवतीम् उपनयति स्त्रियं च सः॥

१०३.३७अ नवमे तु धर्म-वनिता-सुख-भाग्

१०३.३७ब् भृगुजे -अर्थ-वस्त्र-निचयश् च भवेत्।

१०३.३७च् दशमे -अवमान-कलहान् नियमात्

१०३.३७द् प्रमिताक्षराण्य् अपि वदन् लभते॥

१०३.३८ उपान्त्यगो भृगो सुतः सुहृद्-धन-अन्न-गन्ध-दः।

१०३.३८ धन-अम्बर-आगमो -अन्त्यगः स्थिरस् तु न-अम्बर-आगमः॥

१०३.३९ प्रथमे रविजे विष-वह्नि-हतः स्वजनैर् वियुतः कृत-बन्धु-वधः।

१०३.३९ परदेशम् उपैत्य् असुहृद्-भवनो विमुख-अर्थ-सुतो -अटक-दीन-मुखः॥

१०३.४०अ चारवशाद् द्वितीयगृहगे दिनकर-तनये

१०३.४०ब् रूप-सुख-अपवर्जित-तनुर् विगत-मद-बलः।

१०३.४०च् अन्यगुणैः कृतं वसुचयम् तद् अपि खलु भवत्य्

१०३.४०द् अम्ब्व् इव वंशपत्रपतितं न बहु न च चिरम्॥

१०३.४१अ सूर्यसुते तृतीयगृहगे धनानि लभते

१०३.४१ब् दास-परिच्छद-उष्ट्र-महिषा-अश्व-कुञ्जर-खरान्।

१०३.४१च् सद्म-विभूति-सौख्यम् अमितं गद-व्युपरमं

१०३.४१द् भीरुर् अपि प्रशास्त्य् अधिरिपूंश् च वीर-ललितैः॥

१०३.४२अ चतुर्थं गृहं सूर्यपुत्रे -अभ्युपेते

१०३.४२ब् सुहृद्-वित्त-भार्य-आदिभिर् विप्रयुक्तः।

१०३.४२च् भवत्य् अस्य सर्वत्र च-असाधु दुष्टं

१०३.४२द् भुजङ्ग-प्रयात-अनुकारं च चित्तम्॥

१०३.४३अ सुत-धन-परिहीणः पञ्चमस्थे

१०३.४३ब् प्रचुर-कलह-युक्तश् च अर्कपुत्रे।

१०३.४३च् विनिहत-रिपु-रोगः षष्ठयाते

१०३.४३द् पिबति च वनिता-आस्यं श्री-पुटोष्ठम्॥

१०३.४४अ गच्छत्य् अध्वानं सप्तमे च अष्टमे च

१०३.४४ब् हीनः स्त्री-पुत्रैः सूर्यजे दीनचेष्टः।

१०३.४४च् तद्वद् धर्मस्थे वैर-हृद्-रोग-बन्धैर्

१०३.४४द् धर्मो -अप्य् उच्छिद्येद् वैश्वदेवी-क्रिया-आद्यः॥

१०३.४५अ कर्म-प्राप्तिर् दशमे -अर्थक्षयश् च

१०३.४५ब् विद्या-कीर्त्योः परिहानिश् च सौरे।

१०३.४५च् तैक्ष्ण्यं लाभे परयोषार्थ-*लाभश्[K.लाभा]

१०३.४५द् च अन्त्ये[K.अन्ते] प्राप्नोत्य् अपि शोक-ऊर्मिमालाम्॥

१०३.४६ अपि कालम् अपेक्ष्य च पात्रं शुभकृद् विदधात्य् अनुरूपम्।
१०३.४६ न मधौ बहु कं कुडवे वा[K.च] विसृजत्य् अपि मेघवितानः॥

१०३.४७अ रक्तैः पुष्पैर् गन्धैस् ताम्रैः कनक-वृष-बकुल-कुसुमैर् दिवाकर-भूसुतौ

१०३.४७ब् भक्त्या पूज्याव् इन्दुर् धेन्वा सितकुसुम-रजत-मधुरैः सितश् च मदप्रदैः।

१०३.४७च् कृष्णद्रव्यैः सौरिः सौम्यो मणि-रजत-तिलक-कुसुमैर् गुरुः परिपीतकैः

१०३.४७द् प्रीतैः पीडा न स्याद् उच्चाद् यदि पतति विशति यदि वा भुजङ्गविजृम्भितम्॥

१०३.४८ शमय-उद्गताम् अशुभदृष्टिम् अपि विबुधविप्रपूजया।

१०३.४८ शान्ति-जप-नियम-दान-दमैः सुजन-अभिभाषण-समागमैस् तथा॥

१०३.४९ रवि-भौमौ पूर्वार्धे शशिसौरौ कथयतो -अन्त्यगौ राशेः।

१०३.४९ सदसल्-लक्षणम् आर्यगीत्य्-उपगीत्योर् यथासंख्यम्॥

१०३.५० आदौ यादृक् सौम्यः पश्चाद् अपि तादृशो भवति।

१०३.५० उपगीतेर् मात्राणां गणवत् सत्सम्प्रयोगो वा॥

१०३.५१ आर्याणाम् अपि कुरुते विनाशम् अन्तर्गुरुर् विषमसंस्थः।

१०३.५१ गण इव षष्ठे दृष्टः स[K.च] सर्वलघुतां जनं[K.गतो] नयति॥

१०३.५२अ अशुभ-निरीक्षितः शुभ-फलो बलिना बलवान्

१०३.५२ब् अशुभ-फल-प्रदश् च शुभ-दृग्-विषय-उपगतः।

१०३.५२च् अशुभशुभाव् अपि स्वफलयोर् व्रजतः समताम्

१०३.५२द् इदम् अपि गीतकं च खलु नर्कुटकं च यथा॥

१०३.५३ नीचे -अरिभे -अस्ते *च अरिदृष्टस्य[Kऽस् त्र्. अरिदृष्टस्य] सर्व वृथा यत्[Kऽस् त्र्. यथा] परिकीर्तितम्।

१०३.५३ पुरतो -अन्धस्य इव कामिन्याः सविलास-कटाक्ष-निरीक्षणम्॥

१०३.५४ सूर्यसुतो -अर्कफलसमश् चन्द्रसुतश् छन्दतः समनुयाति यथा।

१०३.५४ स्कन्धकम् आर्यागीतिर् वैतालीयं च मागधी गाथा-आर्याम्॥

१०३.५५ सौरो -अर्करश्मि-*योगात्[K.रागात्] सविकारो लब्ध-वृद्धिर् अधिकतरम्।

१०३.५५ पित्तवद् आचरति नृणां पथ्यकृतां न तु तथा-आर्याणाम्॥

१०३.५६ यादृशेन ग्रहेण-इन्दुर् युक्तस् तादृग् भवेत् सो -अपि।

१०३.५६ मनो-वृत्ति-समायोगाद् विकार इव वक्त्रस्य॥

१०३.५७ पञ्चमं *लघु सर्वेषु[K.सर्वपादेषु] सप्तमं द्वि-चतुर्थयोः।

१०३.५७ यद्वत्-श्लोक-अक्षरं तद्वल् लघुतां याति दुःस्थितैः॥

१०३.५८ प्रकृत्या-अपि लघुर् यश् च वृत्तबाह्ये व्यवस्थितः।

१०३.५८ स याति गुरुतां लोके यदा स्युः सुस्थिता ग्रहाः॥

१०३.५९ प्रारब्धम् असुस्थितैर् ग्रहैर् यत् कर्म-आत्म-विवृद्धये बुधैः[K.-अबुधैः]।

१०३.५९ विनिहन्ति तद् एव कर्म तान् वैतालीयम् इव अयथाकृतम्॥

१०३.६० सौस्थित्यम् अवेक्ष्य यो ग्रहेभ्यः काले प्रक्रमणं करोति राजा।

१०३.६० अणुना अपि स पौरुषेण वृत्तस्य-औपच्छन्दसिकस्य याति पारम्॥

१०३.६१अ उपचय-भवन-उपयातस्य भानोर् दिने कारयेद् धेम-ताम्र-अश्व-काष्ठ-अस्थि-चर्म-और्णिक-अद्रि-द्रुम-त्वग्-नख-व्याल-चौर-आयुधीय-अटवी-क्रूर-राजोपसेव-अभिषेक-औषध-क्षौम-पण्यादि-गोपाल-कान्तार-वैद्य-अश्म-कूट-अवदात-अभिविख्यात-शूर-आहवश्लाघ्य-*याय्य्[K.याज्य]-*अग्निकर्माणि[K.-अग्निकार्याणि] सिद्ध्यन्ति लग्नस्थिते वा रवौ।

१०३.६१ब् शिशिरकिरण-वासरे तस्य व अप्य् उद्गमे केन्द्रसंस्थे -अथ वा भूषणं शङ्ख-मुक्ता-अब्ज-रूप्य-अम्बु-यज्ञ-इक्षु-भोज्य-अङ्गना-क्षीर-सुस्निग्धवृक्ष-क्षुप-अनूप-धान्य-द्रवद्रव्य-*विप्र-अध्व-गीत[K.विप्राश्वशीत]क्रिया-शृङ्गि-कृष्यादि-सेनाधिप-आक्रन्द-भूपाल-सौभाग्य-नक्तञ्चर-श्लैष्मिक-द्रव्य-मातुल्य[K.मातुङ्ग]पुष्प-अम्बर-आरम्भ-सिद्धिर् भवेत्॥

१०३.६१च् क्षिततनय-दिने प्रसिद्ध्यन्ति[K.प्रसिध्यन्ति] धात्वाकरादीनि सर्वाणि कार्याणि चामीकर-अग्नि-प्रवाल-आयुध-क्रौर्य-चौर्य-अभिघात-अटवी-दुर्ग-सेनाधिकारास् तथा रक्त-पुष्प-द्रुमा रक्तम् अन्यच् च तिक्तं कटु-द्रव्य-कूट-अहि-पाश-अर्जित-स्वाः कुमारा भिषक्-शाक्यभिक्षु-क्षपावृत्ति-कोशेश[K.कौशेय]-शाठ्यानि सिद्ध्यन्ति[K.सिध्यन्ति] दम्भास् तथा॥

१०३.६१द् हरति[U - हरित, K.हरित]मणि-मही-सुगन्धीनि वस्त्राणि साधारणं नाटकं शास्त्र-विज्ञान-काव्यानि सर्वाः कला-युक्तयो मन्त्र-धातु-क्रिया-वाद-नैपुण्य-पुण्य-व्रतायोग-दूतास् तथा-आयुष्य-माया-अनृत-स्नान-ह्रस्वाणि दीर्घाणि मध्यानि च छन्दतश्[K.च्छन्दनश्] चण्डवृष्टि-प्रयात-अनुकारीणि कार्याणि सिद्ध्यन्ति[K.सिध्यन्ति] सौम्यस्य लग्ने -अह्नि वा॥

१०३.६२अ सुरगुरु-दिवसे कनकं रजतं तुरगाः करिणो वृषभा भिषग्-औषधयः[K.ओषधयः]

१०३.६२ब् द्विज-पितृ-सुर-कार्य-पुरःस्थित-घर्म-निवारण-चामर-भूषण-भूपतयः।

१०३.६२च् विबुध-भवन-धर्मसमाश्रय-मङ्गल-शास्त्र-मनोज्ञ-बलप्रद-सत्यगिरः

१०३.६२द् व्रत-हवन-धनानि च सिद्धिकराणि तथा रुचिराणि च वर्णक-दण्डकवत्॥

१०३.६३अ भृगुसुतदिवसे च चित्र-वस्त्र-वृष्य-वेश्य-कामिनी-विलास-हास-यौवनोपभोग-रम्य-भूमयः

१०३.६३ब् स्फटिक-रजत-मन्मथ-उपचार-वाहन-इक्षु-शारद-प्रकार-गो-वणिक्-कृषीवल-औषध-अम्बुजानि च।

१०३.६३च् सवितृसुतदिने च कारयेन् महिष्य्-अज-उष्ट्र-कृष्णलोह-दास-वृद्ध-नीच-कर्म-पक्षि-चौर-पाशिकान्

१०३.६३द् च्युतविनय-विशीर्णभाण्ड-हस्त्य्-अपेक्ष-विघ्नकारणानि च अन्यथा न साधयेत् समुद्रगो -अप्य् अपां कणम्॥

१०३.६४ विपुलाम् अपि बुद्ध्वा छन्दोविचितिं भवति कार्यम् एतावत्।

१०३.६४ शृति-सुखद-वृत्त-संग्रहम् इमम् आह वराहमिहिरो -अतः॥

१०४ रूपसत्राध्यायः

१०४.०१ पादौ मूलं जङ्घे च रोहिणी जानुनी[K.ओमित्तेद्] तथाश्विन्यः।

१०४.०१ ऊरू च आषाढद्वयम् अथ गुह्यं फल्गुनी-*द्वितयम्[K.युग्मम्]॥

१०४.०२ कटिर् अपि च कृत्तिका पार्श्वयोश् च यमला भवन्ति भद्रपदाः।

१०४.०२ कुक्षिस्था रेवत्यो विज्ञेयम् उरो -अनुराधा च॥

१०४.०३ पृष्ठं विद्धि धनिष्ठां[K.धनिष्ठा] भुजौ विशाखा[K.विशाखां] स्मृतौ करौ हस्तः॥

१०४.०३ अङ्गुल्यश् च पुनर्वसुर् आश्लेषासंज्ञिताश् च नखाः॥

१०४.०४ ग्रीवा ज्येष्ठा *श्रवणं श्रवणौ[K.श्रवणौ श्रवनः] पुष्यो मुखं द्विजाः स्वातिः।

१०४.०४ हसितं शतभिषग् अथ नासिका मघा मृगशिरो नेत्रे॥

१०४.०५ चित्रा ललाटसंस्था शिरो भरण्यः शिरोरुहाश् च-आर्द्रा।

१०४.०५ नक्षत्रपुरुषको -अयं कर्तव्यो रूपम् इच्छद्भिः॥

१०४.०६ चैत्रस्य बहुल-पक्षे ह्य् अष्टम्यां मूलसंयुते चन्द्रे।

१०४.०६ ह्य्[K.ओमित्तेद्] उपवासः कर्तव्यो विष्णुं सम्पूज्य धिष्ण्यं च॥

१०४.०७ दद्याद् व्रते समाप्ते घृतपूर्णं भाजनं सुवर्णयुतम्।

१०४.०७ विप्राय कालविदुषे सरत्नवस्त्रं स्वशक्त्या च॥

१०४.०८अ अन्नैः क्षीरघृत-उत्कटैः सह गुडैर् विप्रान् समभ्यर्चयेद्

१०४.०८ब् दद्यात् तेषु सुवर्ण[K.तथ-एव]वस्त्ररजतं लावण्यम् इच्छन् नरः।

१०४.०८च् पाद-ऋक्षात् प्रभृति क्रमाद् उपवसन्न् अङ्ग-ऋक्षनामस्व् अपि

१०४.०८द् कुर्यात् केशव-पूजनं स्वविधिना धिष्ण्यस्य पूजां तथा॥

१०४.०९ प्रलम्ब-बाहुः पृथु-पीन-वक्षाः क्षपाकर-आस्यः सित-चारु-दन्तः।

१०४.०९ गजेन्द्र-गामी कमल-आयत-अक्षः स्त्री-चित्त-हारी स्मर-तुल्य-मूर्तिः॥

१०४.१० शरद्-अमल-पूर्ण-चन्द्र-द्युति-सदृश-मुखी सरोज-दल-नेत्रा।

१०४.१० रुचिर-दशना सुकर्णा भ्रमर-उदर-सन्निभैः केशैः॥

१०४.११ पुंस्कोकिल-सम-वाणी ताम्रोष्ठी[K.ऊ.ताम्रोष्ठी] पद्म-पत्र-कर-चरणा।

१०४.११ स्तनभारा-नत-मध्या प्रदक्षिणावर्तया नाभ्या॥

१०४.१२ कदली-काण्ड-निभ-ऊरुः[K.ऊ.ऊरूः] सुश्रोणी वर-कुकुन्दरा सुभगा।

१०४.१२ सुश्लिष्ट-अङ्गुलि-पादा भवति प्रमदा *मनुष्यश् च[K.मनुष्यो वा]॥

१०४.१३अ यावन् नक्षत्रमाला विचरति गगने भूषयन्ती इह भासा

१०४.१३ब् तावन् नक्षत्रभूतो विचरति सह तैर् ब्रह्मणो -अह्नो -अवशेषम्।

१०४.१३च् कल्पादौ चक्रवर्ती भवति हि मतिमांस् तत्क्षयाच् च-अपि भूयः

१०४.१३द् संसारे जायमानो भवति नरपतिर् ब्राह्मणो वा धनाढ्यः॥

१०४.१४ मृगशीर्ष-आद्याः केशव-नारायण-माधवाः सगोविन्दाः।

१०४.१४ विष्णु-मधुसूदन-आख्यौ त्रिविक्रमो वामनश् च-एव॥

१०४.१५ श्रीधर-नामा तस्मात् सहृषीकेशश् च पद्मनाभश् च।

१०४.१५च्द् दामोदर इत्य् एते मासाः प्रोक्ता यथासंख्यं॥

१०४.१६ मास-नाम समुपोषितो नरो द्वादशीषु विधिवत् प्रकीर्तयन्।

१०४.१६ केशवम् समभिपूज्य तत्पदं याति यत्र नहि जन्मजं भयम्॥

१०५ उपसंहाराध्यायः

१०५.०१ ज्योतिःशास्त्र-समुद्रं प्रमथ्य मति-मन्दराद्रिणा -अथ मया।

१०५.०१ लोकस्य आलोककरः शास्त्र-शशाङ्कः समुत्क्षिप्तः॥

१०५.०२ पूर्वाचार्य-ग्रन्था न-उत्सृष्टाः कुर्वता मया शास्त्रम्।

१०५.०२ तान् अवलोक्य-इदं च प्रयतध्वं कामतः सुजनाः॥

१०५.०३ अथ वा कृशम्[K.भृशम्] अपि सुजनः प्रथयति दोषार्णवाद् गुणं दृष्ट्वा।

१०५.०३ नीचस् तद्-विपरीतः प्रकृतिर् इयं साध्व्-असाधूनाम्॥

१०५.०४ दुर्जन-हुताश-तप्तं काव्य-सुवर्णं विशुद्धिम् आयाति।

१०५.०४ श्रावयितव्यं तस्माद् दुष्टजनस्य प्रयत्नेन॥

१०५.०५अ ग्रन्थस्य यत् प्रचरतो -अस्य विनाशम् एति

१०५.०५ब् लेख्याद् बहुश्रुत-मुख-आधिगम-क्रमेण।

१०५.०५च् यद्वा मया कुकृतम् अल्पम् इह-आकृतं वा

१०५.०५द् कार्यं तद् अत्र विदुषा परिहृत्य रागम्॥

१०५.०६ दिनकर-मुनि-गुरु-चरण-प्रणिपातकृतप्रसादमतिना-इदम्।

१०५.०६ शास्त्रम् उपसङ्गृहीतं नमो -अस्तु पूर्वप्रणेतृभ्यः॥

१०६ शास्त्रानुक्रमणी

१०६.०१ शास्त्र-उपनयः पूर्वं सांवत्सरसूत्रम् अर्कचारश् च।

१०६.०१ शशि-राहु-भौम-बुध-गुरु-सित-मन्द-शिखि-ग्रहाणां च॥

१०६.०२ चारश् च-अगस्त्यमुनेः सप्तर्षीणां च कूर्म-योगश् च।

१०६.०२ नक्षत्राणां व्यूहो ग्रहभक्तिर् ग्रहविमर्दश् च॥

१०६.०३ ग्रह-शशि-योगः सम्यग्-ग्रह-वर्षफलं ग्रहाणां च।

१०६.०३ शृङ्गाट-संस्थितानां मेघानां गर्भ-लक्षणं च-एव॥

१०६.०४ धारण-वर्षण-रोहिणि-वायव्य-आषाढ-भद्रपद[K.भाद्रपद]-योगाः।

१०६.०४ क्षणवृष्टिः कुसुमलताः सन्ध्या-चिह्नं दिशां दाहः॥

१०६.०५ भूकम्प-उल्का-परिवेष-लक्षणं शक्रचाप-खपुरं च।

१०६.०५ प्रतिसूर्यो निर्घातः सस्य-द्रव्य-अर्घकाण्डं च॥

१०६.०६ इन्द्रध्वज-नीराजन-खञ्जनक-उत्पात-वर्हि[K.बर्हि]चित्रं च।

१०६.०६ पुष्य-अभिषेक-पट्टप्रमाणम् असिलक्षणं वास्तु॥

१०६.०७ उदक्[K.उदग्]आर्गलम् आरामिकम् अमरालय-लक्षणं कुलिशलेपः।

१०६.०७ प्रतिमा वनप्रवेशः सुरभवनानां प्रतिष्ठा च॥

१०६.०८ चिह्नं गवाम् अथ शुनाम् कुक्कुट-कूर्म-अज-पुरुष-चिह्नं च।

१०६.०८ पञ्च-मनुष्य-विभागः स्त्रीचिह्नं वस्त्र-विच्छेदः॥

१०६.०९ चामर-दण्ड-परीक्षा स्त्री-स्तोत्रं च-अपि सुभग-करणं च।

१०६.०९ कान्दर्पिक-अनुलेपन-पुंस्त्रिकाध्याय-शयन-विधिः॥

१०६.१० वज्र-परीक्षा मौक्तिक-लक्षणम् अथ पद्मराग-मरकतयोः।

१०६.१० दीपस्य लक्षणं दन्तधावनं शाकुनं मिश्रम्॥

१०६.११ अन्तरचक्रं विरुतं श्वचेष्टितं विरुतम् अथ शिवायाश् च॥

१०६.११ चरितं मृग-अश्व-करिणां वायस-विद्योत्तरं च ततः॥

१०६.१२ पाको नक्षत्र-गुणास् तिथि-करण-गुणाः सधिष्ण्य-जन्म-गुणाः।

१०६.१२ *गोचरम् अथ[K.गोचरस् तथा] ग्रहाणां कथितो नक्षत्रपुरुषश् च॥

१०६.१३ शतम् इदम् अध्यायानाम् अनुपरिपाटिक्रमाद् अनुक्रान्तम्।

१०६.१३ अत्र श्लोक-सहस्राण्य् आबद्धान्य् ऊनचत्वारि॥

१०६.१४अब्[K.ओमित्तेद्]। अत्र-एव-अन्तर्भूतं परिशेषं निगदितं च यात्रायाम्।

१०६.१४च्द्[K.ओमित्तेद्]। बह्वाश्चर्यं जातकम् उक्तं करणं च बहुचोद्यम्॥